गरुड पुराण नेपाली भाषाटीका प्रारम्भ

* अथ प्रथमोऽध्यायः *

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं चैव ततो जयमुदीरयेत्॥

धर्मदृढबद्धमूलो वेदस्कन्धः पुराणशाखाढ्यः। क्रतुकुसुमो मोक्षफलो मधुसूदनपादपो जयति॥ १॥
नैमिषे निमिषक्षेत्रे ऋषयः शौनकादयः। सत्रं स्वर्गाय लोकाय सहस्रसममासत॥ २॥
त एकदा तु मुनयः प्रातर्हुतहुताग्नयः। सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात्॥ ३॥

श्री विष्णु भगवान् रूपी यौटा श्रेष्ट वृक्ष छ। धर्मले बलियो बाँधियेको, वेदमूल हाँगा, पुराण मसिना हाँगा, यज्ञ फूल (मोक्षफल) यस्ता मधुसूदन भगवान् सर्वोत्कर्षले रहुन्॥ १॥ नैमिषारण्य नाम गरियेको, एउटा पुण्यक्षेत्रमा शौनकादि ऋषिहरू स्वर्गलोक पाउनुका निमित्त दिन दिनै यज्ञ गरी हजारौं वर्षसम्म तपस्या गरिरहेका थिये॥ २॥ तिनै मुनिहरूले प्रातःकालीन कर्म गरिसकेका बखतमा सूतनामका पौराणिक आउँदा भये। तब तो शौनकादिहरूले आदर पूर्वक पूजा गरी तिनी सँग यो प्रश्न गर्दा भये॥ ३॥

ऋषय ऊचुः —

कथितो भवता सम्यग्देवमार्गः सुखप्रदः। इदानीं श्रोतुमिच्छामो यममार्गं भयप्रदम्॥ ४॥
तथा संसारदुःखानि तत्क्लेशक्षयसाधनम्। ऐहिकामुष्मिकान्क्लेशान्यथावद्वक्तुमर्हसि ॥ ५॥

सूत उवाच —

शृणुध्वं भो विवक्ष्यामि यममार्गं सुदुर्गमम्। सुखदं पुण्यशीलानां पापिनां दुःखदायकम्॥ ६॥
यथा श्रीविष्णुना प्रोक्तं वैनतेयाय पृच्छते। तथैव कथयिष्यामि संदेहच्छेदनाय वः॥ ७॥
कदाचित्सुखमासीनं वैकुण्ठे श्रीहरिं गुरुम्। विनयावनतो भूत्वा पप्रच्छ विनतासुतः॥ ८॥

हे सूतजी! हजुरले धेरै प्रकारका देवमार्ग बताउनु भयो अब यमलोकको बाटो कस्तो छ, सुन्न चाहन्छौं॥ ४॥ त्यस्तै संसारको दुःख कष्ट नाश गर्ने साधन र यो लोक परलोकलाई सुख हुने उपाय बताउन तपाई योग्य हुनुहुन्छ, बताउनुहवोस्॥ ५॥ **सूतजी आज्ञा गर्नु हुन्छः** — शौनकादि सुन! पापीलाई दुःख दायक, पुण्यात्मालाई सुख हुने, यमलोकको बाटो भन्दछु॥ ६॥ तपाईहरूको सन्देह नाश गर्न, जस्तै वैकुण्ठमा विष्णुले गरुडलाई बताइयो सोहि कथा भन्छु सुन॥ ७॥ कुनै बखत वैकुण्ठमा जगद्गुरु (विष्णु) सुख पूर्वक बसेका थिए उसै बखत विनताका पुत्र गरुडले हरिलाई नम्रता पूर्वक सोद्धा भये॥ ८॥ **हे देव!** हजुरले भक्तिको मार्ग धेरै

गरुड उवाच —

भक्तिमार्गो बहुविधः कथितो भवता मम। तथा च कथिता देव भक्तानां गतिरुत्तमा॥ ९ ॥
अधुना श्रोतुमिच्छामि यममार्गं भयंकरम्। त्वद्भक्तिविमुखानां च तत्रैव गमनं श्रुतम्॥ १०॥
सुगमं भगवन्नाम जिह्वा च वशवर्तिनी। तथापि नरकं यान्ति धिग्धिगस्तु नराधमान्॥ ११॥
अतो मे भगवन् ब्रूहि पापिनां या गतिर्भवेत्। यममार्गस्य दुःखानि तथा ते प्राप्नुवन्ति वै॥ १२॥

श्रीभगवानुवाच —

वक्ष्येऽहं शृणु पक्षीन्द्र यममार्गं च येन ये। नरके पापिनो यान्ति शृण्वतामपि भीतिदम्॥ १३॥

प्रकारको बताउनु भयो र भक्तहरूको उत्तम गति पनि बताउनु भयो, सो मैले सुनें॥ ९॥ यस बखतमा अत्यन्त डरलाग्दो यमलोकको मार्ग सुन्नेको इच्छा छ। हजुरका भक्तिले विमुख भयेका पापी त्यहीं जान्छन् भन्ने सुनेको छु॥ १०॥ आफ्नो बसमा रहेको जिब्रोले सुगम र सजीलो हजुरको नाम न जपि नरकमा पर्ने मनुष्यको जन्म व्यर्थ हो, ती नराधम हुन्॥ ११॥ हे भगवन्! पापी मनुष्यको जो गति हुन्छ सो मेरा उपर कृपागरी भनिबक्सियोस्। पापीहरूले यमलोकमा जाँदा कस्तो दुःख भोग्नु पर्दछ॥ १२॥ यस्तो गरुडको प्रश्न सुनी **श्री भगवान् आज्ञा गर्नु हुन्छः**— हे पक्षीन्द्र! पापीहरू यमलोक जान्छन्, त्यो बाटो सुन्दैमा डरलाग्दो छ॥ १३॥ **हे गरुड! सुन**— जो

ये हि पापरतास्तार्क्ष्य दयाधर्मविवर्जिताः। दुष्टसङ्गाश्च सच्छास्त्रसत्सङ्गतिपराङ्मुखाः॥ १४॥
आत्मसंभाविताः स्तब्धा धनमानमदान्विताः। आसुरं भावमापन्ना दैवीसंपद्विवर्जिताः॥ १५॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥ १६॥
ये नरा ज्ञानशीलाश्च ते यान्ति परमां गतिम्। पापशीला नरा यान्ति दुःखेन यमयातनाम्॥ १७॥
पापिनामैहिकं दुःखं यथा भवति तच्छृणु। ततस्ते मरणं प्राप्य यथा गच्छन्ति यातनाम्॥ १८॥
सुकृतं दुष्कृतं वापि भुक्त्वा पूर्वं यथार्जितम्। कर्मयोगात्तदा तस्य कश्चिद्व्याधिः प्रजायते॥ १९॥

मनुष्य सँधै पाप गर्छ, दयाधर्मले वर्जित छ, दुष्टको सँग गर्छ, सत्शास्त्र र सत्संगले रहित भयेको छ॥ १४॥ ममताले युक्त मदान्ध भयेको, धनले राक्षस स्वभाव भयेको छ, देवताका भक्तिले हीन भयेको र अभिमानी छ॥ १५॥ फेरि वित्त भ्रान्तिले युक्त भै मोह रूपी जालले ढाकियेको छ, काम भोग, स्त्रीमा आसक्तभयेको यस्तो मनुष्य अशुची दुःख दायक नरकमा गिर्न जान्छन्॥ १६॥ जो मनुष्य ज्ञानी छन् ती परं गतिमा प्राप्त हुन्छन्। जो पापी छन् त्यस्ता मनुष्यले दुःखले यम यातना भोग्नु पर्दछ॥ १७॥ पापीहरूको जो दुःख पैले र अन्त्य कालमा पनि हुन्छ र तिनीहरू जसरि यमलोकमा जान्छन् सो भन्छु॥ १८॥ पूर्वको सुकर्मको भोग गरी कर्मको योगले मनुष्यलाई व्याधि लाग्न जान्छ॥ १९॥ आधि-मानसिक चिन्ता र व्याधि रोगले युक्त भयेको छँदो जीउने आशा गर्दछ, तर काल रूपि सर्पले ग्रास गरेको

आधिव्याधिसमायुक्तं जीविताशासमुत्सुकम्। कालो बलीयानहिवदज्ञातः प्रतिपद्यते॥ २०॥
तत्राप्यजातनिर्वेदो म्रियमाणः स्वयं भृतैः। जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे॥ २१॥
आस्तेवमत्योपन्यस्तं गृहपाल इवाहरन्। आमया व्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः॥ २२॥
वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः। कासस्वासकृतायासः कण्ठे घुरघुरायते॥ २३॥
शयानः परिशोचद्भिः परिवीतः स्वबन्धुभिः। वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः॥ २४॥
एवं कुटुम्बभरणे व्यापृतात्माऽजितेन्द्रियः। म्रियते रुदतां स्वानामुरुवेदनयास्तधीः॥ २५॥
तस्मिन्नन्तःक्षणे तार्क्ष्य दैवी दृष्टिः प्रजायते। एकीभूतं जगत्सर्वं न किंचिद्वक्तुमीहते॥ २६॥

अज्ञानि हुनाले जान्दैन॥ २०॥ त्यस्तो मर्ने बखतमा पनि मैले नै स्त्री-पुत्रादि पालन गरेको छू भनि ठान्दो छँदो मर्ने बेला भो भनि जान्दैन॥ २१॥ अज्ञानले डाकियेको छँदो नजीकमा राखेको आहार कुकुरले खाये झैं रोगले पीडित् भई चेष्टा गरी रहन्छ॥ २२॥ कफले नाडी रुद्ध भयेकोले, वायुले स्वाँस खीचेर छोटोभयेर घाँटिमा कफ रहि घुर घुर शब्द गर्दछ॥ २३॥ आफ्ना बन्धुहरू वरीपरि रहेका शयनमा रहि बोल्न नसकी कालपासमा पर्दछ॥ २४॥ यस्ता प्रकारले आसक्त चित्त भयेको इन्द्रिय नजितेको छँदो आफ्ना स्त्री-पुत्र दाजु-भाईका बीचैमा रुँदै रुँदै मरणमा प्राप्त हुन्छ॥ २५॥ हे गरुडजी! अन्त्य समयमा देवताको दृष्टी प्राप्त हुन जान्छ। कस्तो भने यम दुतलाई पनि

विकलेन्द्रियसंघाते चैतन्ये जडतां गते। प्रचलन्ति ततः प्राणा याम्यैर्निकटवर्तिभिः ॥ २७ ॥
स्वस्थानाच्चलिते श्वासे कल्पाख्यो ह्यातुरक्षणः। शतवृश्चिकदष्टस्य या पीडा सानुभूयते ॥ २८ ॥
फेनमुद्गिरते सोऽथ मुखं लालाकुलं भवेत्। अधोद्वारेण गच्छन्ति पापिनां प्राणवायवः ॥ २९ ॥
यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ। पाशदण्डधरौ नग्नौ दन्तैः कटकटायितौ ॥ ३० ॥
ऊर्ध्वकेशौ काककृष्णौ वक्रतुण्डौ नखायुधौ। स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्चति ॥ ३१ ॥
अङ्गुष्ठमात्रः पुरुषो हा हा कुर्वन् कलेवरात्। तदैव गृह्यते दूतैर्याम्यैः पश्यन् स्वकं गृहम् ॥ ३२ ॥

त्यस्ले प्रत्यक्ष देख्छ। फेरि यो जगत् र परलोक पनि सम्पूर्ण देखी पूर्वको आफुले भोग्नु पर्ने कर्म सबै जान्दछ, तर केहि बोल्न सक्तैन ॥ २६ ॥ सम्पूर्ण इन्द्रिय विकल भयेको, चैतन्य जडभयेर प्राणान्तको बखतमा यमराजका दूतलाई नजीकै बसेको देखी छटपट गर्छ ॥ २७ ॥ कहिं चल्न नसकी जब स्वाँस चल्न थाल्यो तब त्यो आतुर हुन्छ। त्यस्लाई एक क्षणै पनि कल्प समान हुन्छ। सय विच्छीले टोकेको पीडा भोग्दछ ॥ २८ ॥ मुखमा राल काढेर, कफ वमन गर्दै अधोद्वारले पापीको प्राण जान्छ ॥ २९ ॥ त्यस बखतमा यमराजका दुतले क्रोधले डर देखाउँदछन्, ती कस्ता दूत भने हातमा पाश लियेका, नाङ्गा दाँत बजाउने ॥ ३० ॥ काला ठाड़ा लामा केश भयेका हतियार जस्ता नङ्ग्रा भयेका, यस्ता दूत देखि डराई मल मूत्र पनि गर्दछ ॥ ३१ ॥ हा हा गर्दै शरीरबाट अङ्गुष्ठ प्रमाण पुरुषलाई दूतले बाँधि यमलोक

यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात्। नयतो दीर्घमध्वानं दण्ड्यं राजभटा यथा ॥ ३३ ॥
तस्यैवं नीयमानस्य दूताः संतर्जयन्ति च। प्रवदन्ति भयं तीव्रं नारकाणां पुनः पुनः ॥ ३४ ॥
शीघ्रं प्रचल दुष्टात्मन् यास्यसि त्वं यमालयम्। कुम्भीपाकादिनरकांस्त्वां नयावोऽद्य मा चिरम् ॥ ३५ ॥
एवं वाचस्तदा शृण्वन् बन्धूनां रुदितं तथा। उच्चैर्हाहेति विलपंस्ताड्यते यमकिङ्करैः ॥ ३६ ॥
तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः । पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् ॥ ३७ ॥
क्षुत्तृट्परीतोऽर्कदवानलानिलैः, संतप्यमानः पथि तप्तबालुके। कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रमोदके ॥३८ ॥

देखाउन लैजान्छन् ॥ ३२ ॥ प्रारब्ध कर्म भोग गराउनलाई गलामा डोरिले बाँधि लामु बाटो लाग्दछन्, जस्तै खूनीजनलाई राजाका सिपाहिले लैजान्छन् ॥ ३३ ॥ यस्ता प्रकारले लगेका प्राणीलाई दूतहरू बारम्बार नरक यस्तो छ उस्तो छ भनि डरदेखाउदै लैजान्छन् ॥ ३४ ॥ हे दुष्ट! तँ छिटो हिड यमराजका घर पुगेर तँलाई कुम्भीपाकादि नरकमा लैजान्छौं, छिटो हिड, भन्दै लैजान्छन् ॥ ३५ ॥ दूतको यस्तो वचन सुनी बन्धुहरूलाई रुँदै छोडी हाहाकार गर्दै आफ्ना बन्धुले त्याग गरेको छँदो त्यस मानिसलाई यमदूतले ताड़ना गर्दै लैजान्छन् ॥ ३६ ॥ यमदूतले निर्दयी भयी धम्की देखाउँदा डरले काम्दो छँदो, आफूले गरेको पाप कर्म सम्झी दुःख दायक बाटामा कुकुर आदि खान जान्छन् ॥ ३७ ॥ भोक तिर्खा लागेको, घाम डढेला हावाले पीडित, बाटमा ताता बालूवा माथि पानी नभयेको र बास न भयेको, पीठमा

तत्र तत्र पतञ्छ्रान्तो मूर्छितः पुनरुत्थितः। यथा पापीयसा नीतस्तमसा यमसादनम्॥ ३९॥
त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीयते तत्र मानवः। प्रदर्शयन्ति दूतास्ता घोरा नरकयातनाः॥ ४०॥
मुहूर्तमात्रात्त्वरितं यमं वीक्ष्य भयं पुमान्। यमाज्ञया समं दूतैः पुनरायाति खेचर॥ ४१॥
आगम्य वासनाबद्धो देहमिच्छन् यमानुगैः। धृतः पाशेन रुदति क्षुत्तृड्भ्यां परिपीडितः॥ ४२॥
भुंक्ते पिण्डं सुतैर्दत्तं दानं चातुरकालिकम्। तथापि नास्तिकस्तार्क्ष्य तृप्तिं याति न पातकी॥ ४३॥
पापिनां नोपतिष्ठन्ति दानं श्राद्धं जलांजलिः। अतः क्षुद्व्याकुला यान्ति पिण्डदानभुजोऽपि ते॥ ४४॥

कोर्राले हानियेको, हिड्न सक्दैन ता पनि करले हिड्दछ॥ ३८॥ ठाँक २ मा पछारिदो, मूर्छा पर्दो, फेरि उठ्दो छँदो, पाप रूपि अन्धकारले यमराजका घरमा लगिन्छ॥ ३९॥ ३ या २ मुहूर्तमा यमलोकमा त्यो मनुष्य पुऱ्याई दूतहरूबाट डरलाग्दो नरक देखाईन्छ॥ ४०॥ मुहूर्त मात्रमा चाँडो नै डरलाग्दो यमयातना देखाये र यमका आज्ञाले दूतले आफुसँग उसलाई फेरि आकाश मार्गबाट उहीं ल्याउँदछन्॥ ४१॥ आयेर वासनाले बाँधिएका देहको इच्छा गर्दोछँदो, दूतका पाशले बाँधिएको, भोग तीर्खाले पीडित भई रुन्छ॥ ४२॥ पापी जो छन् छोरा हरूले दिएको जल पिण्ड खाये तापनि आतुर दानले पनि तृप्ति हुदैन। हे गरुडजी!॥ ४३॥ अतिपापी हुनाले दान पिण्ड जलाञ्जली दियेको खाये पनि शान्त न भै सधैं व्याकुल रहन्छ॥ ४४॥ ती प्रेतहरू पिण्ड दान भएको छैन भने केही जन नभएका जङ्गलमा धेरै

भवन्ति प्रेतरूपास्ते पिण्डदानविवर्जिताः। आकल्पं निर्जनारण्ये भ्रमन्ति बहुदुःखिताः॥ ४५॥
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अभुक्त्वा यातनां जन्तुर्मानुष्यं लभते न हि॥ ४६॥
अतो दद्यात् सुतः पिण्डान् दिनेषु दशसु द्विज। प्रत्यहं ते विभज्यन्ते चतुर्भागैः खगोत्तम॥ ४७॥
भागद्वयं तु देहस्य पुष्टिदं भूतपञ्चके। तृतीयं यमदूतानां चतुर्थं सोपजीवति॥ ४८॥
अहोरात्रैश्च नवभिः प्रेतः पिण्डमवाप्नुयात्। जन्तुर्निष्पन्नदेहश्च दशमे बलमाप्नुयात्॥ ४९॥
दग्धे देहे पुनर्देहः पिण्डैरुत्पद्यते खग। हस्तमात्रः पुमान् येन पथि भुंक्ते शुभाशुभम्॥ ५०॥

कालसम्म हावाभई दुःखले घुम्दछन्॥ ४५॥ कल्प बितेपनि आफुले कमायेको कर्म भोग न भई मनुष्य देह फेरि हुन पाँउदैन॥ ४६॥ यसै कारण छोराले प्रेतत्व छुटोस् भनि दैहिक दशदिन सम्म क्रमैले पिण्ड देवोस्। हे गरुड! त्यो पिण्डको चार भाग गरिन्छ॥ ४७॥ चार भाग पिण्डमा, दुई भागले शरीर बन्दछ, एक भाग यमदूतलाई, एक भाग प्रेतले खान पाउँछ॥ ४८॥ नौ दिन सम्म दियेको पिण्डले शरीर बन्दछ, दशौं दिनको पिण्डले सम्पूर्ण शरीर बलले युक्त भयेको हुन्छ॥ ४९॥ डढेको शरीर दशदिनका पिण्डले एक हातको शरीर फेरि तयारीभई यमलोक जाने बाटामा शुभाऽशुभ भोग गर्दछ॥ ५०॥ पिण्डले शरीर कसरि बन्दछ भने सुनः— प्रथम दिनका पिण्डले शिर बन्दछ, दोस्रो

प्रथमेऽहनि यः पिण्डस्तेन मूर्धा प्रजायते। ग्रीवास्कन्धौ द्वितीयेन तृतीयाद्धृदयं भवेत्॥ ५१॥
चतुर्थेन भवेत् पृष्ठं पञ्चमान्नाभिरेव च। षष्ठेन च कटी गुह्यं सप्तमात् सक्थिनी भवेत्॥ ५२॥
जानुपादौ तथा द्वाभ्यां दशमेह्नि क्षुधा तृषा॥ ५३॥
पिण्डजं देहमाश्रित्य क्षुधाविष्टस्तृषार्दितः। एकादशं द्वादशं च प्रेतो भुंक्ते दिनद्वयम्॥ ५४॥
त्रयोदशेऽहनि प्रेतो यन्त्रितो यमकिङ्करैः। तस्मिन् मार्गे व्रजत्येको गृहीत इव मर्कटः॥ ५५॥
षडशीतिसहस्राणि योजनानां प्रमाणतः। यममार्गस्य विस्तारो विना वैतरणीं खग॥ ५६॥

दिनकाले काँध बन्दछ, तेस्रोले हृदय बन्दछ॥ ५१॥ चौथो पिण्डले पृष्ठ, पाँचौले नाभि, छैटौंले कम्बर, गुह्य, सातौं पिण्डले हाड मासु बन्दछ॥ ५२॥ आठ नौ पिण्डले घुडा पाउ बन्छन्। दस दिनमा सम्पूर्ण भोक तृषाले युक्त भएको शरीर बन्दछ॥ ५३॥ भोक तृषाले युक्त भएको, एक हातको शरीर भएको, एकादश द्वादश दिनको पिण्ड प्रेतले खान्छ॥ ५४॥ तेह्र दिनमा यमदूतले बलियो बाँधेको छँदो जस्तै वानर नचाउने मानिसले वानर डोऱ्याई हिड्छ त्यस्तै गरी डोऱ्याई लैजान्छन्॥ ५५॥ हे गरुडजी! वैतरणी नदीलाई छोडेर छयासी हजार योजन लामु यमलोक जाने बाटो छ॥ ५६॥ दिनहूँ प्रेत निश्चय दुइ सय सैंतालीस योजन हिड्दछ॥ ५७॥ तल भनिएका

अहन्यहनि वै प्रेतो योजनानां शतद्वयम्। चत्वारिंशत्तथा सप्त दिवारात्रेण गच्छति॥ ५७॥
अतीत्य क्रमशो मार्गे पुराणीमानि षोडश। प्रयाति धर्मराजस्य भवनं पातकी जनः॥ ५८॥
सौम्यं सौरिपुरं नगेन्द्रभवनं गन्धर्वशैलागमौ। क्रौञ्चं क्रूरपुरं विचित्रभवनं बह्वापदं दुःखदम्॥
नानाक्रन्दपुरं सुतप्तभवनं रौद्रं पयोवर्षणं। शीताढ्यं बहुभीतिधर्मभवनं याम्यं पुरं चाग्रतः॥ ५९॥
याम्यपाशैर्धृतः पापो हाहेति प्ररुदन् पथि। स्वगृहं तु परित्यज्य पुरं याम्यमनुव्रजेत्॥ ६०॥

॥ इति श्रीगरुडपुराणे सारोद्धारे पापिनामैहिकामुष्मिकदुःखनिरूपणं नाम प्रथमोऽध्यायः॥ १॥

१६ शहरलाई क्रमैले ती पातकी जन एकएक गरी नाघेर धर्मराजका शहरमा पुग्दछन्॥ ५८॥ ती कुन्कुनहुन्भने, सौम्य १ सौरी २ नगेन्द्र ३ गन्धर्व ४ शैलागम ५ क्रौंच ६ क्रूर ७ विचित्र ८ बह्वापद ९ दुःखद १० नानाक्रन्द ११ सुतप्त १२ रौद्र १३ पयोवर्षण १४ शीताढ्या १५ धर्म भवन १६ यमपुरी अगाडी छन्॥ ५९॥ यमपासले बाँधियेर रुँदै रुँदै पापी जो छ आफ्नू घर त्यागी यमका शहरमा जान्छ॥ ६०॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां प्रथमोऽध्यायः॥ १॥

ॐ अथ द्वितीयोऽध्यायः ॐ

गरुड उवाच —

कीदृशो यमलोकस्य पन्था भवति दुःखदः। यत्र यान्ति यथापापास्तन्मे कथय केशव॥ १॥

श्रीभगवानुवाच —

यममार्गं महादुःखप्रदं ते कथयाम्यहम्। मम भक्तोऽपि तच्छ्रुत्वा त्वं भविष्यसि कम्पितः॥ २॥
वृक्षच्छाया न तत्रास्ति यत्र विश्रमते नरः। यस्मिन्मार्गे न चान्नाद्यं येन प्राणान् समुद्धरेत्॥ ३॥
न जलं दृश्यते क्वापि तृषितोऽतीवयः पिबेत्। तपन्ते द्वादशादित्याः प्रलयान्ते यथा खग॥ ४॥

गरुडजी फेरि सोधनु हुन्छः — हे भगवन् यमलोक जाने बाटो कसतो दुःखदायी छ, पापीहरु कसरी जान्छन्, आज्ञा हवोस्॥ १॥ श्री भगवान् आज्ञा गर्नु हुन्छः — हे गरुड! सुन यमलोक जाने मार्ग कहन्छु, यो बाटो अति दुःख दायक छ, तर तिमी मेरा भक्त छौ, त्यो बाटोको दुःख सुन्दैमा तिमी अत्यन्त डराउनेछौ॥ २॥ तहाँ विश्राम गर्ने वृक्षको छायाँ पनि छैन, जुन जगामा प्राणधारण गर्न अन्न पनि पायीदैन त्यो यस्तो दुःखको बाटो छ॥ ३॥ हे गरुड! तृषा लागेमा पानी पनि खान पाँईदैन तथा जस्तै प्रलयकालमा १२ सूर्य उदाउँदा

तस्मिन्गच्छति पापात्मा शीतवातेन पीडितः। कण्टकैर्विध्यते क्वापि क्वचित्सर्पैर्महाविषैः॥ ५॥
सिंहर्व्याघ्रैः श्वभिर्घोरैर्भक्ष्यते क्वापि पापकृत्। वृश्चिकैर्दश्यते क्वापि क्वचिद्दह्यति वह्निना॥ ६॥
ततः क्वचिन्महाघोरमसिपत्रवनं महत्। योजनानां सहस्रे द्वे विस्तारायामतः स्मृतम्॥ ७॥
काकोलूकवटगृध्र - सरघादंशसंकुलम्। सदावाग्नि च तत्पत्रश्छिन्नभिन्नः प्रजायते॥ ८॥
क्वचित्पतत्यन्धकूपे विकटात्पर्वतात्क्वचित्। गच्छते क्षुरधारासु शङ्कूनामुपरि क्वचित्॥ ९॥
स्खलत्यन्धे तमस्युग्रे जले निपतते क्वचित्। क्वचित्पङ्के जलौकाढ्ये क्वचित्संतप्तकर्दमे॥ १०॥

पोल्ने हुन्छन्, त्यस्तै॥ ४॥ तेस्ता दुःख दायक मार्गमा ताता हावाले पीडित भयेको छँदो कँहि काँढाले घोचिदै, कहि सर्पले टोकिदै, दुःखले जान्छ॥ ५॥ पापीलाई बाटामा कहिं सिंहले, कहि भालुले, कहि कुकुरले, कहि बिच्छीले, टोक्दछ, कहि अग्निमा जल्दछ॥ ६॥ त्येस्तै बाटामा दुई हजार योजन लामु फैलीयेको असिपत्र नाम भयेको ठूलो वन अति डरलाग्दो छ॥ ७॥ त्यस वनमा काग, लाटोकोसेरो, बाज, गिद्ध, भुमरो, औंरिगाल आदि नित्य रहेका छन्। सधैं डँढेलो लागि रहेको, तरवार जस्ता पत्र खसेर शरीर छिन्न भिन्न हुन्छ॥ ८॥ यमदूतले पापीलाई कहिं कुँवादेखि, कहिं पर्वतदेखि गिराउँद छन्। कँहि छुराका धारमा, कहिं काँढै काँढामा हिड्नु पर्दछ॥ ९॥ यमदूतले अन्धकारमा गिराउँछन्, कहिं गहीरा पानीमा डुबाउँछन्, कहिं हिलामा, कहि मैलामा, कहि ताता हिलामा डुबाउदछन्॥ १०॥

संतप्तबालुकाकीर्णे ध्माततात्रमये क्वचित्। क्वचिदङ्गारराशौ च महाधूमाकुले क्वचित्॥ ११॥
क्वचिदङ्गारवृष्टिश्च शिलावृष्टिः सवज्रका। रक्तवृष्टिः शस्त्रवृष्टिः क्वचिदुष्णाम्बुवर्षणम्॥ १२॥
क्षारकर्दमवृष्टिश्च महानिम्नानि च क्वचित्। वप्रप्ररोहणं क्वापि कन्दरेषु प्रवेशनम्॥ १३॥
गाढान्धकारस्तत्रास्ति दुःखारोहशिलाः क्वचित्। पूयशोणितपूर्णाश्च विष्ठापूर्णा ह्रदाः क्वचित्॥ १४॥
मार्गमध्यवहात्युग्रा घोरा वैतरणी नदी। सा दृष्टा दुःखदा किं वा यस्या वार्ता भयावहा॥ १५॥
शतयोजनविस्तीर्णा पूयशोणितवाहिनी। अस्थिवृन्दतटा दुर्गा मांसशोणितकर्दमा॥ १६॥
अगाधा दुस्तरा पापैः कैशशैवालदुर्गमा। महाग्राहसमाकीर्णा घोरपक्षिशतैर्वृता॥ १७॥

कहिं ताता बालुवामा, कहिं ताता फलाममा, कहिं आगोमा, कहिं धुवामा हिड्नु पर्दछ॥ ११॥ कहिं अग्निवृष्टि, कहिं ढुङ्गा, कहिं वज्र, कहिं रक्त, कहिं शस्त्र, कहिं तातो पानीको वर्षा भैरहेको छ॥ १२॥ कहिं भस्मवृष्टि, कहिं अति गैरामा हिड़ाउँछन्, कहिं पर्वत चढ्नु पर्दछ, कहिं गुफामा हिंड्नु पर्दछ॥ १३॥ कहिं गाढ अन्धकार छ, कहिं पहिरामा, दुःखले हिड्नु पर्छ, कहिं पीप रक्तको र कहिं मलमूत्रको तलाउमा हिड्नुपर्छ॥ १४॥ त्यै बाटामा अति डरलाग्दी बैतरणी नदी छन्, ती वैतरणी देख्नुता के कुरो सुन्दामा डरलाग्दी छन्॥ १५॥ ती वैतरणी नदी सय योजन फैलेकी, पीप रक्तले बहेकी, हाडको किनार, मांसु रक्तको बालुवाले युक्त भयाकी॥ १६॥ पापीहरूलाई

आगतं पापिनं दृष्ट्वा ज्वालाधूमसमाकुला। क्वथते सा नदी तार्क्ष्य कटाहान्तर्घृतं यथा॥ १८॥
कृमिभिः संकुला घोरैः सूचिवक्त्रैः समन्ततः। वज्रतुण्डैर्महागृध्रैर्वायसैः परिवारिता॥ १९॥
शिशुमारैश्च मकरैर्जलौकामत्स्यकच्छपैः। अन्यैर्जलस्थजीवैश्च पूरिता मांसभेदकैः॥ २०॥
पतितास्तत्प्रवाहे च क्रन्दन्ति बहुपापिनः। हा भ्रातः पुत्र तातेति प्रलपन्ति मुहुर्मुहुः॥ २१॥
क्षुधितास्तृषिता: पापाः पिबन्ति किल शोणितम्। सा सरिद्रुधिरापूरं वहन्ती फेनिलं बहु॥ २२॥
महाघोरातिगर्ज्जन्ती दुर्निरीक्ष्या भयावहा। तस्या दर्शनमात्रेण पापाः स्युर्गतचेतनाः॥ २३॥

तर्नमा अति दुःख भयेकी, अनेक प्रकारका डरलाग्दा गोही ये पक्षीहरूले युक्त भयेकी, यस्ती वैतरणी नदी छिन्॥ १७॥ हे गरुड! ती नदी कस्ती भने, पापी आयेको टाढैबाट देख्दा कटकटी पाकिएकी, जस्तै पाकेका घिउ तेलमा पानी पर्दा जस्तो शब्द हुन्छ, त्यस्तै धूम उठेकी॥ १८॥ सियो जस्तो तीखो मुख भयेकी, लामो चुचो भयेकी, तिखा नंग्रा भयेकी, गिद्ध कागले युक्त भयेकी, यस्ती नदी छिन्॥ १९॥ शिशुमार आदि मकर भये, जुका भये, कछुवा भये औ जलमा बसी मांसु आदिले पेट भर्ने जन्तुहरू छन्॥ २०॥ त्यसै प्रवाहमा झरेका पापी जो छन् रुँदै कराउँदै—हे भाई! हे पुत्र! हे बाबु! बारंबार भन्छन्॥ २१॥ पापी जो छन् भोक तिर्खाले आकुल भयेर रक्तको पान गर्छन्, सो वैतरणी नदी जो छिन् धेरै पीप रक्तको भेल भै रहेकी छन्॥ २२॥ ठूलो गर्जना गर्दा, पापीहरूले देखौमा बिचेत भै मूर्छा हुन जान्छन्॥ २३॥

बहुवृश्चिकसंकीर्णा सेविता कृष्णपन्नगैः। तन्मध्ये पतितानाञ्च त्राता कोऽपि न विद्यते ॥ २४ ॥
आवर्तशतसाहस्त्रैः पाताले यान्ति पापिनः। क्षणं तिष्ठन्ति पाताले क्षणादुपरिवर्तिनः ॥ २५ ॥
पापिनां पतनायैव निर्मिता सा नदी खग। न पारं दृश्यते तस्या दुस्तरा बहुदुःखदा ॥ २६ ॥
एवं बहुविधक्लेशे यममार्गेऽतिदुःखदे। क्रोशन्तश्च रुदन्तश्च दुःखिता यान्ति पापिनः ॥ २७ ॥
पाशेन यन्त्रिताः केचित्कृष्यमाणास्तथांकुशैः। शस्त्राग्रैः पृष्ठतः प्रोतैर्नीयमानाश्च पापिनः ॥ २८ ॥
नासाग्रपाशकृष्टाश्च कर्णपाशैस्तथा परे। कालपाशैः कृष्यमाणाः काकैः कृष्यास्तथापरे ॥ २९ ॥
ग्रीवाबाहुषु पादेषु बद्धाः पृष्ठे च शृंखलैः। अयोभारश्च ये केचिद्वहन्तः पथि यान्ति ये ॥ ३० ॥

बिच्छी र काला सर्पले सेवा गरियेको वैतरणी नदीमा पर्न गयेका पापीको रक्षा गर्ने कोहि पाईंदैन ॥ २४ ॥ लाखौं पल्ट पापी पाताल जान्छ, एक क्षण पातालमा बसी फेरि त्यस्ले माथी आउनु पर्दछ ॥ २५ ॥ हे गरुड! पतितलाई दुःख भोगाउनका निमित्त सो नदी बनायेको हो, त्यस्को पार पनि देखिंदैन, बहुतै दुःख दायक छन् ॥ २६ ॥ यस्ता प्रकारको बहुतै दुःख दायक बाटामा पापीहरू रूँदै कराउँदैं दुःखले यमलोक जान्छन् ॥ २७ ॥ कसैलाई पाशाले बाँधेर, कसैलाई अंकुशले खीचेर, कसैलाई पछाड़ि भालाले घोचेर हिड़ाउँछन् ॥ २८ ॥ कसैलाई नाक छेड़ि डोरीलगाएर तानेको, कसैलाई कानमा डोरीलगाएर तानेको, कसैलाई काल पाशाले बाँधेर तान्दै लैजान्छन् ॥ २९ ॥

यमदूतैर्महाघोरैस्ताड्यमानाश्च मुद्गरैः। वमन्तो रुधिरं वक्त्रात्तदेवाश्नन्ति ते पुनः ॥ ३१ ॥
शोचन्तः स्वानि कर्माणि ग्लानिं गच्छन्ति जन्तवः। अतीव दुःखसंपन्नाः प्रयान्ति यममन्दिरम् ॥ ३२ ॥
तथापि स चलन्मार्गेपुत्र पौत्र इति ब्रुवन्। हाहेति प्ररुदन्नित्यमनुतप्यति मन्दधीः ॥ ३३ ॥
महता पुण्ययोगेन मानुषं जन्म लभ्यते। तत्प्राप्य न कृतो धर्मःकीदृशं हि मया कृतम् ॥ ३४ ॥
मया न दत्तं न हुतं हुताशने तपो न तप्तं त्रिदशा न पूजिताः।
न तीर्थसेवा विहिता विधानतो देहिन्क्वचिन्निस्तर यत्त्वया कृतम् ॥ ३५ ॥

हात पाउ कण्ठमा बाँधेर नेल लगाइ पीठ्यूमा फलामको भारी बोकाई पापीलाई लान्छन् ॥ ३० ॥ डरलाग्दा यमदूतहरूले मुद्गरले ताडना गरेको पापीहरु रक्त जो बमन गरी त्यै खान जान्छन्। अति दुःख पायेका पापीहरू ॥ ३१ ॥ आफ्नु दुष्कर्म सम्झेर ग्लानि भयेका छँदा दुःख भोग्दै यमलोक जान्छन् ॥ ३२ ॥ त्यस्ता दुःखले बाटो हिड्दा हे पुत्र! हे पौत्र! हे बाबू! भन्दै रुँदै मन्द बुद्धिभएका पश्चाताप गर्छन् ॥ ३३ ॥ ठूला पुण्यका योगले मनुष्य जन्म पाएको थियो। त्यस्तो जन्म पायेर पनि कस्तो अधर्म मैले गरें भन्दै ताप गर्दछ ॥ ३४ ॥ हे देहि! मनुष्य चोला भैकन तैंले न ता होमादिक तपस्या, न ब्रह्मा विष्णु शिवको पूजा, न विधिपूर्वक तीर्थको सेवा गरिस् ॥ ३५ ॥ न

न पूजिता विप्रगणा:सुरापगा न चाश्रिता:सत्पुरुषा न सेविता: ।
परोपकारो न कृत: कदाचन देहिन्क्वचिन्निस्तर यत्त्वया कृतम् ॥ ३६ ॥
जलाशयो नैव कृतो हि निर्जले मनुष्यहेतो: पशुपक्षिहेतवे।
गोविप्रवृत्त्यर्थमकारि नाण्वपि देहिन्क्वचिन्निस्तर यत्त्वयाकृतम् ॥ ३७ ॥
न नित्यदानं न गवाह्निकं कृतं न वेदशास्त्रार्थवच: प्रमाणितम्।
श्रुतं पुराणं न च पूजितो ज्ञो देहिन्क्वचिन्निस्तर यत्त्वयाकृतम् ॥ ३८ ॥
भर्तुर्मया नैव कृतं हितं वच: पतिव्रतं नैव कदापि पालितम्।
न गौरवं क्वापि कृतं गुरूचितं देहिन्क्वचिन्निस्तर यत्त्वया कृतम् ॥ ३९ ॥

ब्राह्मणको पूजा गरिस्, न गंगाजीको सेवा, न सत्पुरुषको सेवा गरिस्, कसैको न परोपकार गरिस्, हे देहि! आफुले गरेको भोग ॥ ३६ ॥ न ता कोई निर्जलमा जलाशय बनायें, मनुष्य भै पशुको जस्तो कर्म गरें, नता गौ ब्राह्मणको वृत्ति गरें। हे देहि! धिक्कार छ, तैले मनुष्यको स्थूल देह पाएर दुष्ट कर्म गरिस् र यस्तो दु:ख भोग्नु पऱ्यो ॥ ३७ ॥ न नित्यदान अन्नादिको गरें, न गाईको तृणादिले सेवा गरें, न शास्त्रानुसार कर्म गरें, न कथा पुराणादि सुनें, न ज्ञानिहरूको पूजा गरें। हे देहि! आफुले गरेको कर्म भोग ॥ ३८ ॥ स्त्री, प्रेत, पापी पनि

न धर्मबुद्ध्या पतिरेव सेवितो वह्निप्रवेशो न कृतो मृते पतौ।
वैधव्यमासाद्य तपो न सेवितं देहिन्क्वचिन्निस्तर यत्त्वया कृतम् ॥ ४० ॥
मासोपवासैर्न विशोषितं मया चान्द्रायणैर्वा नियमै: सविस्तरै:।
नारीशरीरं बहुदु:खभाजनं लब्धं मया पूर्वकृतैर्विकर्मभि: ॥ ४१ ॥
एवं विलप्य बहुश: स स्मरन्पूर्वदेहिकम्। मानुषत्वं मम कुत इति क्रोशन्प्रसर्पति ॥ ४२ ॥
दशसप्तदिनान्येको वायुवेगेन गच्छति। अष्टादशे दिने तार्क्ष्य प्रेत: सौम्यपुरं व्रजेत् ॥ ४३ ॥

यस्तो अनुताप गर्दछन्, नता आफ्ना स्वामीदेवको हित गरें, न ता अह्राएको मानें, न ता पतिव्रत पालन गरें, न ता सासु ससुरादिको वचन मानें, न सेवा गरें। यो देहिलाई शुभकर्म केहि गरेन भने, हे देहि! यो कष्ट भोग गर ॥ ३९ ॥ न ता धर्म पूर्वक पतिदेवको सेवा गरें, न ता पतिको प्राणान्तमा सँगै सती भै जलें, न ता विधवा भई तपस्या गरें, यो देह पाई व्यर्थ जन्म गुँमाये भने, हे देहि! दु:ख भोग ॥ ४० ॥ न ता मैनाको व्रत गरें, न कोई दिन उपवास, न ता नियम पूर्वक चान्द्रायण आदि व्रत गरें। स्त्रीको शरीर दु:खको भाँडो हो भनि जान्दै यस्तो गरें, हे देहि! भोग, भन्दै यम लोक पापहरू जान्छन् ॥ ४१ ॥ यस्तो धेरै विलाप गर्दै पूर्वको कर्म सम्झदै मैले मनुष्य भै के यस्तो गरेंछु भन्दै रुँदै कराउँदै हिड्दछन् ॥४२॥ प्रेत जो छ सो १७ दिन वायु वेगले हिड्दछ, १८ दिनमा, हे गरुड! सौम्यनाम पुरमा पुग्दछ ॥ ४३ ॥

तस्मिन्पुरवरे रम्ये प्रेतानाञ्च गणो महान्। पुष्पभद्रा नदी तत्र न्यग्रोधः प्रियदर्शनः ॥ ४४ ॥
पुरे तत्र स विश्रामं प्राप्नोति यमकिङ्करः। दारपुत्रादिकं सौख्यं स्मरते तत्र दुःखितः ॥ ४५ ॥
धनादिभृत्यमित्राणि सर्वं शोचति वै यदा। तदा प्रेतास्तु तत्रत्याः किङ्कराश्चेदमब्रुवन् ॥ ४६ ॥
क्व धनं क्व सुता जाया क्व सुहृत्क्व च बान्धवाः। स्वकर्मोपार्जितम्भोक्ता मूढ याहि चिरं पथि ॥ ४७ ॥

जानासि सम्बलबल बलमध्वगानां नो सम्बलाय यतसे परलोकपान्थ।
गन्तव्यमस्ति तव निश्चितमेव तेन मार्गेण यत्र भवति क्रयविक्रयो हि ॥ ४८ ॥

आबालख्यातमार्गोऽयं नैवमर्त्य! श्रुतस्त्वया। पुराणसम्भवं वाक्यं किं द्विजेभ्योपि न श्रुतम् ॥ ४९ ॥

त्यस शहरमा प्रेतको ठूलो समूह छ, त्यहाँ पुष्पभद्रा नदी छिन्। अति रमणीय ठूलो वरको वृक्ष पनि छ ॥ ४४ ॥ यमदूत सँग ती पापीहरू विश्राम गरेर आफ्ना स्त्री पुत्र घरको सुख सम्झी अति दुःखमा पर्न जान्छन् ॥ ४५ ॥ जस् बखतमा धन, नौकर, चाकर सम्झन्छ त्यै बेला यमदूतहरूले यो भन्दछन् ॥ ४६ ॥ कहाँ धन पुत्र, कहाँ स्त्री, कहाँ मित्र, कहाँ दाजु-भाई तेरा, हे मूढ! आफैंले आफुले गरेको कर्म भोग्दै वर्ष दिनको लामु बाटो हिंड् ॥ ४७ ॥ हे परलोक पान्थ हो! यमको र यमदूतको पनि बल छ भनी जान्दैनथ्यौ के? यमलोक जानु पर्छ भनि याद थियेन के? बाटामा किन मेल हुँदैन भनी थाहा थियेन के? यमलोक जानु अवश्य पर्दछ, हिड ॥ ४८ ॥ बालकालदेखि यो उमेर सम्म

एवमुक्तस्ततो दूतैस्ताड्यमानश्च मुद्गरैः। निपतन्नुत्पतन्धावन्पाशैराकृष्यते बलात् ॥ ५० ॥
अत्र दत्तं सुतैः पौत्रैः स्नेहाद्वा कृपयाऽथवा। मासिकं पिण्डमश्नाति ततःसौरिपुरं व्रजेत् ॥ ५१ ॥
तत्र नाम्नास्ति राजा वै जंगमः कालरूपधृक्। तद्दृष्ट्वा भयभीतोऽसौ विश्रामे कुरुते मतिम् ॥ ५२ ॥
उदकं चान्नसंयुक्तं भुंक्ते तत्र पुरे गतः। त्रैपाक्षिके वैयद्दत्तं स तत्पुरमतिक्रमेत् ॥ ५३ ॥
ततो नगेन्द्रभवनं प्रेतो याति त्वरान्वितः। वनानि तत्र रौद्राणि दृष्ट्वा क्रन्दति दुःखितः ॥ ५४ ॥
निघृणैः कृष्यमाणस्तु रुदते च पुनः पुनः। मासद्वयावसाने तु तत्पुरं व्यथितो व्रजेत् ॥ ५५ ॥
भुक्त्वा पिण्डं जलं वस्त्रं दत्तं यद्बान्धवैरितः। कृष्यमाणः पुनः पाशैर्नीयतेऽग्रे च किङ्करैः ॥ ५६ ॥

वेद, कथा, पुराण आदि के कोई ब्राह्मणदेखि सुनेको थियेन अवश्य थियो ॥ ४९ ॥ यस्तो भन्दै यमदूतले फलामका मुद्गरले कुटीएका छँदा लड्दा उठ्दा यमदूतले पाशाले बाँधि घिसार्दै लैजान्छन् ॥ ५० ॥ त्यो सौम्यपुरमा छोराले दियेको मासिक जल पिण्ड खायेर सौरी नाम को शहरमा जान्छ ॥ ५१ ॥ त्यो पुरमा अति डरलाग्दो कालरूप भयेका जंगम राजा छन्, त्यो देखि डराई विश्राम खोज्दछन् ॥ ५२ ॥ त्यो शहरमा पुत्र आदिले दियेको त्रैपाक्षिक जल पिण्ड खायेर त्यो पुर छोडि दुई मैनामा नगेन्द्र शहरमा पुग्दछन् ॥ ५३ ॥ ठूला वनले युक्त भयेको त्यो नगर छ, त्यो देखो दुःखले रुन कराउन लाग्दछ ॥ ५४ ॥ निर्दयी भयेका यमदूतहरूले डोऱ्याएका ती पापीहरूको बार-बार रुँदै

ग० पु० / द्वि० अ०

मासे तृतीये सम्प्राप्ते प्राप्य गन्धर्वपत्तनम्। तृतीयमासिकं पिण्डं तत्र भुक्त्वा प्रसर्पति॥५७॥
शैलागमं चतुर्थे च मासि प्राप्नोति वै पुरम्। पाषाणास्तत्र वर्षन्ति प्रेतस्योपरिभूरिशः॥५८॥
चतुर्थमासिकं पिण्डंभुक्त्वा किंचित्सुखीभवेत्। ततो याति पुरं प्रेतः क्रौञ्चमासेऽथ पञ्चमे॥५९॥
हस्तदत्तं तदा भुङ्क्ते प्रेतः क्रौञ्चपुरे स्थितः। यत्पञ्चमासिकं पिण्डं भुक्त्वा क्रूरपुरं व्रजेत्॥६०॥
सार्धकैः पञ्चभिर्मासैर्न्यूनषाण्मासिकं व्रजेत्। तत्र दत्तेन पिण्डेन घटेनाप्यायितः स्थितः॥६१॥
मुहूर्तार्धन्तुविश्राम्य कम्पमानः सुदुःखितः। तत्पुरं तु परित्यज्य तर्जितो यमकिङ्करैः॥६२॥

दुई मैना बित्न जान्छ॥५५॥ पुत्रादिले दियेको जल पिण्ड वस्त्र भोगगरी यमदूतले फेरि खिच्दा त्यो नगर छोडी अर्को नगरमा जान्छ॥५६॥ तीन मैनामा गन्धर्वपत्तन नामको शहरमा पुग्दछ, तृतीय मासिक जल पिण्ड भोगगरी अर्को शहरमा जान्छ॥५७॥ चार मैनामा शैलागमन नामको शहरमा पुग्दछ, त्यहाँ प्रेतमाथि पत्थरको वृष्टि हुन्छ, अति दुःख पाउन जान्छ॥५८॥ चतुर्थमासिक पिण्ड खायेर अलिक सुखी हुन्छ॥ प्रेत पाँच मैनामा क्रौंचनामको शहरमा पुग्दछ॥५९॥ स्वहस्तले दान गरेको त्यस शहरमा भोग्न पाउँछ। पाँचौं मासिक श्राद्ध खाई क्रूर नाउँको शहरमा ऊनषाडमासिकमा पुग्दछ॥६०॥ घट पिण्ड जो दियेको छ सो खायेर थोरै बेर बस्तछ॥६१॥ आधा मुहूर्त विश्राम गरेर दुःखले कम्पमान भयेको यमदूतले ताडना गरेको त्यो शहर छोड्दछ॥६२॥ छ मैनामा चित्रभवन नामको

ग० पु० / द्वि० अ०

प्रयाति चित्रभवनं विचित्रो नाम पार्थिवः। यमस्यैवानुजो भ्राता यत्र राज्यं प्रशास्ति हि॥६३॥
तं विलोक्य महाकायं यदा भीतः पलायते। तदा संमुख आगत्य कैवर्ता इदमब्रुवन्॥६४॥
वयं ते तर्त्तुकामाय महावैतरणीं नदीम्। नावमादाय सम्प्राप्ता यदि ते पुण्यमीदृशम्॥६५॥
दानं वितरणं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः। इयं सा तीर्यते यस्मात्तस्माद्वैतरणीस्मृता॥६६॥
यदि त्वया प्रदत्ता गौस्तदा नौरुपसर्पति। नान्यथेति वचस्तेषां श्रुत्वा हा दैव भाषते॥६७॥
तं दृष्ट्वा क्वथते सा तु तां दृष्ट्वा सोऽतिक्रन्दते। अदत्तदानः पापात्मा तस्यामेव निमज्जति॥६८॥

शहरमा पुग्छ। त्यहाँ यमराजका भाइ नै राजा छन्, जस्मा राज्य पनि अति ठूलो छ॥६३॥ ती राजा अति डरलाग्दा छन्। देखी डराई प्रेत भाग्न खोज्दछन्। त्यस बखतमा नाऊ तार्ने माझी आई यो भन्दछ॥६४॥ हे प्रेत हो! तिमीहरूले तर्ने काम गरेका छौ भने वैतरणी नदी तर्न डुङ्गा ल्याएको छु। यदि तिमीहरूको पुण्य छ भने यो नदी॥६५॥ दानैले तरिन्छ, भनि ज्ञानी जनले बताएका छन्। त्यसकारण वैतरणी दानले मात्र तरिन्छ। कस्तो दान भने॥६६॥ यदि तिमीहरूले काली गाई वैतरणी दान गरेका छौ भने डुङ्गा छ, न वा छैन भन्छ। यस्तो सुनी प्रेतले हा दैव! भन्दछ॥६७॥ त्यो देखेर तिनले भनेको सुनि अति रुँदै कराउदै जस्ले दान गरेको छैन, तिनैले वैतरणी नदीमा डूब्नु

तन्मुखे कण्टकं दत्त्वा दूतैराकाशसंस्थितैः। वडिशेन यथा मत्स्यस्तथा पारं प्रणीयते॥ ६९॥

षाण्मासिकंच यत्पिण्डं तत्र भुक्त्वा प्रसर्पति। मार्गे स विलपन्याति बुभुक्षापीडितो ह्यलम्॥ ७०॥
सप्तमे मासि संप्राप्ते पुरं बह्वापदं व्रजेत्। तत्र भुंक्ते प्रदत्तं यत्सप्तमे मासि पुत्रकैः॥ ७१॥
तत्पुरं तु व्यतिक्रम्य दुःखदं पुरमृच्छति। महद्दुःखमवाप्नोति खे गच्छन्खेचरेश्वर॥ ७२॥
मास्यष्टमे प्रदत्तं यत्पिण्डं भुक्त्वा प्रसर्पति। नवमे मासि सम्पूर्णे नानाक्रन्दपुरं व्रजेत्॥ ७३॥
नानाक्रन्दगणान्दृष्ट्वा क्रन्दमानान्सुदारुणान्। स्वयं च शून्यहृदयः समाक्रन्दति दुःखितः॥ ७४॥
विहाय तत्पुरं प्रेतस्तर्जितो यमकिङ्करैः। सुतप्तभवनं गच्छेद्दशमे मासि कृच्छ्रतः॥ ७५॥

पर्दछ॥ ६८॥ ती पापीलाई मुखमा अंकुश लगाई दूतले आकाशमा रही पार गर्छन्, जस्तै माछो बल्छीमा पर्दछ॥ ६९॥ छ मैनाको पिण्ड खाई त्यहाँबाट जान्छ। बाटामा भोक तृषाले पीडा हुनजान्छ॥ ७०॥ सात मैनामा बह्वापद नाम शहरमा पुग्दछ, त्यहाँ पुत्रादिले दियेको सातौं मासिक पिण्ड खान्छ॥ ७१॥ हे गरुड! जो त्यो पुर छोड़ी दुःखद नामक पुरमा पुग्दछ र ठूलो दुःख पाउँदछ॥ ७२॥ आठ मैनामा पुत्रादिले दियेको जलपिण्ड खाई नौ मैना पुगे पछि नानाक्रन्द नाम शहरमा जान्छ॥ ७३॥ नाना प्रकारका गणदेखि अति डराई आफैं पनि दुःखले कराउँन थाल्दछ, शून्य हृदय भयेका दूतहरू छन्॥ ७४॥ यमदूतले ताडना गरेको छँदो त्यो शहर छोड़ी दश मैनामा सुतप्तनामक शहरमा

पिण्डदानं जलं तत्र भुक्त्वापि न सुखीभवेत्। मासि चैकादशे पूर्णे पुरं रौद्रं स गच्छति॥ ७६॥

दशैकमासिकं तत्र भुंक्ते दत्तं सुतादिभिः। सार्द्धचैकादशे मासि पयोवर्षणमृच्छति॥ ७७॥
मेघास्तत्र प्रवर्षन्ति प्रेतानां दुःखदायकाः। न्यूनाधिकं च यच्छ्राद्धं तत्र भुंक्ते स दुःखितः॥ ७८॥
सम्पूर्णे तु ततो वर्षे शीताढ्यं नगरं व्रजेत्। हिमाच्छतगुणं तत्र महाशीतं पतत्यपि॥ ७९॥
शीतार्तःक्षुधितः सोऽपि वीक्षते हि दिशो दश। तिष्ठते बान्धवः कोऽपि यो मे दुःखं व्यपोहति॥ ८०॥
किंकरास्ते वदन्त्यत्र क्व ते पुण्यं हि तादृशम्। भुक्त्वा च वार्षिकं पिण्डं धैर्यमालम्बते पुनः॥ ८१॥

पुग्दछ॥ ७५॥ दशौं मैनामा पुत्रादिले दियेको पिण्डादि खाये पनि सुखी हुँदैन, एघार मैनामा रौद्र पुरमा पुग्दछ॥ ७६॥ पुत्रादिले दियेको पिण्डादि खाई साढे एघार मैनामा वर्षण नामको शहरमा पुग्दछ॥ ७७॥ नित्य मेघ वर्षा रहेकोले प्रेतले दुःख पाउँछ, उनादिक श्राद्ध खाये पनि दुःखि नै हुन्छ॥ ७८॥ वर्ष दिन पूरा भये पछि शीताढ्य नामको शहरमा पुग्छ, जहाँ हिउ भन्दा पनि दोब्बर ज्यादा जाडो छ॥ ७९॥ अति शीत हुनाले भोक पियासले पीडा भयेको हुनाले, मेरो दुःख नास गर्ने कोइ बन्धु छन् कि भनि दशदिशा हेर्न थाल्दछ॥ ८०॥ यमदूतले त्यस पापीलाई भन्छन्, तेरो पुण्य के छ र के हेर्छस् यहाँ ता पुण्यमात्र बन्धु हुन्छन्, वार्षिक पिण्ड खाएर धैर्य गर॥ ८१॥ त्यहाँदेखि वर्ष दिन

ततः संवत्सरस्यान्ते प्रत्यासन्ने यमालये। बहुभीतिपुरे गत्वा हस्तमात्रं समुत्सृजेत्॥ ८२॥
अंगुष्ठमात्रो वायुश्च कर्मभोगाय खेचरः। यातनादेहमासाद्य सह याम्यैः प्रयाति च॥ ८३॥
और्ध्वदेहिकदानानि यैर्न दत्तानि काश्यप। एवं कष्टेन ते यान्ति गृहित्वा दृढबन्धनैः॥ ८४॥
धर्मराजपुरे सन्ति चतुर्द्वाराणि खेचर। यत्रायं दक्षिणद्वारमार्गस्ते परिकीर्तितः॥ ८५॥
अस्मिन्पथि महाघोरे क्षुत्तृषाश्रमपीडिताः। यथा यान्ति तथा प्रोक्तं किंभूयः श्रोतुमिच्छसि॥ ८६॥

॥ इति श्रीगरुडपुराणे सारोद्धारे यममार्गनिरूपणं नाम द्वितीयोऽध्यायः॥ २॥

बिते पछी यमराजका लोकका नजीकै बहुभीति शहरमा पुगी हस्त प्रमाण शरीर छोड्नु पर्दछ॥ ८२॥ फेरि अंगुष्ट प्रमाणको शरीर लिई वायुको गतिले आकाश मार्गले यमराजका पास दूतले पु याउँछन्॥ ८३॥ हे काश्यप! अरू देहिक क्रिया जस्को भएको छैन त्यस प्रेतलाई साहै कष्ट हुन्छ, तेस्लाई बलीयो बाँधि यमलोक पुऱ्याउँछन्॥ ८४॥ हे गरुड! धर्मराजको शहरमा चार ढोका छन्, जो पापी छ त्यस्लाई दक्षिण ढोकाको बाटो लैजान्छन्॥ ८५॥ त्यसै दक्षिण मार्गमा भोक तृषाले पीडित भई पापी जान्छन्॥ हे गरुड! अब के सुन्नेको इच्छा छ भनि आज्ञा भयो॥ ८६॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां द्वितीयोध्यायः॥ २॥

* अथ तृतीयोऽध्यायः *

गरुड उवाच —

यममार्गमतिक्रम्य गत्वा पापी यमालये। कीदृशीं यातनां भुंक्ते तन्मे कथय केशव॥ १॥

श्रीभगवानुवाच —

आद्यंतं च प्रवक्ष्यामि शृणुष्व विनतात्मज। कथ्यमानेऽपि नरके त्वं भविष्यसि कम्पितः॥ २॥
चत्वारिंशद्योजनानि चतुर्युक्तानि काश्यप। बहुभीतिपुरादग्रे धर्मराजपुरं महत्॥ ३॥
हाहाकारसमायुक्तं दृष्ट्वा क्रन्दति पातकी। तत्क्रन्दितं समाकर्ण्य यमस्य पुरचारिणः॥ ४॥

गरुडजी फेरि सोध्नु हुन्छः — हे केशव! जो पापी जन यमलोकको बाटो गै यमलोक पुगेर कस्तो-कस्तो यातना भोग्दछन्, भनि बक्सियोस्। कस्ता पापीलाई कस्तो भोग भोगाउँछन्॥ १॥ **श्री भगवान् (विष्णु) आज्ञा गर्नु हुन्छः** — हे गरुड! आदि अन्त्यको नरक भोग्ने दुःख सुन्दैमा तिमी डराउँनेछौ॥ २॥ हे गरुड! धेरै शहर यमपुरीका वरिपरि छन्, यमको राज्य शहर चवालिस योजन लामो र चौडा भयेको छ॥ ३॥ हाहाकारले युक्त भयेको देखि पापीहरु आफै पनि कराउँछन्, यमदूत करायेको सुनि रहन्छन्॥ ४॥ धर्मध्वज

गत्वा च तत्र ते सर्वे प्रतीहारं वदन्ति हि। धर्मध्वजः प्रतीहारस्तत्र तिष्ठति सर्वदा॥ ५॥
स गत्वा चित्रगुप्ताय ब्रूते तस्य शुभाऽशुभम्। ततस्तं चित्रगुप्तोपि धर्मराजं निवेदयेत्॥ ६॥
नास्तिका ये नरास्तार्क्ष्य महापापपरताः सदा। तांश्च सर्वान्यथायोग्यं सम्यग्जानाति धर्मराट्॥ ७॥
तथापि चित्रगुप्ताय तेषां पापं स पृच्छति। चित्रगुप्तोऽपि सर्वज्ञः श्रवणान्परिपृच्छति॥ ८॥
श्रवणा ब्रह्मणः पुत्राः श्वर्भूपातालचारिणः। दूरश्रवणविज्ञाना दूरदर्शनचक्षुषः॥ ९॥
तेषां पत्न्यस्तथाभूताः श्रवण्यः पृथगाह्वयः। स्त्रीणां विचेष्टितं सर्वं ता विजानन्ति तत्त्वतः॥ १०॥
नरैःप्रच्छन्नप्रत्यक्षं यत्प्रोक्तं च कृतं च यत्। सर्वमावेदयन्त्येव चित्रगुप्ताय ते च ताः॥ ११॥

द्वारपाल सधैं रहन्छन्। दूतले पापीको पाप भन्दछन्॥ ५॥ धर्मध्वज चित्रगुप्त कहाँ गयेर ती पापीको कर्म बताउँछन्॥ चित्रगुप्तले पनि धर्मराजलाई पापीको शुभाशुभ बताउँछन्॥ ६॥ हे तार्क्ष्य! जो मनुष्य महापाप गर्न सधैं रत भएका छन् ती सबैको पाप पुण्य बढिया प्रकारले धर्मराज जान्दछन्॥ ७॥ आने तापनि धर्मराज चित्रगुप्तलाई सोद्धछन्॥ चित्रगुप्त पनि सर्वज्ञ छन् तथापि श्रवणलाई सोद्धछन्॥ ८॥ श्रवण ब्रह्माका पुत्र हुन्, तिनैलोक घुम्दछन्, ती कस्ता भने टाडै सुन्ने, दूरैबाट सम्पूर्ण मनुष्यको कर्म जान्दछन्॥ ९॥ श्रवणादि ७ ब्रह्माका पुत्र हुन्, तिन्का स्त्रीहरू पनि सम्पूर्ण पृथ्वीका स्त्री आदिको कर्म एक एक गरेर जान्दछन्॥ १०॥ मनुष्यले मन वचन लुकेर वा प्रत्यक्ष

चारास्ते धर्मराजस्य मनुष्याणां शुभाशुभम्। मनोवाक्कायजं कर्म सर्वं जानन्ति तत्त्वतः॥ १२॥
एवं तेषां शक्तिरस्ति मर्त्यामर्त्याधिकारिणाम्। कथयन्ति नृणां कर्म श्रवणाः सत्यवादिनः॥ १३॥
व्रतैर्दानैश्च सत्योक्त्या यस्तोषयति तान्नरः। भवन्ति तस्य ते सौम्याः स्वर्गमोक्षप्रदायिनः॥ १४॥
पापिनां पापकर्माणि ज्ञात्वा ते सत्यवादिनः। धर्मराजपुरः प्रोक्त्वा जायन्ते दुःखदायिनः॥ १५॥

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृतम्॥ १६॥

गरियेको शुभाशुभ कर्म तिनीहरूले चित्र गुप्तलाई बताई दिन्छन्॥ ११॥ धर्मराजका दूतले मनुष्यको कर्म मन वचन शरीरादिले जो छ सम्पूर्ण तत्त्व जान्दछन्॥ १२॥ यस्ता प्रकारको देवतामा मनुष्यको कर्म जान्ने शक्ति छ॥ श्रवणादि मनुष्यको कर्म यथार्थ भनि दिन्छन्, ती सत्यवादि छन्॥ १३॥ व्रत, दान, सत्य, धर्मले तिनलाई जस्ले खुसी गरेका छन्, तिनलाई स्वर्ग मोक्ष दिलाई दिन्छन्॥ १४॥ तिनीहरू जो छन् सो सत्यवादि छन्॥ तिनले पापीहरूको कर्म धर्मराजलाई बताउँछन्। त्यस् बखतमा पापी अति दुःखी हुन जान्छन्॥ १५॥ सूर्य, चन्द्रमा, जल, वायु, अग्नि, आकाश, भूमि, हृदय, यम, दिन, रात्री, सन्ध्या, इ सबै मनुष्यको कर्म साक्षी छन्॥ १६॥ धर्मराज, चित्रगुप्त,

धर्मराजश्चित्रगुप्तः श्रवणा भास्करादयः। कायस्थं तत्र पश्यन्ति पापं पुण्यं च सर्वशः॥ १७॥
एवं सुनिश्चयं कृत्वा पापिनां पातकं यमः। आहूय तान्निजं रूपं दर्शयत्यतिभीषणम्॥ १८॥
पापिष्ठास्ते प्रपश्यन्ति यमरूपं भयंकरम्। दण्डहस्तं महाकायं महिषोपरि संस्थितम्॥ १९॥
प्रलयाम्बुदनिर्घोषं कज्जलाचलसन्निभम्। विद्युत्प्रभायुधैर्भीमं द्वात्रिंशद्भुजसंयुतम्॥ २०॥
योजनत्रयविस्तारं वापीतुल्यविलोचनम्। दंष्ट्राकरालवदनं रक्ताक्षं दीर्घनासिकम्॥ २१॥
मृत्युज्वरादिभिर्युक्तश्चित्रगुप्तोऽपि भीषणः। सर्वे दूताश्च गर्जन्ति यमतुल्यास्तदन्तिके॥ २२॥
तं दृष्ट्वा भयभीतस्तु हाहेति वदते खलः। अदत्तदानः पापात्मा कम्पते क्रन्दते पुनः॥ २३॥

श्रवण भाष्कर आदि जो छन् मनुष्यको शरीर देखीमा पाप पुण्य सबै जान्दछन्॥ १७॥ यस्तो निश्चय गरी यमराज जो छन् पापीलाई बोलाई आफ्नु डरलाग्दो स्वरूप देखाई बक्सिन्छ॥ १८॥ ती पापीहरूले यमराजको त्यो भयंकर डरलाग्दो रूप देख्दछन्, त्यो रूप कस्तो भने भैंसीमा चढेको, ठूलो शरीर हातमा दण्ड लियेको॥ १९॥ प्रलय कालका मेघ जस्ता, विजुलीको जस्तो प्रभाव भयेका, बत्तीस हातले युक्तभयेका, यस्ता॥ २०॥ तीन योजन लामा, पोखरी जस्ता नेत्र भयेका, कालो डरलाग्दो मुख, राता नेत्र, लामु नासिका भयेका, यस्ता॥ २१॥ चित्रगुप्त पनि मृत्युज्वरादिले युक्तभयेका डरलाग्दा सम्पूर्ण दूतहरू पनि गर्जना गर्ने यमैतुल्य देखीने॥ २२॥ पापीहरू जो छन्

ततो वदति तान्सर्वान्क्रन्दमानांश्च पापिनः। शोचत स्वानि कर्माणि चित्रगुप्तो यमाज्ञया॥ २४॥
भोः भोः पापा दुराचारा अहंकारप्रदूषिताः। किमर्थमर्जितं पापं युष्माभिरविवेकिभिः॥ २५॥
कामक्रोधाद्युत्पन्नं सङ्गमेन च पापिनाम्। तत्पापं दुःखदं मूढाः किमर्थं चरितं जनाः॥ २६॥
कृतवन्तः पुरा यूयं पापान्यत्यन्तहर्षिताः। तथैव यातना भोग्याः किमिदानीं पराङ्मुखाः॥ २७॥
कृतानि यानि पापानि युष्माभिः सुबहून्यपि। तानि पापानि दुःखस्य कारणं न च वञ्चना॥ २८॥
मूर्खेऽपि पण्डिते वापि दरिद्रे वा श्रियान्विते। सबले निर्बले वापि समवर्ती यमः स्मृतः॥ २९॥

तिलाई देखेर डरले हाहाकार गरी दान न दिएको हुनाले बारम्बार डरले काँम्दा छँदा॥ २३॥ आफ्नु पाप कर्महरू सम्झी कराउने पापीलाई यमराज चित्रगुप्तका आज्ञाले दूतहरू भन्दछन्॥ २४॥ हे पापी दुराचारि हो! तीमिहरूले अहङ्कारले पाप कमाएको भोग्नै पर्दछ॥ २५॥ हे मूढ हो! काम क्रोधले, दुष्टका सङ्गले कमायेको पाप भनिन्छ॥ २६॥ पैले अति सुखले जो पाप गरेउ त्यो पापको यातना भोग्नै पर्दछ, यस बखत किन पराङ्मुख हुन्छौ॥ २७॥ तीमिहरूले जस्तो जस्तो पाप गरेका छौ, त्यसमाछल कपट हुँदैन, यथार्थ भोग्नु पर्दछ॥ २८॥ ज्ञानी वा मूर्ख, धनी वा निर्धन होस् अथवा बली वा निर्बली होस्, यमराज सबैलाई बराबर देख्दछन्॥ २९॥ चित्रगुप्तको यस्तो वचन सुनि पापीहरू जो छन् आफ्नु गरेको कुकर्म पाप सुनेर निश्चलभई चुपरहनु पर्दछ॥ ३०॥ धर्मराजले पनि चोर जस्ता निश्चल भै रहने

चित्रगुप्तस्येति वाक्यं श्रुत्वा ते पापिनस्तदा। शोचन्तः स्वानि कर्माणि तूष्णीं तिष्ठन्ति निश्चला: ॥ ३० ॥
धर्मराजोऽपि तान्दृष्ट्वा चोरवन्निश्चलान्स्थितान्। आज्ञापयति पापानां शास्ति चैव यथोचिताम् ॥ ३१ ॥
ततस्ते निर्दया दूतास्ताडयित्वा वदन्ति च। गच्छ पापिन्महाघोरान्नरकानतिभीषणान् ॥ ३२ ॥
यमाज्ञाकारिणो दूताः प्रचण्डचण्डकादयः। एकपाशेन तान्बद्ध्वा नयन्ति नरकान्प्रति ॥ ३३ ॥
तत्र वृक्षो महानेको ज्वलदग्निसमप्रभः। पञ्चयोजनविस्तीर्ण एकयोजनमुच्छ्रितः ॥ ३४ ॥
तद्वृक्षे शृंखलैर्बद्ध्वाऽधोमुखं ताडयन्ति ते। रुदन्ति ज्वलितास्तत्र तेषां त्राता न विद्यते ॥ ३५ ॥
तस्मिन्वै शाल्मलीवृक्षे लम्बन्तेऽनेकपापिनः। क्षुत्पिपासापरिश्रान्ता यमदूतैश्च ताडिता: ॥ ३६ ॥

पापीहरूलाई देखी पापीको पापको यथोचित शान्तीको दूतहरूलाई आज्ञा गरिन्छ ॥ ३१ ॥ ती दयाले हीन भयेका दूतहरू जो छन्, पापीलाई ताडना गर्दै भन्दछन्, घोर डरलाग्दा नरकमा हिड ॥ ३२ ॥ यमराजका आज्ञाले प्रचण्ड चण्डक आदि दूतहरू जो छन् एकपाशले बाँधेर पापीलाई नरक तिर लैजान्छन् ॥ ३३ ॥ तहाँ एक ठूलो वृक्ष छ सो वृक्ष कस्तो भने पाँच योजन फैलेको र एक योजन उच्चो अग्निको ज्वाला जस्तो छ ॥ ३४ ॥ ती पापीलाई त्यै वृक्षमा ऊँधोमुख गरी झुण्डाई कुट्दछन्, अग्नि ज्वाला सदृश वृक्षमा अनेक प्रकारले रुँदा रक्षागर्ने कोहि मिल्दैन ॥ ३५ ॥ त्यै शाल्मली वृक्षमा अनेकन् पापी झुण्डीयेका छन्, भोक तृषाले व्याकुल छन् ता पनि यमदूतले कूटी हरेका

क्षमध्वं भोऽपराधं मे कृताञ्जलिपुटा इति। विज्ञापयन्ति तान्दूतान्पापिष्ठास्ते निराश्रया: ॥ ३७ ॥
पुनः पुनश्च ते दूतैर्हन्यन्ते लोहयष्टिभिः। मुद्गरैस्तोमरैः कुन्तैर्गदाभिर्मुसलैर्भृशम् ॥ ३८ ॥
ताडनाच्चैव निश्चेष्टा मूर्च्छिताश्च भवन्ति ते। तथा निश्चेष्टितान्दृष्ट्वा किङ्करास्ते वदन्ति हि ॥ ३९ ॥
भो भो पापा दुराचाराः किमर्थं दुष्टचेष्टितम्। सुलभानि न दत्तानि जलान्यन्नान्यपि क्वचित् ॥ ४० ॥
ग्रासार्द्धमपि नो दत्तं न श्ववायसयोर्बलिम्। नमस्कृता नातिथियो न कृतं पितृतर्पणम् ॥ ४१ ॥
यमस्य चित्रगुप्तस्य न कृतं ध्यानमुत्तमम्। न जप्तश्च तयोर्मन्त्रो न भवेद्येन यातना ॥ ४२ ॥
नापि किञ्चित्कृतं तीर्थे पूजिता नैव देवताः। गृहाश्रमस्थितेनापि हन्तकारोऽपि नोद्धृतः ॥ ४३ ॥

हुन्छन् ॥ ३६ ॥ आश्रयले रहित भयेका पापीहरू दूतहरू सँग हातजोड़ी अपराधको क्षमा माग्दछन् ॥ ३७ ॥ दूतहरूले पापीलाई बारम्बार फलामको लाठो तोमर मुसल गदा आदिले कुट्दछन् ॥ ३८ ॥ कुट पीट भएकाले चेष्टाले रहित मूर्च्छित हुन जान्छन्, मूर्च्छा भयेका पापीलाई देखि दूतहरू भन्दछन् ॥ ३९ ॥ हे पापी! हे दुराचारी हो! हे दुष्ट चित्त भयेका हो! केही मोलै विना हुने आदिको दान पनि केहि गरेनौ ॥ ४० ॥ धर्म कार्यमा कुकुर कागलाई बली दिएनौ न ता आधा ग्रास दासैलाई दियौ, न अतिथि सत्कार, न पितृको तर्पणादि गर्‍यौ ॥ ४१ ॥ यमराज चित्रगुप्तको ध्यान कहिल्यै गरेनौ, तिनको मंत्र पनि जपेनौ जस्ले यातना न होस् भनि ॥ ४२ ॥ कहिल्यै पनि तीर्थ

शुश्रूषिताश्च नो सन्तो भुंक्ष्व पापफलं स्वयम्। यतस्त्वं धर्महीनोऽसि ततः संताड्यसे भृषम्॥ ४४॥
क्षमापराधं कुरुते भगवान् हरिरीश्वरः। वयं तु सापराधानां दण्डदा हि तदाज्ञया॥ ४५॥
एवमुक्त्वा च ते दूता निर्दयं ताडयन्ति तान्। ज्वलदङ्गारसदृशाः पतितास्ताडनादधः॥ ४६॥
पतनात्तस्य पत्रैश्च गात्रच्छेदो भवेत्ततः। तानधः पतितान् श्वानो भक्षयन्ति रुदन्ति ते॥ ४७॥
रुदन्तस्ते ततो दूतैर्मुखमापूर्य रेणुभिः। निबद्ध्य विविधैः पाशैर्हन्यन्ते केऽपि मुद्गरैः॥ ४८॥
पापिनः केऽपि भिद्यन्ते क्रकचैःकाष्ठवद्द्विधा। क्षिप्त्वा चान्ये धरापृष्ठे कुठारैः खण्डशः कृताः॥ ४९॥

यात्रा गरेनौ। न देवताको पूजा गऱ्यौ, गृहस्थाश्रममा रहेर कोई हन्तकार आदिलाई न ता मुष्टीदान दियौ॥ ४३॥ नता साधु सज्जनको सेवा गऱ्यौ, पापको फल भोग। धर्मले हीन भयेकालाई अशुभको ताडना गर्दछौं॥ ४४॥ अपराध क्षमा गर्ने आफैं हरि मात्र छन्। हामीता भगवानका आज्ञाले अपराधीलाई दण्डमात्र दिन्छौं॥ ४५॥ यस्तो भन्दै दयाले रहित भयेका दूतहरूले ताडना गर्दै अग्निका ज्वालामा लगि पापीमाथी गिराउँन जान्छन्॥ ४६॥ गिराउँनाले पापीको शरीर टुक्रा हुन्छ। तल गिरेका पापीलाई कुकुर आदिले खान्छन्। कष्टले तो रुन जान्छन्॥ ४७॥ पापीहरूले मुखबाई रुँदा मुखमा मैला र धूलो हाली दिन्छन्। दूतले अनेक पाशले बाँधि कसैलाई मुद्गरले पीट्दछन्॥ ४८॥ कसैलाई आराले काठ चिरे झैं गरी चीर्दछन्, कसैलाई भूमिमा राखि कोदालाले खन्छन्॥ ४९॥ कोईलाई आधा

अर्ध खात्वाऽवटे केचिद्भिद्यन्ते मूर्ध्नि सायकैः। अपरे यन्त्रमध्यस्थाः पीड्यन्ते चेक्षुदण्डवत्॥ ५०॥
केचित्प्रज्वलमानैस्तु साङ्गारः परितो भृशम्। उल्मुकैर्वेष्टयित्वा च ध्मायन्ते लोहपिण्डवत्॥ ५१॥
केचिद्घृतमये पाके तैलपाके तथा परे। कटाहक्षिप्तवटवत् प्रक्षिप्यन्ते यतस्ततः॥ ५२॥
केचिन्मत्तगजेन्द्राणां क्षिप्यन्ते पुरतः पथि। बद्ध्वा हस्तौ च पादौ च क्रियन्ते केऽप्यधोमुखाः॥ ५३॥
क्षिप्यन्ते केऽपि कूपेषु पात्यन्ते केऽपि पर्वतात्। निमग्नाः कृमिकुण्डेषु तुद्यन्ते कृमिभिः परे॥ ५४॥
वज्रतुण्डैर्महाकाकैगृध्रैरामिषगृध्नुभिः। निष्कुष्यन्ते शिरोदेशे नेत्रे वास्ये च चञ्चुभिः॥ ५५॥

जमीनमा गाड़ी शीरमा बाण हान्दछन्, कसैलाई कोलमा राख उखु पेले झैं पेल्दछन्॥ ५०॥ कसैलाई बलेका अग्निमा जलाउँछन्, कसैलाई शरीरमा काठ बाँधि जलाउँछन्, कोई जलाई लोहाको पिण्ड सदृश बनाउछन्॥ ५१॥ कसैलाई पकाएको कराइमा घिउ तेलमा डुबाई भुट्न जान्छन्॥ ५२॥ कसैलाई बाटामा लगी मत्तहाथीबाट कुल्चाउँछन्, कसैलाई हातपाउ बाँधि ऊँधोमुख गरी झुण्डाउँछन्॥ ५३॥ कोईलाई ईनारमा गिराउँछन्, कोईलाई पर्वतदेखि गिराउँछन्, कोईलाई कृमिकुण्डमा डुबाई, कोईलाई किराले टोकाउँछन्॥ ५४॥ माँसु खाने तिखा चुचा भयेका काग गिद्धले शिर आँखा टुँग्न जान्छन्॥ ५५॥ कोई ऋण खायेकालाई मेरो धन फर्काइदे भनि माग्छन्, यमलोकमा तँलाई

ऋणं वै प्रार्थयन्त्यन्ये देहि सर्व धनं मम। यमलोके मया दृष्टो धनं मे भक्षितं त्वया॥ ५६॥
एवं विवदमानानां पापिनां नरकालये। छित्त्वा संदंशकैर्दूता मांसखण्डान्ददन्ति च॥ ५७॥
एवं संताड्यतान्दूताः संकृष्य यमशासनात्। तामिस्त्रादिषु घोरेषु क्षिप्यन्ते नरकेषु च॥ ५८॥
नरका दुःखबहुलास्तत्र वृक्षसमीपतः। तेष्वस्ति यन्मह दुःखं तद्वाचामप्यगोचरम्॥ ५९॥
चतुरशीतिलक्षाणि नरके सन्ति खेचर। तेषां मध्ये घोरतमा धौरेयास्त्वेकविंशतिः॥ ६०॥
तमिश्रो लोहशंकुश्च महारौरवशाल्मली। रौरवः कुड्मलः कालसूत्रकः पूतिमृत्तिकः॥ ६१॥

भेटें मेरो धन तैले खायेको छ॥ ५६॥ नरकमा यस्तो झगड़ा हुँदा हुँदै दूतले पापीको मासु काटि टुक्रा २ पारि दंशकादिलाई दिन्छन्॥ ५७॥ यस्ता प्रकार दूतले ताडना गरी तामिश्र आदि नरकमा लगी राख्छन्॥ ५८॥ नरक सबैमा दुःख छन् ती भन्दा दुःख वृक्षका नजिकमा जो छ त्यो भन्नमा पनि डरलाग्दो छ॥ ५९॥ हे गरुड! चौरासी लाख नरक छन्, तिनका मध्य एक्काईस नरक मुख्य छन्॥ ६०॥ कुन्कुन् भने तामिश्र १, लोहशंकु २, महारौरव ३, शाल्मली ४, रौरव ५, कुड्मल ६, कालसूत्र ७, पूतिमृत्तिक ८, संघात ९ ॥ ६१॥ लोहितोद १०,

संघातो लोहितोदश्च सविषः संप्रतापनः। महानिरयकाकोलौ संजीवनमहापथौ॥ ६२॥
अवीचिरन्धतामिस्त्रः कुम्भीपाकस्तथैव च। संप्रतापननामेकस्तपनस्त्वेकविंशतिः ॥ ६३॥
नानापीडामयाः सर्वे नाना भेदाः प्रकल्पिताः। नानापाकविपाकश्च किङ्करोघैरधिष्ठिताः॥ ६४॥
एतेषु पतिता मूढाः पापिष्ठा धर्मवर्जिताः। तत्र भुञ्जन्ति कल्पान्तं तास्ता नरकयातनाः॥ ६५॥
यास्तामिस्त्रन्धतामिस्त्रारौरवाद्याश्च यातनाः। भुंक्ते नरो वा नारी वा मिथः संगेन निर्मित्ताः॥ ६६॥
एवं कुटुम्बं बिभ्राण उदरम्भर एव वा। विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशम्॥ ६७॥

सविष ११, संप्रतापन १२, महानिरय १३, काकोल १४, संजीवन १५, महापंथ १६ ॥ ६२॥ अवीचि १७, अन्धतामिश्र १८, कुंभीपाक १९, संप्रतापन २०, तपन २१॥ ६३॥ ई नरकमा अनेक प्रकारका पीडाछन्, अनेक भेदगरी बनाइएका छन्। ती नरकमा दूतहरू अधिष्ठाता छन्॥ ६४॥ ती नरकमा मूढ धर्मले हीनभयेका पापी कल्प २ पर्यन्त बड़ा दुःखले यातना भोग गर्दछन्॥ ६५॥ जो तामिश्र अन्धतामिश्र रौरवआदि नरक छन्। तिनमा पापी पुरुष अथवा स्त्रीहरू परस्परमा कमाएको कर्म भोग्दछन्॥ ६६॥ यस्तो आफ्ना स्त्री पुत्र परिवारको अथवा आफ्नु पेट मात्र भरण गर्ने मानिस शरीर कुटुम्ब छोडेर यस्तो दुःख भोग्दछन्॥ ६७॥ शरीर छोडी एकै

एकः प्रपद्यते ध्वान्तं हित्वेदं स्वं कलेवरम्। कुशलेतरपाथेयो भूतद्रोहेण यद्भृतम्॥ ६८॥
दैवेनासादितं तस्य शमले निरये पुमान्। भुंक्ते कुटुम्बपोषस्य हतद्रव्य इवातुरः॥ ६९॥
केवलेन ह्यधर्मेण कुटुम्बभरणोत्सुकः याति जीवोऽन्धतामिस्त्रं चरमन्तमसः पदम्॥ ७०॥
अधस्तान्नरलोकस्य यावतीर्यातनादयः क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः॥ ७१॥

॥ इति श्रीगरुडपुराणे सारोद्धारे यमयातना निरुपणं नाम तृतीयोध्यायः॥ ३॥

जीवमात्र यमलोकका बाटामा धर्ममात्र सहाय हुन्छ। भूतप्राणीलाई द्रोह गरेर बाटामा सुख हुँदैन॥ ६८॥ त्यो कुटुम्ब पोषण गरेको पाप ईश्वरले पुऱ्यायेको आतुर भएर भोग्दछ, जस्तै द्रव्यादि प्राप्तहुँदा जन खुसी हुन्छन्॥ ६९॥ केवल अधर्मले कुटुम्ब पोषण गरेको छ भने जीव जो छ अन्धतामिश्र नरकमा दुःख भोग्दछ॥ ७०॥ मनुष्य जो छन् इ कहेका नरकमा क्रमैले भोगगरी शुद्ध भयेर मात्र फेरि मनुष्यको जन्मलाई प्राप्त हुन्छन्॥ ७१॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां तृतीयोध्यायः॥ ३॥

ॐ अथ चतुर्थोऽध्यायः ॐ

गरुड उवाच —

कैर्गच्छन्ति महामार्गे वैतरण्यां पतन्ति कैः। कैः पापैर्नरके यान्ति तन्मे कथय केशव॥ १॥

श्रीभगवानुवाच —

सदैवाकर्मनिरताः शुभकर्मपराङ्मुखाः नरकान्नरकं यान्ति दुःखाद्दुःखं भयाद्भयम्॥ २॥
धर्मराजपुरे यान्ति त्रिभिर्द्वारैस्तु धार्मिकाः। पापास्तु दक्षिणद्वारमार्गेणैव व्रजन्ति तत्॥ ३॥
अस्मिन्नेव महादुःखे मार्गे वैतरणी नदी। तत्र ये पापिनो यान्ति तानहं कथयामि ते॥ ४॥

गरुडजी फेरि शोध्नु हुन्छ, हे भगवान्! कस्ता पापी महामार्गमा जान्छन्, कस्ता पापी कुन् नरकमा पर्दछन्, बताइ बक्सियोस्॥ १॥ **भगवान् आज्ञा गर्नु हुन्छ,** हे गरुड! सुन, जो मनुष्य सँधै शुभकर्ममा परांमुख भयेका छन्, त्यस्ता पापी एक दुःखदेखि अर्को दुःख, एक नरकदेखि अर्को नरकमा पर्छन्॥ २॥ धर्मराजका शहरमा तीन मार्गले धर्मात्मा जान्छन्। पापीहरू दक्षिण मार्गले जान्छन्॥ ३॥ यै दुःख दायक बाटामा वैतरणीमा पर्ने कस्ता पापी हुन्छन्, सो भन्छु सुन॥ ४॥ ब्राह्मणघाति, बालघाति, ब्राह्मण भई मदीरा

ब्रह्मघ्नाश्च सुरपाश्च गोघ्ना वा बालघातका:। स्त्री घाती गर्भपाती च ये च प्रच्छन्नपापिन: ॥ ५ ॥
ये हरन्ति गुरोर्द्रव्यं देवद्रव्यं द्विजस्य वा। स्त्रीद्रव्यहारिणो ये च बालद्रव्यहराश्च ये ॥ ६ ॥
ये ऋणं न प्रयच्छन्ति ये वै न्यासापहारका:। विश्वासघातका ये च सविषान्नेन मारका: ॥ ७ ॥
दोषग्राही गुणाश्लाघी गुणवत्सु समत्सरा:। नीचानुरागिणो मूढा: सत्संगतिपराङ्मुखा: ॥ ८ ॥
तीर्थसज्जनसत्कर्मगुरुदेवविनिन्दका: । पुराणवेदमीमांसान्यायवेदान्तदूषका: ॥ ९ ॥
हर्षिता दु:खितं दृष्ट्वा हर्षिते दु:खदायका:। दुष्टवाक्यस्य वक्तारो दुष्टचित्ताश्च ये सदा ॥१० ॥
न शृण्वन्ति हितं वाक्यं शास्त्रवार्तां कदापि न। आत्मसंभाविता: स्तब्धा: मूढा: पडितमानिन: ॥११ ॥

खाने, स्त्री घाति, गर्भपाति, यस्ता डरलाग्दा पाप गर्ने ॥ ५ ॥ गुरुद्रव्य, देवद्रव्य, द्विजद्रव्य, स्त्रीद्रव्य, बालद्रव्य हरण गर्ने, गौ हत्या गर्ने, यस्ता पापी वैतरणी नदीमा पर्दछन् ॥ ६ ॥ जो ऋण लिएको नतिर्ने, नासो राखेको पचाइदिने र विश्वासघात गर्ने, तेस्तै खाने कुरामा विष मिलाई ख्वाएर मार्ने ॥७ ॥ दोष ग्रहण गर्ने, गुणिको निन्दा गर्ने, घमण्डी, नीचको सँग गर्ने, सत्संगले पराङ्मुख भयेका, यस्ता मूढ जो छन् ॥ ८ ॥ तीर्थ, सज्जन, सत्कर्म, गुरु, देवताको निन्दा गर्ने, वेद, मीमांसा, न्याय, वेदान्त, पुराणादिको निन्दा गर्ने ॥ ९ ॥ अर्काको दु:ख देखी सुखी हुने, अर्कालाई दु:ख दिने, अर्काको सुख देख्दा दु:खी हुने, सँधै दुष्ट वचन बोल्ने दुष्ट चित्तभयेको ॥ १० ॥ हित वचन न सुन्ने, शास्त्र पुराणादि पनि न सुन्ने, आफु श्रेष्ठ छु भनि घमण्ड भयेको, मूर्ख घमण्डी आफुलाई आफै ज्ञानी हूँ भन्ने भयेको ॥ ११ ॥

एते चान्ये च बहव: पापिष्ठा धर्मवर्जिता:। गच्छन्ति यममार्गे हि रोदमाना दिवानिशम् ॥ १२ ॥
यमदूतैस्ताड्यमाना यान्ति वैतरणीं प्रति। तस्यां पतन्ति ये पापास्तानहं कथयामि ते ॥ १३ ॥
मातरं येऽवमन्यन्ते पितरं गुरुमेव च। आचार्यं चापि पूज्यञ्च तस्यां मज्जन्ति ते नरा: ॥ १४ ॥
पतिव्रतां साधुशीलां कुलीनां विनयान्विताम्। स्त्रियं त्यजन्ति ये द्वेषाद्वैतरण्यां पतन्ति ते ॥ १५ ॥
सतां गुणसहस्त्रेषु दोषानारोपयन्ति ये। तेष्ववज्ञां च कुर्वन्ति वैतरण्यांपतन्ति ते ॥ १६ ॥
ब्राह्मणाय प्रतिश्रुत्य यथार्थं न ददाति य:। आहूय नास्ति यो ब्रूयात्तयोर्वासश्च संततम् ॥ १७ ॥
स्वयं दत्ताऽपहर्ता च दानं दत्त्वाऽनुतापक:। परवृत्तिहरश्चैव दाने दत्ते निवारक: ॥ १८ ॥

यस्ता धर्मले वर्जीत भयेको पापीहरू रातदिन रूँदैरूँदै यममार्गमा जान्छन् ॥ १२ ॥ यमदूतले कुट्तै-पिट्तैवैतरणीमा लैजान्छन्, ती वैतरणीमा कस्ता पापी पर्दछन् सो भन्छु सुन ॥ १३ ॥ माता, पिता, गुरु, आचार्यादिको निन्दा गर्ने, पूजा नगर्ने, वैतरणीमा पर्दछन् ॥ १४ ॥ जो कुलीन विनयले युक्त भयेकी स्त्रीलाई रिसले त्याग्दछन् ती पनि वैतरणीमा पर्दछन् ॥ १५ ॥ हजार गुण भयेका सज्जनलाई गुणमा दोष दिने, र गुणीलाई अनादर गर्ने वैतरणीमा पर्दछन् ॥ १६ ॥ ब्राह्मणलाई यति दान गर्छु भनि भने बमोजिम न दिने, बोलायेर छैन भन्ने ई दुवैको वैतरणीमानै बास हुन्छ ॥ १७ ॥ दान दियेर आफै हर्ने, दानदिये पछि पछुताउने, परवृत्ति हर्ने, दानदिनेलाई रोक्ने ॥ १८ ॥ र यज्ञमा विघ्न,

ग० यज्ञविध्वंसकश्चैव कथाभङ्गकरश्च यः। क्षेत्रसीमाहरश्चैव यश्च गोचरकर्षकः॥ १९॥ च०
पु० ब्राह्मणो रसविक्रेता यदि स्याद्वृषलीपतिः। वेदोक्तयज्ञादन्यत्र स्वात्मार्थं पशुमारकः॥ २०॥ अ०
ब्राह्मकर्मपरिभ्रष्टो मांसभोक्ता च मद्यपः। उच्छ्रुङ्खलस्वभावो यः शास्त्रध्ययनवर्जितः॥ २१॥
वेदाक्षरं पठेच्छूद्रः कापिलं यः पयः पिबेत्। धारयेद्ब्रह्मसूत्रं च भवेद्वा ब्राह्मणीपतिः॥ २२॥
राजभार्याभिलाषी च परदारापहारकः। कन्यायां कामुकश्चैव सतीनां दूषकश्च यः॥ २३॥
एते चान्ये च बहवो निषिद्धाचरणोत्सुकाः। विहितत्यागिनो मूढा वैतरण्यां पतन्ति ते॥ २४॥

कथाको भङ्ग गर्ने, खेतको सीमाना हर्ने, गाई चर्ने ठाउँमा जोति खेति गर्ने॥ १९॥ ब्राह्मणभै रसबिक्रि गर्ने, पाँच प्रकारका वृषली स्त्री ल्याउने अर्थात् वेश्या, दासी, कुमारी, ऋतुमयी ईनमा एकै मात्र भये पनि, वेद विहित यज्ञ कर्मविना पशु मारी शरीर पोषण गर्ने॥ २०॥ ब्रह्म कर्मले भ्रष्ट भयेको, मासु मदीरादि खाने, शास्त्र आदि न पढ्ने, दुष्ट स्वभाव भयेको ब्राह्मण॥ २१॥ शूद्र भै वेद पढ्ने, कैलागाईको दूधखाने, जनै लाउने, ब्राह्मणी स्त्री ल्याउने, यस्ता वैतरणीमा पर्दछन्॥ २२॥ राजस्त्रीमा अभिलाषा गर्ने, अर्काको स्त्री हर्ने, कन्यामा भोगगर्ने, सतीहरूलाई दोष दिने॥ २३॥ इ सबै दोष गर्ने, अरु अरु वर्जित कर्म गर्ने मूढ पापीहरू वैतरणीमा पर्दछन् र अनेक दुःख

ग० सर्वं मार्गमतिक्रम्य यान्ति पापा यमालये। पुनर्यमाज्ञयाऽगत्य दूतास्तस्यां क्षिपन्ति तान्॥ २५॥ च०
पु० या वै धुरंधरा सर्वधौरियाणां खगाधिप। अतस्तस्यां प्रक्षिपन्ति वैतरण्यां च पापिनः॥ २६॥ अ०
कृष्णा गौर्यदि नो दत्ता नोर्ध्वदेहक्रिया कृता। तस्यां भुक्त्वा महद्दुःखं यान्ति वृक्षं तटोद्भवम्॥ २७॥
कूटसाक्ष्यप्रदातारः कूटधर्मपरायणाः। छलेनार्जनसंसक्ताश्चौर्यवृत्त्या च जीविनः॥ २८॥
छेदयन्त्यतिवृक्षांश्च वनारामविभञ्जकाः। व्रतं तीर्थं परित्यज्य विधवाशीलनाशकाः॥ २९॥
भर्तारं दूषयेन्नारी परं मनसि धारयेत्। इत्याद्याः शाल्मलीवृक्षे भुञ्जते बहुताडनम्॥ ३०॥

भोग्दछन्॥ २४॥ इ सबै भनिएका मार्गको दुःख भोग्दै यमलोक पुगी फेरि यमका आज्ञाले पापीहरूलाई दूतहरूले वैतरणीमा लगी क्षपण गर्दछन्॥ २५॥ हे गरुड! एक्काईश नरक मुख्यछन् ती भोगी पछिबाट वैतरणीमा लगि प्रक्षेपण गर्दछन्॥ २६॥ वैतरणी तर्न कालिगाई दान पनि भएको छैन और देहिक क्रिया पनि भएको छैन जस्को ती वैतरणीमा दुःखभोगी शाल्मली नरकमा जान्छन्॥ २७॥ त्यस नरकमा कस्ता २ जान्छन् भने झूटा साक्षिहुने, कूट कर्मगर्ने, छलचारी जीवन वृत्ति गर्ने॥ २८॥ अति उच्चा वृक्ष काट्ने, बगैंचा फूलवारी त्यस नास्ने, व्रततीर्थ न गर्ने, विधवा स्त्रीको धर्मनाश गर्ने॥ २९॥ स्त्री आफ्ना पतिलाई दोषदियेर परपुरुषलाई मनमा धारण गर्ने इत्यादि

ताडनात्पतितान्दूताः क्षिपन्ति नरकेषु तान्। पतन्ति तेषु ये पापास्तानहं कथयामि ते॥ ३१॥
नास्तिका भिन्नमर्यादाः कदर्या विषयात्मकाः। दम्भिकाश्च कृतघ्नाश्च ते वै नरकगामिनः॥ ३२॥
कूपानां च तडागानां वापीनां देवसद्मनाम्। प्रजागृहाणां भेत्तारस्ते वै नरकगामिनः॥ ३३॥
विसृज्याश्नन्ति ये दाराञ्छिशुन्भृत्यांस्तथा गुरून्। उत्सृज्य पितृदेवेज्यां ते वै नरकगामिनः॥ ३४॥
शंकुभिः सेतुभिः काष्ठैः पाषाणैः कण्टकैस्तथा। ये मार्गमुपरुन्धन्ति ते वै नरकगामिनः॥ ३५॥

पापीहरू शाल्मली (नरक)मा ताडना भोग गर्दछन्॥ ३०॥ यमदूतले पापीलाई कुट्नु पीट्नु गरी नर्कमा क्षपण गर्दछन्, जुन जुन पापी नरकमा पर्दछन् सो भन्छु सुन॥ ३१॥ देवतादि नमान्ने नास्तिक जो परंपरा चलेको धर्म नमान्ने, कदर्यः, धर्मभनेको के हो भन्ने घमण्डी कृतघ्नः, गरेको उपकार नाश गर्ने, यस्ता पापी नरकमा पर्दछन्॥ ३२॥ कुँवा, तलाउ, पोखरी, देवताको मन्दिर नाशने, प्रजा दुःखि जनको घर नाशने यस्ता पापी निश्चय नरकमा जान्छन्॥ ३३॥ जो स्त्री बालक सेवक मान्यजनलाई रिसले न दी एक्लै मीठो पदार्थ खान्छे र जो मनुष्य आफ्ना कुल पितृ देवतालाई मान्दैन, जो आफ्नु स्वजाति बली वैश्वदेव यज्ञादि काम न गरी खाने कुरो खान्छन् यस्ता पापी निश्चय नरक जान्छन्॥ ३४॥ जो मनुष्य बन्धनले, काष्ठले, पत्थरले, काँटोआदिले बाटो रोक्तछन्, निश्चय त्यो नरकमा पर्दछ॥ ३५॥ मन्द

शिवं शिवां हरिं सूर्यं गणेशं सद्गुरुं बुधम्। न पूजयन्ति ये मन्दास्ते वै नरकगामिनः॥ ३६॥
आरोप्य दासीं शयने विप्रो गच्छेदधोगतिम्। प्रजामुत्पाद्य शूद्रायां ब्राह्मण्यादेव हीयते॥ ३७॥
न नमस्कारयोग्यो हि स कदापि द्विजाऽधमः। तं पूजयन्ति ये मूढास्ते वै नरकगामिनः॥ ३८॥
ब्राह्मणानाञ्च कलहं गोयुद्धं कलहप्रियाः। न वर्जन्त्यनुमोदन्ते ते वै नरकगामिनः॥ ३९॥
अनन्यशरणस्त्रीणामृतुकालव्यतिक्रमम् । ये प्रकुर्वन्ति विद्वेषात्ते वै नरकगामिनः॥ ४०॥
येऽपि गच्छन्ति कामान्धा नरा नारीं रजस्वलाम्। पर्वस्वप्सु दिवा श्राद्धे ते वै नरकगामिनः॥ ४१॥

बुद्धिको मनुष्य जो छ शिव गौरी, हरि सूर्य, गणेश गुरुको र सज्जनको पूजा गर्दैन ती निश्चय नरकमा पर्दछन्॥ ३६॥ ब्राह्मणभै दासी स्त्री राख्ने नरकमा जान्छ। शूद्रिणी देखि पुत्र पैदा गर्ने ब्राह्मण निदिन्त भै पछि घोर नरकमा पर्दछ॥ ३७॥ तेस्ता द्विजलाई नमस्कार गर्दा पनि दोष हुन्छ। यो अधमहो, जो यस्ता द्विजकन पूजा गर्छन् ती मूढ हुन् नरकमा पर्दछन्॥ ३८॥ जो ब्राह्मण सँग झगड़ा गर्छन् अथवा ब्राह्मण, गाई र सज्जनको झगड़ा युद्ध न रोकी उत्साह गर्ने नरकमा पर्दछन्॥ ३९॥ जस्को पतिका सिवाय अरु शरण छैन यस्ता स्त्रीलाई ऋतुकाल परेको बेलामा ऋतुदान न गर्ने नरकमा पर्दछन्॥ ४०॥ जो मनुष्य कामान्ध भई रजस्वला स्त्रीमा गमन गर्दछ, पर्वमा, जलमा, दिनमा, श्राद्धका दिन भोग गर्छन् ती निश्चय नरकमा जान्छन्॥ ४१॥ जो जन मलमूत्र अग्निमा, जलमा, बगैंचामा, गोठमा, देवालयमा त्याग गर्दछन्

ग० ये शारीरं मलं वन्हौ प्रक्षिपन्ति जलेऽपिच। आरामे पथि गोष्ठे वा ते वै नरकगामिनः ॥ ४२ ॥ च०

पु० शस्त्राणां ये च कर्तारः शराणां धनुषां तथा। विक्रेतारश्च ये तेषां ते वै नरकगामिनः ॥ ४३ ॥ अ०

चर्मविक्रयिणो वैश्याः शीलविक्रयिकाः स्त्रियः। विषविक्रयिणः सर्वे ते वै नरकगामिनः ॥ ४४ ॥

अनाथं नानुकम्पन्ति ये सतां द्वेषकारकाः। विनाऽपराधं दण्डयन्ति ते वै नरकगामिनः ॥ ४५ ॥

आशया समनु प्राप्तान्ब्राह्मणानर्थिनो गृहे। न भोजयन्ति पाकेऽपि ते वै नरकगामिनः ॥ ४६ ॥

सर्वभूतेष्वविश्वस्तास्तथा तेषु विनिर्दयाः। सर्वभूतेषु जिह्मा ये ते वै नरकगामिनः ॥ ४७ ॥

ती निश्चय नरकमा जान्छन् ॥ ४२ ॥ तरवार आदि हतियार, बाण, धनु, बनाउने अथवा विक्रि गर्ने ती पनि निश्चय नरकमा पर्दछन् ॥ ४३ ॥ छाला बिक्रि गर्ने वैश्य, विष, भग, बिक्री गर्ने सबै निश्चय नरकमा पर्दछन् ॥ ४४ ॥ जो मनुष्य अनाथको आदर गर्दैन, जो सज्जनको द्वेष गर्दछन् र जो अपराध विराम विना दण्ड गर्दछन् ती नरकमा पर्दछन् ॥ ४५ ॥ भोको ब्राह्मण आशाले घरमा आएकालाई आफ्ना शक्ति अनुसार भोजन न दिने ती निश्चय नरकमा जान्छन् ॥ ४६ ॥ सम्पूर्ण भूत प्राणिमा विश्वास न गर्ने, तिनमा दया न राख्ने, सबैमा कुटिल कर्म गर्ने, यस्ता जन निश्चय नरकमा जान्छन् ॥ ४७ ॥ जो सन्ध्या वन्दन, चान्द्रायण आदिको नियम गर्छु भनि प्रतिज्ञा गरी इन्द्रियका विषयमा परि गर्छु भनेको गर्दैन ती नरकमा पर्दछन् ॥ ४८ ॥ विद्यादाता गुरुलाई, पुराण भन्ने पौराणिकलाई न मान्ने अनादर गर्ने इ नरकमा

नियमान्समुपादाय ये पश्चादजितेन्द्रियाः। विग्लापयन्ति तान्भूयस्ते वै नरकगामिनः ॥ ४८ ॥

ग० अध्यात्मविद्यादातारं नैव मन्यन्ति ये गुरुम्। तथा पुराणवक्तारं ते वै नरकगामिनः ॥ ४९ ॥ च०

पु० मित्रद्रोहकरा ये च प्रीतिच्छेदकराश्च ये। आशाच्छेदकरा ये च ते वै नरकगामिनः ॥ ५० ॥ अ०

विवाहं देवयात्रां च तीर्थे सार्थान्विलुम्पति। स वसेन्नरके घोरे तस्मान्नावर्तनं पुनः ॥ ५१ ॥

अग्निं दद्यान्महापापी गृहे ग्रामे तथा वने। स नीतो यमदूतैश्च वह्निकुण्डेषु पच्यते ॥ ५२ ॥

अग्निना दग्धगात्रोऽसौ यदा छायां प्रयाचते। नीयते च तदा दूतैरसिपत्रवनान्तरे ॥ ५३ ॥

खड्गतीक्ष्णैश्च तत्पत्रैर्गात्रच्छेदो यदा भवेत्। तदोचुः शीतलच्छाये सुखनिन्द्रां कुरुष्व भो ॥ ५४ ॥

पर्दछन् ॥ ४९ ॥ मित्र द्रोही, आशा छेदी, अर्काको प्रीति छेदन गर्ने, यस्ता निश्चय नरक जान्छन् ॥ ५० ॥ विवाहको, दैवयात्राको, तीर्थगर्नेको, धन हरणगर्ने पापि जो छन् ती घोर नरकमा पर्दछन्, तेस्ले फेरि नरकदेखि फिर्नु पर्दैन ॥ ५१ ॥ जो पापी घरमा, गाउँमा, पालेका वनमा, आगो डढेलो लाउँछन् तीनलाई यमदूतले अग्निकुण्डमा लगि पकाउँछन् ॥ ५२ ॥ अग्निले जलेर छहारीको ईच्छा गर्दछ तब यमदूतले असीपत्र वनमा लै जान्छन् ॥ ५३ ॥ हतियार जस्ता तीखा पत्रले जब शरीर काटिन्छ तेस बखतमा यमदुत भन्छन्, सुख पूर्वक शयन

पानीयं पातुमिच्छन्वै तृषार्तो यदि याचते। पानार्थं तैलमत्युष्णं तदा दूतैः प्रदीयते ॥ ५५ ॥
पीयतां भुज्यतां पानमन्नमूचुस्तदेति ते। पीतमात्रेण तेनैव दग्धान्त्रा निपतन्ति ते ॥ ५६ ॥
कथञ्चित्पुनरुत्थाय प्रलपन्ति सदीनवत्। विवशा उच्छ्वसन्तश्च ते वक्तुमपि नाशकन् ॥ ५७ ॥
इत्येवं बहुशस्तार्क्ष्य यातनाः पापिनां स्मृताः। किमेतैर्विस्तरात्प्रोक्तैः सर्वशास्त्रेषु भाषितैः ॥ ५८ ॥
एवं वै क्लिश्यमानास्ते नराः नार्यः सहस्रशः। पच्यन्ते नरके घोरे यावदाभूतसम्प्लवम् ॥ ५९ ॥
तस्याक्षयं फलं कृत्वा तत्रैवोत्पद्यते पुनः। यमाज्ञया महीं प्राप्य भवन्ति स्थावरादयः ॥ ६० ॥
वृक्षगुल्मलतावल्लीगिरयश्च तृणानि च। स्थावरा इति विख्याता महामोहसमावृताः ॥ ६१ ॥

गर ॥ ५४ ॥ पिउनकालागि पानि माग्दछन्, दूतले पानीका बदलामा तताएको तेल पियाउँछन् ॥ ५५ ॥ र भन्दछन् लौ खाउ पिउ तब त्यो तताएको तेल खाउँदैमा डढी पापी गीर्न जान्छन्, बड़ा कठिन दुःखले उठी लामु श्वास फेरि बोल्न पनि सक्तैनन् ॥ ५६-५७ ॥ हे गरुड! पापीको दुःख यस्तै यस्ता धेरै छन् अरु शास्त्रमा पनि भनेका छन् तिमीलाई संक्षेपले भनें ॥ ५८ ॥ यस्ता प्रकारको दुःख दायक यम यातना स्त्री पुरुष हजारौं वर्ष जहाँ सम्म पृथ्वी रहन्छीन् तहाँ सम्म नरकमा पाउँछन् ॥ ५९ ॥ त्यो पापको धेरैकाल यातना भोगी फेरि यमका आज्ञाले पृथ्वीमा स्थावरादिमा जन्म हुन्छन्, स्थावरादि के हो भने ॥ ६० ॥ वृक्ष, गुल्म, लता, वल्ली, पर्वत, तृण, फूल, फल र पत्रादिले

कीटाश्च पशवश्चैव पक्षिणश्च जलेचराः। चतुरशीतिलक्षेषु कथिता देवयोनयः ॥ ६२ ॥
एताः सर्वाः परिभ्रम्य ततो यान्ति मनुष्यताम्। मानुषेऽपि श्वपाकेषु जायन्ते नरकागताः ॥
तत्रापि पापचिन्हैस्ते भवन्ति बहुदुःखिताः ॥ ६३ ॥
गलत्कुष्ठाश्च जन्मान्धा महारोगसमाकुलाः। भवन्त्येवं नरा नार्यः पापचिह्नोपलक्षिताः ॥ ६४ ॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नरकप्रदपापचिह्ननिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

ढाकियेको स्थावरादि कहिन्छ ॥ ६१ ॥ कीट, पतङ्ग, पशु-पक्षी, जलचर, माछा, कछूवा आदि गरेका चौरासी लाख योनिमा जन्म हुन्छन् भनि कहियो ॥ ६२ ॥ इ चौरासी लाख योनिमा घुमिसके पछि मनुष्य योनिमा प्राप्त हुन्छन्। मनुष्य भयेता पनि पापकर्मले फेरि नरकैमा जान्छन्, नरकबाट आयेका मनुष्यको पापचिन्ह हुन्छ ॥ ६३ ॥ पापको चिन्ह कस्तो हुन्छ भने गलगण्ड, कुष्ठी, जन्मान्ध, महारोग आदि स्त्री पुरुषका पापको चिन्ह यस्तो हुन्छ ॥ ६४ ॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां चतुर्थोऽध्यायः ॥ ४ ॥

* अथ पञ्चमोऽध्यायः *

गरुड उवाच —

येन येन च पापेन यद्यच्चिह्नं प्रजायते। यां यां योनी च गच्छन्ति तन्मे कथय केशव॥ १॥

श्री भगवानुवाच —

यैः पापैर्यान्ति यां योनिं पापिनो नरकागताः। येन पापेन यच्चिह्नं जायते मम तच्छृणु॥ २॥
ब्रह्महा क्षयरोगी स्याद्गोघ्नः स्यात्कुब्जको जडः। कन्याघाती भवेत्कुष्ठी त्रयश्चण्डालयोनिषु॥ ३॥
स्त्रीघाती गर्भपाती च पुलिन्दो रोगवान्भवेत्। अगम्यागमनात्षण्ढो दुश्चर्मा गुरुतल्पगः॥ ४॥

गरुडजी सोधनु हुन्छ, हे भगवान्! जुन् जुन् पापले जो जो चिन्ह हुन्छ त्यो सब भनि बक्सियोस्॥ १॥ भगवान् आज्ञा गर्नुहुन्छ, हे गरुड! सुन जो जो पापले नरक गै भोगी मनुष्य योनिमा प्राप्त भयी जो जो चिह्न हुन्छ त्यो भन्छु॥ २॥ ब्राह्मघाति क्षयरोगी हुन्छ, गौघाति कुजो र लाटो हुन्छ, कन्या घाति कोढी हुन्छ इ तिनै गौ ब्राह्मण कन्या मार्ने पापी चाण्डाल योनिमा पैदा भई दुःख भोग्दछन्॥ ३॥ स्त्रीघाति, गर्भ पाती, पापी, म्लेक्ष जाति, रोगी हुन्छ, छोरी बुहारी आदिमा गमन गर्ने नपुंसक हुन्छ, गुरु स्त्रीमा गमन गर्ने

मांसभोक्तातिरक्ताङ्गः श्यावदन्तस्तु मद्यपः। अभक्ष्यभक्षको लौल्याद्ब्राह्मणः स्यान्महोदरः॥ ५॥
अदत्वा मिष्टमश्नाति स भवेद्गलगण्डवान्। श्राद्धेन्नमशुचि दत्वा चित्रकुष्ठी प्रजायते॥ ६॥
गुरोर्गर्वेणावमानादपस्मारी भवेन्नरः। निन्दको वेदशास्त्राणां पाण्डुरोगी भवेद्ध्रुवम्॥ ७॥
कूटसाक्षी भवेन्मूकः काणः स्यात्पंक्तिभेदकः। अनोष्ठः स्याद्विवाहघ्नो जन्मान्धः पुस्तकं हरेत्॥ ८॥
गोब्राह्मणपदाघातात्खञ्जः पंगुश्च जायते। गद्गदोऽनृतवादी स्यात्तच्छ्रोता बधिरो भवेत्॥ ९॥
गरदः स्याज्जडोन्मत्तः खल्वाटोऽग्निप्रदायकः। दुर्भगः पलविक्रेता रोगवान्परमांसभुक्॥ १०॥

चर्मरोगी हुन्छ॥ ४॥ नित्य मासु खाने रातो रंगको हुन्छ, मदिरा खाने कालो दाँत भएको हुन्छ, ब्राह्मण भै लोभले अभक्षखाने ठूलो पेट भएको हुन्छ॥ ५॥ कसैलाई न दिई मीठो २ खानेको गाँण हुन्छ, श्राद्धमा अशुची जुठो अन्न ब्राह्मणलाई दियेकोले चित्रकुष्ठी हुन्छ॥ ६॥ गुरुलाई घमण्डले अपमान गर्नेलाई छारे रोग हुन्छ, वेदशास्त्रादिको निन्दागर्ने, निश्चय पाण्डु रोगी हुन्छ॥ ७॥ झुठो साक्षी हुने लाटो हुन्छ, पंक्तिभेद, स्वजाति भेद गर्ने कानु हुन्छ, विवाहमा चुक्लि गरी बिगार्ने बिनाओठको हुन्छ, पुस्तक चोर जन्मान्ध हुन्छ॥ ८॥ गाई ब्राह्मणलाई लातले हान्ने कुजो लंगडो हुन्छ, झुठोबोल्ने भकभके हुन्छ, तेसलाई सुन्ने बहिरो हुन्छ॥ ९॥ विषदिने जडमत्त हुन्छ, डढेलो लाउने तालु खुईलेको हुन्छ, मासु बेच्ने दुर्भग हुन्छ, अर्काको मासुखाने रोगी हुन्छ॥ १०॥ हीरा, मोती आदि नतरत्न चोर्ने हीन चाण्डाल

हीनजातौ प्रजायेत रत्नानामपहारकः। कुनखी स्वर्णहर्ता स्याद्धातुमात्रहरोऽधनः॥ ११॥
अन्नहर्ता भवेदाखुः शलभो धान्यहारकः। चातको जलहर्ता स्याद्विषहर्ता चवृश्चिकः॥ १२॥
शाकं पत्रं शिखी हत्वा गन्धांश्छुच्छुन्दरीशुभान्। मधु दंशः पलं गृध्रो लवणं च पिपीलिका॥ १३॥
ताम्बूलफलपुष्पादिहर्ता स्याद्वानरो वने। उपानत्तृणकार्पासहर्ता स्यान्मेषयोनिषु॥ १४॥
यश्च रौद्रोपजीवी च मार्गे सार्थान्विलुम्पति। मृगयाव्यसनी यस्तु छागः स्याद्वधिकगृहे॥ १५॥
यो मृतो विषपानेन कृष्णसर्पो भवेद्गिरौ। निरंकुशवभावः स्यात्कुंजरो निर्जने वने॥ १६॥

जातिमा जन्मलिन्छ, सुन चोर ने पापि कुनखी हुनेछ, अष्टधातु चोर ने निर्धन हुन्छ॥ ११॥ अन्न चोर मुषो हुन्छ, धान आदि चोर्ने शलह हुन्छ, पानी चोर्ने काकाकूल हुन्छ र नदी आदिको पानी खान पाँउदैन, विष चोर्नेले बिच्छीको जन्म भै दुःख पाउँछ॥ १२॥ शाग पात आदि चोर्ने को मजूरको जन्म हुनेछ, बासना आउँने चीज चोर्ने छुचून्द्रो भै जन्मन्छ, महचोर डाँस हुन्छ, मांसु चोर गिद्ध हुन्छ, नून चोर्नेको कमिला आदि भै जन्म हुन्छ॥ १३॥ पान, फल-फूल आदि चोर्ने घोर जंगलमा वानर भै जन्मन्छ, जूता तृण कपास चोर्ने भेडाको योनिमा पैदा हुनेछ॥ १४॥ डरलाग्दो जीविका गर्ने, बाटामा बसि वटुवा तीर्थयात्रीको धनलुटी खाने र मृगआदि मार्ने पापीले धेरै काल अनेक घरमा बाखो भै रहनुपर्छ॥ १५॥ जो विषखाई मर्दछ त्यो ठूलो पर्वतमा कालो सर्प भई रहन्छ, जो कसैले भनेको मान्दैन त्यो निर्जन वनमा

वैश्वदेवमकर्तारः सर्वभक्षाश्च ये द्विजाः। अपरीक्षितभोक्तारो व्याघ्राः स्युर्निर्जने वने॥ १७॥
गायत्रीं न स्मरेद्यस्तु यो न संध्यामुपासते। अन्तर्दुष्टो वहिः साधुः स भवेद् ब्राह्मणो वकः॥ १८॥
अयाज्ययाजको विप्रः स भवेद्ग्रामसूकरः। खरो वै बहुयाजित्वात्काको निर्मन्त्रभोजनात्॥ १९॥
पात्रे विद्यामदाता च बलीवर्दो भवेद्विजः। गुरुसेवामकर्ता च शिष्यः स्याद्गोखरः पशुः॥ २०॥
गुरुं हुँकृत्य तुंकृत्य विप्रं निर्जित्य वादतः। अरण्ये निर्जले देशे जायते ब्रह्मराक्षसः॥ २१॥
मित्रश्रुतं द्विजे दानमदत्वा जम्बुको भवेत्। सतामसत्कारकरः फेत्कारोऽग्निमुखो भवेत्॥ २२॥

हात्ती हुनेछ॥ १६॥ ब्राह्मण भै वलि वैश्यदेव न गरी खाने अथवा सबै चीज खाने अथवा परीक्षा न गरी खाने ब्राह्मण जंगलमा बाघ भइ रहन्छन्॥ १७॥ गायत्री न जप्ने, सन्ध्याको उपासना न गर्ने, बाहिर साधु अन्तस्करणमा दुष्ट भयेको ब्राह्मण बकुल्लो हुन्छ॥ १८॥ न माग्ने चीज माग्ने ब्राह्मण गाउँको सुगुरभै रहन्छ, धेरै गाउँको पुरोहित अथवा विना निम्ता जाने गधा हुन्छ। मन्त्र विना भोजन गर्ने काग हुन्छ॥ १९॥ पात्रमा न दिई कुपात्रमा विद्या दिने ब्राह्मण गोरुभै रहन्छ, गुरूको सेवा न गर्ने शिष्य गधाभै जन्मन्छ॥ २०॥ गुरूलाई हुँ भनो, ब्राह्मणलाई जिति अपमान गर्ने, ठूलो पानी नभएको जंगलमा ब्राह्मराक्षस भै रहन्छ॥ २१॥ प्रतिज्ञागरी जो ब्राह्मणलाई दान दिँदैन त्यो स्याल हुन्छ, जो सज्जनको हेला गर्दछ जुन्कीरि भै रहन्छ॥ २२॥ मित्रको द्रोह गर्ने पहाड़मा गिद्ध हुन्छ, बिक्रिहुने चीजलाई दोष दिने

ग० पु० मित्रध्रुग्गिरिगृध्रः स्यादुलूकः क्रयवञ्चनात्। वर्णाश्रमपरीवादात्कपोतो जायते वने॥ २३॥ पं० अ०

आशाच्छेदकरो यस्तु स्नेहच्छेदकरस्तु यः। यो द्वेषात्स्त्रीपरित्यागी चक्रवाकश्चिरं भवेत्॥ २४॥

मातृपितृगुरुद्वेषी भगिनीभ्रातृवैरकृत्। गर्भे योनौ निनष्टः स्याद्यावद्योनिसहस्रशः॥ २५॥

श्वश्रोर्गालिप्रदा नारी नित्यं कलहकारिणी। सा जलौका च यूका स्याद्भर्तारं भर्त्सते च या॥ २६॥

स्वपतिं च परित्यज्य परपुंसानुवर्तिनी। वल्गुली गृहगोधा स्याद् द्विमुखी वाथ सर्पिणी॥ २७॥

यः स्वगोत्रोपघाती च स्वगोत्रस्त्रीनिषेवणात्। तरक्षुःशल्लको भुत्वा ऋक्षयोनिषु जायते॥ २८॥

लाटोकोसेरो हुन्छ, आफ्नु अर्काको वर्णाश्रममा दोष दिने परेवा हुन्छ॥ २३॥ आशाकारी स्त्रीको आशा माया तोडी रिसले आफ्नो स्त्री त्याग्ने धेरै काल चखेवा हुनेछ॥ २४॥ माता पिता गुरूहरूको द्वेष गर्ने दाजु भाई बैनीमा वैरिभाव गर्ने पापी हजार पल्ट गर्भमा तुहुने हुन्छ॥ २५॥ नारी जो छन् सासु ससुरालाई गालीगर्ने, सँधै कलह गर्ने, स्वामीलाई धिकार दिने, यस्ता स्त्री जलुका जुका हुन्छे॥ २६॥ आफ्नो पति त्यागी पर पुरुषमा रत हुने स्त्री वल्गुली, गृहगोधा अथवा दोमुख भयेकी सर्पिणी हुन्छे॥ २७॥ स्वगोत्रको उपघात गर्ने, सगोत्री स्त्री ल्याउँने पुरुष जो छन् ती चितुवा, स्याल, भालुको योनिमा जन्मन्छन्॥ २८॥ तामसी स्त्रीमा गमन गर्ने पुरुष मरुदेशमा पिचाश ५६

ग० पु० तामसीगमनात्कामी भवेन्मरुपिशाचकः। अप्राप्तयौवनासङ्गाद्भवेदजगरो वने॥ २९॥ पं० अ०

गुरुदाराभिलाषी च कृकलासो भवेन्नरः। राज्ञीं गत्वा भवेद्दुष्टो मित्रपत्नीं च गर्दभः॥ ३०॥

गुदगो विड्वराहः स्याद्वृषः षस्याद्वृषलीपतिः। महाकामी भवेद्यस्तु स्यादश्वः कामलम्पटः॥ ३१॥

मृतस्यैकादशाहं तु भुञ्जानः श्वाभिजायते। लभेदेवलको विप्रो योनिं कुक्कुटसंज्ञकाम्॥ ३२॥

द्रव्यार्थं देवतापूजां यः करोति द्विजाधमः। स वै देवलको नाम हव्यकव्येषु गर्हितः॥ ३३॥

.महापातकजान्घोरान्नरकान्प्राप्य दारुणान्। कर्मक्षये प्रजायन्ते महापातकिनस्त्विह॥ ३४॥

हुन्छ, अप्राप्त यौवन वाली स्त्रीमा भोग गर्ने अजींगर हुन्छ॥ २९॥ गुरुआमामा गमन गर्ने मनुष्य जो छ तेस्को छेपाराको जन्म हुनेछ, राजस्त्रीमा गमन गर्ने दुष्ट हो, मित्रपत्नी गमन गर्ने गधा हुन्छ॥ ३०॥ गुदद्वारमा मैथुन गर्ने नर्क खाने सुँगूर हुन्छ, वृषलीपति गोरु हुन्छ, अति कामिपुरुष घोड़ा हुन्छ॥ ३१॥ मरेका एघार दिनमा भोजन खाने कुकुर भै जन्मन्छ, देवलक ब्राहाण कुखुरो भै जन्मन्छ॥ ३२॥ धनको इच्छाले अर्काको देवता पूजा गर्ने द्विज अधम हो त्यसैलाई देवलक भन्छन्, देवपितृ कार्यमा त्यो चल्दैन अर्थात्, तनखा लीइ देवपूजा गर्ने ब्राह्मण॥ ३३॥ महापातकी पापी धेरै नरकमा भोगपाई पाप क्षय भयेर यो संसारमा पातकीनै भई जन्मन्छ॥ ३४॥ ब्रह्म हत्या ५७

खरोष्ट्रमहिषीणां हि ब्रह्महा योनिमृच्छति। वृकश्वानशृगालानां सुरापा यान्ति योनिषु॥ ३५॥ पं०
ग० कृमिकीटपतङ्गत्वं स्वर्णस्तेयी समाप्नुयात्। तृणगुल्मलतात्वञ्च क्रमशो गुरुतल्पगः॥ ३६॥ अ०
पु० परस्य योषितं हत्वा न्यासापहरणेन च। ब्रह्मस्वहरणाच्चैव जायते ब्रह्मराक्षसः॥ ३७॥
ब्रह्मस्वं प्रणयाद्भुक्तं दहत्यासप्तमं कुलम्। बलात्कारेण चौर्येण दहत्याचन्द्रतारकम्॥ ३८॥
लोहचूर्णाश्मचूर्णे च विषं च जरयेन्नरः। ब्रह्मस्वं त्रिषु लोकेषु कः पुमाञ्जरयिष्यति॥ ३९॥
ब्रह्मस्वरसपुष्टानि वाहनानि बलानि च। युद्धकाले विशीर्यन्ते सैकताः सेतवो यथा॥ ४०॥

गर्ने भैंसीका योनिमा प्राप्त हुन्छ, मदिरा खाने भेडो, कुकुर, स्याल योनिको हुन्छ॥ ३५॥ सुन चोर कृमि कीट-पतंग हुन्छ, गुरूका विस्तरामा जाने क्रमैले तृण गुल्म लता हुन्छ॥ ३६॥ परस्त्री हरण गर्ने, अर्काको धन राखेको पचाउने, ब्रह्मस्व हरण गर्ने पापी ब्रह्मराक्षसभै जन्मन्छन्॥ ३७॥ ढाँटि छलि कपटले ब्राह्मणको धनखानेको सातकुल जल्दछ, बलात्कारले अथवा चोरि खानेले चन्द्रसूर्य जहाँसम्म रहन्छन् ताहाँसम्म नर्कमा जल्नु पर्दछ॥ ३८॥ लोह चूर्ण खाँदा र विषखाँदा वरू पचला ब्रह्मस्व तीनैलोकमा पचाउँन सकैनन्॥ ३९॥ ५८
जस्ले ब्रह्म अन्नले आफ्नो सेना वाहनलाई पुष्ट गरायेको छ सबै युद्धका समय भागी जान्छन्। जस्तै बालुवाको पूल काम लाग्दैन॥ ४०॥

देवद्रव्योपभोगेन ब्रह्मस्वहरणेन च। कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च॥ ४१॥ पं०
ग० स्वमाश्रितं परित्यज्य वेदशास्त्रपरायणम्। अन्येभ्यो दीयते दानं कथ्यतेऽयमतिक्रमः॥ ४२॥ अ०
पु० ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते। ज्वलंतमग्निमुत्सृज्य नहि भस्मनि हूयते॥ ४३॥
अतिक्रमे कृते तार्क्ष्य भुक्त्वा च नरकान्क्रमात्। जन्मान्धः सन्दरिद्रः स्यान्न दाता किंतु याचकः॥ ४४॥
स्वदत्तां परदत्तां वा योरेच्च वसुन्धराम्। षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥ ४५॥
स्वयमेव च यो दत्त्वा स्वयमेवापकर्षति। स पापी नरकं याति यावदाभूतसंप्लवम्॥ ४६॥

देवद्रव्य ब्रहास्व हरण गरी भोगने मनुष्यको कुलै नाश भई अतिक्रम निःसन्तान हुन्छ॥ ४१॥ स्वजातिमा रहि वेद शास्त्र पढेका ब्राह्मणमा दान न दी अरुमा दान दिने अतिक्रम कहिन्छ॥ ४२॥ न पढेका भये पनि ब्राह्मण अतिक्रम हुदैनन्, तर पढेका ब्राह्मण बल्दा अग्निहुन्, न पढेका भस्ममात्र हुन्, र भस्ममा होम गर्दैनन्॥ ४३॥ हे गरुड! अतिक्रममा दान गऱ्यो भने नरक भोग्नु पर्दछ। जन्मान्ध दरिद्र हुन्छ। त्यो दाता हुँदैन किन्तु याचक हुन्छ॥ ४४॥ आफुले दियेको अथवा अर्काले दियेको भूमि हरे साठी हजार वर्ष सम्म विष्ठाको कीरो ५९
हुन्छ॥ ४५॥ आफुले दान दिई आफैंले हरण गर्ने पापी जहाँ सम्म पृथिवी प्रलय हुन्नन् तहाँ सम्म नरकमा जान्छ॥ ४६॥ भूमिदान वृत्तिदान

दत्त्वा वृत्तिं भूमिदानं यत्नतः परिपालयेत्। न रक्षति हरेद्यस्तु सर्पगुःश्वाभिजायते॥ ४७॥
विप्रस्य वृत्तिकरणे लक्षधेनुफलं भवेत्। विप्रस्य वृत्तिहरणान्मर्कटः श्वाकपिर्भवेत्॥ ४८॥
एवमादीनि चिह्नानि योनयश्च खगेश्वर। स्वकर्मविहिता लोके दृश्यन्तेऽत्र शरीरिणाम्॥ ४९॥
एवं दुष्कर्मकर्तारो भुक्त्वा निरययातनाम्। जायन्ते पापशेषेण प्रोक्तास्वेतासु योनिषु॥ ५०॥
ततो जन्मसहस्रेषु प्राप्य तिर्यक्शरीरिताम्। दुःखानि भारवहनोद्भवादीनि लभन्ति ते॥ ५१॥
पक्षिदुःखं ततो भुक्त्वा वृष्टिशीतातपोद्भवम्। मानुषं लभते पश्चात्समीभूते शुभाशुभे॥ ५२॥
स्त्रीपुंसोस्तु प्रसंगेन भूत्वा गर्भे क्रमादसौ। गर्भादिमरणान्तं च प्राप्य दुःखं म्रियेत्पुनः॥ ५३॥

दियेर यत्नले पालन गर्नु। पालन न गरि आफैं खोस्छ भने लंगडो कुक्कुर हुँनेछ॥ ४७॥ विप्रलाई वृत्ति दिनाले लाख गौदानको फल मिल्दछ, ब्राह्मणको वृत्ति हर्नाले बानर कुक्कुर हुन्छ॥ ४८॥ हे गरुड! ई सम्पूर्ण योनि चिह्न जो छन् सो आफ्ना २ कर्मले लोकमा शरीर धारण गरेका देखिन्छन्॥ ४९॥ यस्ता पापिहरू नरक यातना भोग गरेर पाप शेष भये पछि पशुआदिको जन्मलिन जान्छन्॥ ५०॥ हजार जन्म सर्प आदिको जन्म भै गाई भैंसीको जन्म हुन्छ र भारि बोकी दुःख भोग्दछ॥ ५१॥ त्याहाँदेखि पक्षी आदिको जन्म हुन्छ, वर्षा घामको दुःख भोगी पछि बाट शुभाशुभ गर्भ वास भयेर मनुष्य चोला पाउँछ॥ ५२॥ स्त्री पुरुषका प्रसंगले गर्भ वास रहि गर्भदेखि मरण

समुत्पत्तिर्विनाशश्च जायते सर्वदेहिनाम्। एवं प्रवर्तितं चक्रंभूतग्रामे चतुर्विधे॥ ५४॥
घटीयन्त्रं यथा मर्त्या भ्रमन्ति मम मायया। भूमौ कदाचिन्नरके कर्मपाशसमावृताः॥ ५५॥

अदत्तदानाच्च भवेद्दरिद्रो दरिद्रभावाच्च करोति पापम्।
पापप्रभावान्नरकं प्रयाति पुनर्दरिद्रः पुनरेव पापी॥ ५६॥

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि॥ ५७॥

॥ इति श्रीगरुडपुराणे सारोद्धारे पापचिह्ननिरूपणं नाम पञ्चमोऽध्यायः॥ ५॥

पर्यन्त दुःखमात्र भोगी आखिर दुःखैले मर्दछ॥ ५३॥ सम्पूर्ण प्राणिको उत्पत्ति नाश होई रहन्छ, चार प्रकारका उत्पत्ति छन्, अण्डज, स्वेदज, उद्भिज, जरायुज, ईनैमा चक्र झैं घुमी रहन्छन्॥ ५४॥ जो जीव पुरुष मेरो मायाका कर्म रूपि डोरिले बाँधियेका छन् ती कैले पृथ्वीमा कैले नर्कमा चक्रमा परेझैं घुम्दछन्॥ ५५॥ दान न दियेको हुनाले अथवा अदत्त कुपात्रमा दान गर्नाले दरिद्र हुन्छ, दरिद्र भयेर पापि हुन्छ, पापले नरक जान्छ, फेरि दरिद्री भै पापि हुन्छ, र फेरि पनि नरकैमा जान्छ॥ ५६॥ अवश्यमेव आफुले गरेको शुभाशुभकर्म भोग्नु पर्दछ, सयकोटि कल्पसम्म पनि कर्म भोग्नु पर्दछ भनि भगवानले गरुडलाई बताईयो॥ ५७॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां पञ्चमोऽध्यायः॥ ५॥

* अथ षष्ठोऽध्यायः *

गरुड उवाच —

कथमुत्पद्यते मातुर्जठरे नरकागतः। गर्भादिदुःखं यद्भुंक्ते तन्मे कथय केशव॥ १॥

विष्णुरुवाच —

स्त्रीपुंसोस्तु प्रसंगेन निरुद्धे शुक्रशोणिते। यथायं जायते मर्त्यस्तथा वक्ष्याम्यहं तव॥ २॥
ऋतुमध्ये हि पापानां देहोत्पत्तिः प्रजायते। इन्द्रस्य ब्रह्महत्यास्ति यस्मिंस्तस्मिन्दिनत्रये॥ ३॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी। तृतीये रजकी ह्येता नरकागतमातरः॥ ४॥

गरुडजी फेरि सोध्नु हुन्छ, हे भगवान्! नरकबाट आएका मनुष्यको गर्भ कसरि हुन्छ, गर्भदेखि मरण पर्यन्त कस्तो-कस्तो दुःख भोग्दछन्, त्यो सबै भनिबक्सियोस्॥ १॥ **भगवान् आज्ञा गर्नुहुन्छ,** हे गरुड! भन्छु सुन, स्त्री पुरुष संयोग भयेर रजवीर्यको गर्भरहन्छ र मनुष्यहरूको जन्म हुन्छ॥ २॥ स्त्री ऋतुमति हुँदा तिन्मा चार दिन ब्रह्महत्याको पाप रहन्छ, तिन दिन भित्र जो गर्भाश्रय हुन्छ ती नरकबाट आएका पापिहुन्। ब्रह्महत्या पाप कस्तो भने, पैले बृत्रासुर दैत्य ब्रह्मकुलको थियो। त्यसलाई इन्द्रले मार्दा ब्रह्महत्या पाप लाग्यो र सोहि पाप ऋतुमती स्त्रीहरुमा राखेको छ॥ ३॥ स्त्रीमा ऋतु भयेको पैलो दिन चाण्डाली, दोस्रोदिन ब्रह्मघातिनी, तेस्रोदिन

कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये। स्त्रियाः प्रविष्ट उदरं पुंसो रेतः कणाश्रयः॥ ५॥
कललं त्वेकरात्रेण पञ्चरात्रेण बुद्‌बुदम्। दशाहेन तु कर्कन्धूः पेश्यंण्डं वा ततः परम्॥ ६॥
मासेन तु शिरो द्वाभ्यां बाह्वङ्गाद्यङ्गविग्रहः। नखलोमास्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभिः॥ ७॥
चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः। षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे॥ ८॥
मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते। शेते विण्मूत्रयोर्गर्ते स जन्तुर्जन्तुसंभवे॥ ९॥

धोबिनी समान हुन्छन्, नर्कबाट आयेका आत्मा तिनै हुन्॥ ४॥ ईश्वरको मायाले जीव जो छ पूर्व कर्मका वासनाले पुरुषका वीर्यद्वारा स्त्रीका गर्भमा प्रवेश भै गर्भ रहन्छ॥ ५॥ गर्भमा एक रात्रिमा कलल हुन्छ, पाँच रात्रीमा बुद्‌बुद हुन्छ, दशरात्रीमा एक मासुको पिण्ड बन्दछ, यस प्रकारले पापिहरुको गर्भाश्रयमा जो पापिहुन् ऋतुभयेका तीन दिनैमा गर्भ रहि जन्म लिन्छन्॥ ६॥ ताहाँदेखि एक मैनामा शरीरको आकार बन्दछ, एस्तै प्रकारले दुई मैनामा हातपाउ आदिको चिह्न बन्न जान्छ, तीन मैनामा हाड मांसु नसा नङ् कान नाक आंखा आदि छिद्रहरू बन्न जान्छन्॥ ७॥ चार मैनामा सातधातुले युक्त भयाको हुन्छ, पाँच मैनामा भोक तृषाले युक्त हुन्छ, छ मैनामा सम्पूर्ण शरीर तयार भै माताका दक्षिण कोखामा घुम्फिर गर्ने हुन्छ॥ ८॥ छ मैनादेखि आमाले खाएको अन्न पानी आदिको रस खाई सम्पूर्ण धातुले युक्त भै मांसु रक्तादिले युक्त भयेर मलमूत्रमा सुतेको रहेछु भन्ने ज्ञानभइ, पूर्व कर्मको वासनाको पनि तेसलाई ज्ञान हुन्छ॥ ९॥

ग० पु०

कृमिभिः क्षतसर्वांगः सौकुमार्यात्प्रतिक्षणम्। मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः॥ १०॥
कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरूल्बणैः। मातृभुक्तैरूपस्पृष्टः सर्वांगोत्थितवेदनः॥
उल्बेन संवृतस्तस्मिन्नन्त्रैश्च बहिरावृतः॥ ११॥
आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः। अकल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे॥ १२॥
तत्र लब्धस्मृतिर्दैवात्कर्मजन्मशतोद्भवम्। स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते॥ १३॥
नाथमान ऋषिर्भीतः सप्तवधिः कृताञ्जलिः। स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः॥ १४॥

पू० अ०

सर्वाङ्ग शरीर पूराभय र पनि गर्भमा कीराले सम्पूर्ण शरीरमा पीडा दिन्छन्। भोक तृषाले पीडित भयेको छँदो सुकुमार हुनाले कहिले मूर्छा कहिले चेष्टा गरी बारंबार दुःख भोग्दछ। हे गरुड! गर्भवासमा अती दुःख छ॥ १०॥ आमाले खायेको पीरो तातो नुनीलो अमीलो आदिको रसले त्यो गर्भको बालकलाई अति कष्ट हुन जान्छ र बाहिर आउनाको इच्छा गर्दछ, तर के गरोस्, जरायुले बाँधिएको हुन्छ॥ ११॥ सो बालको शरीर दाहिने काखामा, पृष्ठ कुम पिंजराको पक्षी समान थिचीएको चटपटाउन खोज्दछ, तर के गरोस् बाँधिएको छ॥ १२॥ वहाँ देवता देखि पूर्व जन्मको स्मृति पायेको छँदो सय जन्म सम्मको ज्ञान पायेर दुःखले ठूलो साँस फेर्दो छँदो सुख कैले पनि पाउँदैन॥ १३॥ नाथमान स्थापना गर्ने ऋषि जो छन् समदर्शी छन्, सप्तधातुले युक्तभयेको जीव जो छ डरले अञ्जली बाँधि स्तुति गर्दछ,

ग० पु०

आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः। नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः॥ १५॥

जीव उवाच —

श्रीपतिं जगदाधारमशुभक्षयकारकम्। व्रजामि शरणं विष्णुं शरणागतवत्सलम्॥ १६॥
त्वन्मायामोहितो देहे तथा पुत्रकलत्रके। अहं ममाभिमानेन गतोऽहं नाथ संसृतिम्॥ १७॥
कृतं परिजनस्यार्थे मया कर्म शुभाशुभम्। एकाकी तेन दग्धोऽहं गतास्ते फलभागिनः॥ १८॥
यदि योन्या प्रमुच्येऽहं तत्स्मरिष्ये पदं तव। तमुपायं करिष्यामि येन मुक्तिं व्रजाम्यहम्॥ १९॥

पू० अ०

जस्मा गर्भको दुःख॥ १४॥ सात मैना देखि पाएको छ, पूर्वजन्मको स्मृति जसले, यस्तो सूतिका वायुले कम्पाएको छँदो गर्भमा स्तुति गर्न आरम्भ गर्दछ॥ १५॥ जीव जो छ भगवानको स्तुति गर्दछ, श्रीका पति जगत्का आधार भएका अशुभको नाश गर्ने हजुरको शरण परें॥ १६॥ हे शरण वत्सल! हजुरका मायाले मोह भै मेरो स्त्री पुत्र धन धान्य अहंकारले संसारमा, हे नाथ! प्राप्त भयो॥ १७॥ कुटुम्बादि पालन गर्न अनेक शुभाशुभ कर्म गरें, त्यै कर्मले गर्दा मृतभै एक्लै डढेर कर्म पनि एक्लै भोग्नु पर्‍यो॥ १८॥ यदि मैले यस योनिदेखि मुक्तहुन पाये हजुरको तपस्या गरी हजुरका पाउमा पर्नेछु अथवा हजुरलाई पाउन मुक्तिको उपाय गर्नेछु॥ १९॥ मैला र मूत्रमा डुबेको छु,

विण्मूत्रकूपे पतितो दग्धोऽहं जठराग्निना। इच्छन्नितो विवसितुं कदा निर्यास्यते बहिः॥ २०॥
येनेदृशं मे विज्ञानं दत्तं दीनदयालुना। तमेव शरणं यामि पुनर्मे माऽस्तु संसृतिः॥ २१॥
न च निर्गन्तुमिच्छामि बहिर्गर्भात्कदाचन। यत्र यातस्य मे पापकर्मणा दुर्गतिर्भवेत्॥ २२॥
तस्मादत्र महद्दुःखे स्थितोऽपि विगतक्लमः। उद्धरिष्यामि संसारादात्मानं ते पदाश्रयः॥ २३॥

श्रीभगवानुवाच —

एवं कृतमतिर्गर्भे दशमास्यः स्तुवनृषिः। सद्यःक्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः॥ २४॥
तेनावसृष्टः सहसा कृत्वावाक्छिर आतुरः। विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः॥ २५॥

जठराग्नीले डढेर सारै पीडा भई बाहिर निस्कन इच्छा गर्छु, हे भगवान्! मलाई पैदा गराई बक्सियोस् मलाई अब देखि पाप कर्म गर्ने छैन, यो ज्ञान यो॥ २०॥ यस्तो सम दृष्टि ज्ञान मलाई जस्ले दियो ती महापुरुषलाई नमस्कार गर्दछु, हे दीनदयालु! दयालु! म तिम्रा शरणमा परेको छु, यो ज्ञान नाश न होस्॥ २१॥ हे देवी! गर्भदेखि निस्कनको इच्छा छैन, कारण, मलाई जहाँ जानु छ त्यहाँ पनि त मेरो दुर्गतिनै हुने देखिन्छ॥ २२॥ तेस्कारण गर्भवास पनि दुःखै छ, बाहिर भये पछि यो जीवात्मालाई अवश्य उद्धार गर्नेछु॥ २३॥ **श्री भगवान् आज्ञा** गर्नुहुन्छ, यस्तो स्तुती गर्दै दशमैना पूर्णभई सूतिका वायुले प्रेरणा गरियेको त्यो गर्भजीव जो छ गर्भदेखि पैदा हुन्छ॥ २४॥ तेस्बेला उँधो

पतितो भुवि विण्मूत्रे विष्ठाभूरिव चेष्टते। रोरूयति गते ज्ञाने विपरीतां गतिं गतः॥ २६॥
गर्भे व्याधौ श्मशाने च पुराणे या मतिर्भवेत्। सा यदि स्थिरतां याति को न मुच्येत बन्धनात्॥ २७॥
यदा गर्भाद् बहिर्याति कर्म भोगादनन्तरम्। तदैव वैष्णवी माया मोहयत्येव पूरुषम्॥ २८॥
स तदा मायया स्पृष्टो न किंचिद्वदतेऽवशः। शैशवादिभवं दुःखं पराधीनतयाऽश्नुते॥ २९॥
परच्छन्दं न विदुषा पुष्यमाणो जनेन सः। अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः॥ ३०॥
शायितोऽशुचिपर्यङ्के जन्तुस्वेदजदूषिते। नेशः कण्डूयनेऽङ्गानामासनोत्थानचेष्टने॥ ३१॥

शीर भई छिटै विचेत भै पैलेको ज्ञान नाँश भई स्वास पनि बन्द भई पैदा हुन्छ॥ २५॥ पृथ्वीमा मैला मूत्रमा कीरा झैं गिरेको छँदो पैलेको ज्ञान नाँश भई रुँदामा विपरीत हुन जान्छ, अर्थात् ज्ञान बिर्सन्छ॥ २६॥ गर्भमा, व्याधिले ग्रस्त भयेमा, श्मशानमा, पुराण सुन्दा जो ज्ञान हुन्छ सो ज्ञान स्थिर भएमा को मुक्त हुने थिएन॥ २७॥ जुन् बखतमा गर्भदेखि बाहीर हुन्छ तब कर्मको भोग भोग्नु पर्दछ, जहाँ जन्म्यो तहाँ फेरि वैष्णवी मायाले पुरुषहरुकन मोह गराउँछे॥ २८॥ त्यो बालक मायाद्वारा मोहित भई जान्छ, तब तेस्ले पराधिन भएर बालक अवस्थाको दुःख भोग्दछ, हे गरुड! जो पापी मनुष्य छ, तेस्लाई कैले पनि सुख हुँदैन॥ २९॥ बालकको दुःख कस्तो भने अर्काको अभिप्रायको ज्ञान पनि जान्दैन, जस्ले पालन गर्‍यो उसैलाई आफ्नु ठान्ने अरु दुःखसुख केहि कुरा जान्दैन॥ ३०॥ जीवको बालक अशुद्ध शय्यामा सुति कीरा

तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः। रुदन्तं विगतज्ञानं कृमयः कृमिकं यथा॥ ३२॥
इत्येवं शैशवं भुक्त्वा दुःखं पौगण्डमेव च। ततो यौवनमासाद्य याति संपदमासुरीम्॥ ३३॥
तदा दुर्व्यसनासक्तो नीचसंगपरायणः। शास्त्रतत्पुरुषाणां च द्वेष्टा स्यात्कामलम्पटः॥ ३४॥
दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः। प्रलोभितः पतत्यन्धे तमस्यग्नौ पतंगवत्॥ ३५॥

कुरङ्गमातङ्गपतङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च।
एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्च॥ ३६॥

आदिले टोक्यो भने पनि कराउन उठ्न चेष्टागर्न न सक्ने खालि रोई मात्र रहन्छ॥ ३१॥ डाँस लामखुट्टे झींगा आदिले खाँदा पनि रोई रहँदो ज्ञान नाश भई मैला मुत्रले किरो समान भै रहन्छ॥ ३२॥ यस्ता प्रकारको बालक अवस्थाको दुःख भोगी फेरि पौगण्ड अवस्थाको दुःख भोग्दछ, त्यहाँदेखि यौवनमा प्राप्तभई आसुरी मदले दम्भ दर्प अभिमानमा प्राप्त हुन्छ॥ ३३॥ त्यहाँदेखि यौवनमा दुर्व्यसनमा आसक्त भई नीचको सँग गर्ने, सज्जन सत्शास्त्रको निन्दा र द्वेष गर्ने, काममा अति लम्पट हुन्छ॥ ३४॥ देव माया स्त्रीहरूलाई देखा ती स्त्रीहरूका कटाक्षले इन्द्रियका बसपरि जस्तै बत्तिमा पुतली गीर्दछन् अन्धकारमा गीर्न जान्छ॥ ३५॥ हरिण हातो पुतली भुँवरा माछा एक एक विषयले मर्दछन् भने, मनुष्यता पाँचै विषयमा इन्द्रिय लगायेको हुन्छ, त्यो किन न गिरोस् अवश्य नास हुन्छन्॥ ३६॥

अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः। सह देहेन मानेन वर्धमानेन मन्युना॥ ३७॥
करोति विग्रहं कामी कामिष्वन्ताय चात्मनः। बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा॥ ३८॥
एवं यो विषयासक्त्या नरत्वमति दुर्लभम्। वृथा नाशयते मूढस्तस्मात्पापतरो हि सः॥ ३९॥

जातीशतेषु लभते भुवि मानुषत्वं तत्रापि दुर्लभतरं खलु भो द्विजत्वम्।
यस्तत्र पालयति लालयतीन्द्रियाणि तस्यामृतं क्षरति हस्तगतं प्रमादात्॥ ४०॥

ईच्छा माफिक धन र कामिनी स्त्री आदिको सुख न पाउने अज्ञानदेखि ढाकिएको मूर्ख जो छ कोपले आकूल भई रिसाउँछ, यै क्रोधका साथले उमेर पूरा गराउँछ॥ ३७॥ आफ्नु अहित हुने कामनामा अती लोभि भई अर्काको स्त्री हरण गर्छ र मर्नू पर्छ, जस्तै विषयाशक्त साना हातीलाई बलीया हातिले मार्दछ॥ ३८॥ जो मनुष्य विषयमा आशक्तभई यो पाई न सक्नु चोलाको नाश गर्छ ती मूढ हुन, व्यर्थै नाश हुन्छन्, तीनैलाई पापी भन्नु पर्छ॥ ३९॥ पशु आदि सत जाति मध्ये मनुष्यको चोला उत्तम हो, यस चोलामा भगवानको नाम नित्य जपनाले मुक्ति मिल्नेछ, तेस्ता पनि द्विज हुनुता झन् दुर्लभ छ। हातमा आयेको अमृत फाली स्त्री पुत्रादिको लालन पालन गर्नु व्यर्थै

ततस्तां वृद्धतां प्राप्य महाव्याधिसमाकुलः। मृत्युं प्राप्य महद्दुःखं नरकं याति पूर्ववत्॥ ४१॥
एवं गतागतैः कर्मपाशैर्बद्धाश्च पापिनः। कदापि न विरज्यन्ते मम मायाविमोहिताः॥ ४२॥
इति ते कथिता ताक्ष्र्य पापिनां नारकी गतिः। अन्त्येष्टिकर्महीनानां किं भूयः श्रोतुमिच्छसि॥ ४३॥

॥ इति श्रीगरुडपुराणे सारोद्धारे पापिजन्मादिदुःखनिरूपणं नाम षष्ठोऽध्यायः॥ ६॥

हो॥ ४०॥ त्यहाँदेखि तरुणावस्था भोगी वृद्ध भई महाव्याधिरोगले आकुल भई मृत्युमा प्राप्त हुन्छन्। पैले भनिएका दुःखदायक नर्कमा पैले भोगेकानै झैं यातना भोग्न जान्छन्॥ ४१॥ यस्तै प्रकारले कैले नरकमा कैले पृथ्वीमा घुम्दछन्। पापिहरु मेरा मायाले बाँधिएका छँदा कैले पनि विरक्त भई मुक्त हुँदैनन्॥ ४२॥ हे गरुड! अती पापी नरक गई यम यातना भोग्ने कुरा कहें, ती कस्ताले भोग्नुपर्छ भने, जस्को अन्त्येष्टि कर्म भएको छैन, तिनैको यो दुःख भनियो, अब के सुन्नेको इच्छा छ भन॥ ४३॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां षष्ठोऽध्यायः॥ ६॥

❋ अथ सप्तमोऽध्यायः ❋

सूत उवाच —

इति श्रुत्वा तु गरुडः कम्पितोऽश्वत्थपत्रवत्। जनानामुपकारार्थं पुनः पप्रच्छ केशवम्॥ १॥

गरुड उवाच —

कृत्वा पापानि मनुजाः प्रमादाद्बुद्धितोऽपि वा। न यान्ति यातना याम्याः केनोपायेन कथ्यताम्॥ २॥
संसारार्णवमग्नानां नराणां दीनचेतसाम्। पापोपहतबुद्धीनां विषयोपहतात्मनाम्॥ ३॥
उद्धारार्थं वदस्वामिन्पुराणार्थविनिश्चयम्। उपायं येन मनुजाः सद्गतिं यान्ति माधव॥ ४॥

सूतजी भन्नु हुन्छ — हे शौनकादि हो! सुन यस्तो डरलाग्दो कुरा सुन्दा गरुड अति डराई सम्पूर्ण जनको उपकारका निमित्त भगवानसँग फेरि सोद्धा भये॥ १॥ गरुडजी सोध्नु हुन्छ, जानि न जानि मनुष्यले गरेको पाप जो छ त्यो पापको यातना न भोग्ने कोहि उपाय छ भने कहिबक्सियोस्॥ २॥ सन्साररूपि समुद्रमा डुबेका दुःखि मनुष्यहरूको निश्चय चित्त न भएको विषय रूपि पापमा आत्मालाई नाश गर्दछन्॥ ३॥ हे स्वामिन्! निश्चयगरि पुराणादि विचार गरी उद्धार हुने उपाय बताई बक्सियोस्। हे माधव! जुनकर्मले

श्रीभगवानुवाच —

साधु पृष्टं त्वया तार्क्ष्य मानुषाणां हिताय वै। शृणुष्वावहितो भूत्वा सर्वं ते कथयाम्यहम्॥ ५॥
दुर्गतिः कथिता पूर्वमपुत्राणां च पापिनाम्। पुत्रिणां धार्मिकाणां तु न कदाचित्खगेश्वर॥ ६॥
पुत्रजन्मनिरोधः स्याद्यदि केनापि कर्मणा। तदा कश्चिदुपायेन पुत्रोत्पत्तिं प्रसाधयेत्॥ ७॥
हरिवंशकथां श्रुत्वा शतचण्डीविधानतः। भक्त्या श्रीशिवामाराध्य पुत्रमुत्पादयेत्सुधीः॥ ८॥
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा॥ ९॥
एकोऽपि पुत्रो धर्मात्मा सर्वं तारयते कुलम्। पुत्रेण लोकाञ्जयति श्रुतिरेषा सनातनी॥ १०॥

सद्गतिमा जान्छन्॥ ४॥ **भगवान् आज्ञा गर्नुहुन्छ**—साधुमाश्रेष्ठ हे गरुड! मनुष्यको हित हुने उपाय बताउँछु सुन॥ ५॥ हे खगेश्वर! अपुत्र पापीहरुको दुर्गति पैले तिमीलाई भने जस्का पुत्र छैनन् अन्त्येष्टि र देहिक क्रिया भएको छैन, तिन्को दुर्गति हुन्छ। जो पुत्र भएका वा धर्मात्मा नर छन् तिन्को कदाचित् दुर्गति हुँदैन॥ ६॥ कोई धर्म कर्म गरेर पनि पुत्र हुने उपाय गर्नुपर्छ। कति गर्दा पनि पुत्र जन्मेन भने उपाय बताउँछु सुन॥७॥ सन्तान उत्पत्तिका निमित्त हरिवंश कथा सुन्नु, विधिपूर्वक शतचण्डीपाठ गराउँनु, भक्तिपूर्वक शिवजीको आराधना गरेर पनि ज्ञानिले पुत्र श्रृष्टी गरोस्॥८॥ पुत्र जन्मदैमा पुंनाम नरकबाट पितृ तर्दछन्। स्वयम्भूले तेसै कारण पुत्र भनेका छन्॥९॥

इति वेदैरपि प्रोक्तं पुत्रमाहात्म्यमुत्तमम्। तस्मात्पुत्रमुखं दृष्ट्वा मुच्यते पैतृकादृणात्॥ ११॥
पौत्रस्य स्पर्शनान्मर्त्यो मुच्यते च ऋणत्रयात्। लोकानन्त्ये द्दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः॥ १२॥
ब्रह्मोढापुत्रोन्नयति संगृहीतस्त्वधो नयेत्। एवं ज्ञात्वा खगश्रेष्ठ! हीनजातिसुतांस्त्यजेत्॥ १३॥
सवर्णेभ्यः सवर्णासु ये पुत्रा औरसाः खग। त एव श्राद्धदानेन पितॄणां स्वर्गहेतवः॥ १४॥
श्राद्धेन पुत्रदत्तेन स्वर्यातीति किमुच्यते। प्रेतोऽपि परदत्तेन गतः स्वर्गमया शृणु॥ १५॥
अत्रैवोदाहरिष्येऽहमितिहासं पुरातनम्। और्ध्वदेहिकदानस्य परं माहात्म्यसूचकम्॥ १६॥

एक धर्मात्मा पुत्र भये पनि संपूर्ण एकाइस कुल तार्दछन्। पुत्रले लोकको रक्षा हुन्छ भनि सनातन श्रुती आदिमा कहेका छन्॥ १०॥ पुत्रको माहात्म्य वेदमा पनि भनेका छन्, यसै कारणले पुत्रको मुख देख्दैमा पितृ ऋण छुट्न जान्छन्॥ ११॥ नातिको शरीर छुनाले नै तीन ऋण छुट्छन् (देव पितृ ऋषि तीन ऋण हुन्छन्)। नाति, पनाति भये भने ता देवलोक प्राप्ति हुन्छन्॥ १२॥ स्वजातीकि विवाहिता स्त्रीबाट पैदाभएको पुत्रले स्वर्गादि प्राप्त हुन्छ, विजातीय अविवाहिता स्त्रीबाट पैदाभएको पुत्रले नरक लैजान्छ, हे गरुड! यसै कारण हीनजातिको पुत्र त्याग्नु॥ १३॥ हे गरुड! आफ्ना स्वजाति स्त्रीका पुत्रले श्राद्ध दानादि गर्नाले पितृहरूलाई स्वर्गगति मिल्दछ॥ १४॥ आफ्ना पुत्रले पितृतारेको ता के भनु! अर्कै प्रेत पनि अर्काले दानक्रियागर्दा स्वर्गमा गयेको एक कथा भन्छु सुन॥ १५॥ पैले भयेको कथा हो। यो कस्तो

ग० पु० स० अ०

पुरा त्रेतायुगे तार्क्ष्य राजासीद् बभ्रुवाहनः। महोदये पुरे रम्ये धर्मनिष्ठो महाबलः॥ १७॥
यज्वा दानपतिः श्रीमान्ब्रह्मण्यः साधुवत्सलः। शीलाचारगुणोपेतो दयादाक्षिण्यसंयुतः॥ १८॥
पालयामास धर्मेण प्रजाः पुत्रानिवौरसान्। क्षात्रधर्मरतो नित्यं सदण्ड्यान्दण्डयन्नृपः॥ १९॥
एकदाचिन्महाबाहुः ससैन्यो मृगयां गतः। वनं विवेश गहनं नानावृक्षसमन्वितम्॥ २०॥
नानामृगगणाकीर्णं नानापक्षिनिनादितम्। वनमध्ये तदा राजा मृगं दूरादपश्यत॥ २१॥
तेन विद्धो मृगोऽतीव बाणेन सुदृढेन च। बाणमादाय तं तस्य वनेऽदर्शनमेयिवान्॥ २२॥

भने अर्काले और्ध्वदेहिक क्रिया र दानादिको अर्काको माहात्म्य बताउने अतियोग्य कथा छ॥ १६॥ पैले त्रेता युगमा बभ्रुवाहन नामका राजा थिये। महोदय नामको शहर अति रमणीय थीयो। तेसै शहरमा ती धर्मात्मा बलवान् बभ्रुवाहन राजा हुँदा भये॥ १७॥ ती राजा कस्ता भने यज्ञदानमा मुख्य श्रीमान् ब्राह्मण साधुमा भक्त शील आचार दयावान् गुणी चातुर्यले युक्त भयेका॥ १८॥ धर्मपूर्वक पुत्रसमान प्रजाहरुलाई पालनगर्नें, नीति पूर्वक दण्ड गर्नें, राज धर्ममा युक्त भएका थिए॥ १९॥ तिनै बभ्रुवाहन राजा कुनै दिन सेना लिएर शिकार खेल्नलाई वनमा जाँदा भये। त्यो वन कस्तो भने अनेक पर्वत वृक्षले शोभायमान थियो॥ २०॥ नानाप्रकारका पक्षीहरूले गुञ्जायमान भयेको जहाँ धेरै प्रकारको मृगको समूह थियो॥ त्यै वनका मध्ये एक ठूलो मृगलाई टाढैबाट राजाले देख्दाभये॥ २१॥ तेस मृगलाई अति

७४

ग० पु० स० अ०

कक्षेण रुधिरार्द्रेण स राजानुजगाम तम्। ततो मृगप्रसङ्गेन वनमन्यद्विवेश सः॥ २३॥
क्षुत्क्षामकण्ठो नृपतिः श्रमसंतापमूर्च्छितः। जलाशयं समासाद्य साश्व एव व्यगाहत॥ २४॥
पपौ तदुदकं शीतं पद्मगन्धादिवासितम्। ततोऽवतीर्य सलिलाद्विश्रमो बभ्रुवाहनः॥ २५॥
ददर्श न्यग्रोधतरुं शीतच्छायं मनोहरम्। महाविटपविस्तीर्णं पक्षिसंघनिनादितम्॥ २६॥
वनस्य तस्य सर्वस्य महाकेतुमिव स्थितम्। मूलं तस्य समासाद्य निषसाद महीपतिः॥ २७॥
अथ प्रेतं ददर्शासौ क्षुत्तृड्भ्यां व्याकुलेन्द्रियम्। उत्कचं मलिनं कुब्जं निर्मांसं भीमदर्शनम्॥ २८॥

तीखा बाणले हान्दा भये, बाणलागेको मृग जो छ रक्तको धारो लागेको छँदो त्यो बाणै सँग हराउँदो भयो॥ २२॥ राजा जो छन् बाणलागी रक्तको धारा लगाई भाग्ने भयेको त्यस मृगका पछि लागी जाँदा भये र मृगका प्रसंगले अर्का वनमा पस्ता भये॥ २३॥ राजा जो छन् सो हिड़दा अति श्रमभै तृषाले घाँटी सुकी मूर्छा हूँने जस्ता भएर एक तलाउमा पुगी घोड़ा सहितले स्नानगर्दा भये॥ २४॥ सुगन्धी वास्नाले युक्तभयेको कमलले शोभा भयेको तलाउको शीतल जलखाई बभ्रुवाहन राजा जो छन् तलाउदेखि बाहिर आई विश्राम गर्दाभये॥ २५॥ तहाँ तिनले अति मनोहर शीतल छाया भयेको ठूलो वरको वृक्ष देखे। कस्तो वृक्ष भने चारै तरफ हाँगा गयेको, धेर जग्गामा फैलीयेको अनेकन् पक्षीले गुञ्जायमान भयेको॥ २६॥ त्यो वनको ठूलो ध्वजा समान भै रहेको त्यस वृक्षको फेदमा गई राजा बस्ता भये॥ २७॥ राजा

७५

तं दृष्ट्वा विकृतं घोरं विस्मितो बभ्रुवाहनः। प्रेतोऽपि दृष्ट्वा तं घोरामटवीमागतं नृपम्॥ २९॥
समुत्सुकमना भूत्वा तस्यान्तिकमुपागतः। अब्रवीत्स तदा तार्क्ष्य प्रेतराजो नृपं वचः॥ ३०॥
प्रेतभावो मया त्यक्तः प्राप्तोस्मि परमां गतिम्। त्वत्संयोगान्महाबाहो जातो धन्यतरोऽस्म्यहम्॥ ३१॥

राजोवाच —

कृष्णावर्णकरालास्य प्रेतत्वं घोरदर्शनम्। केन कर्मविपाकेन प्राप्तं ते बह्वमङ्गलम्॥ ३२॥
प्रेतत्वकारणं तात ब्रूहि सर्वमशेषतः कोऽसि त्वं केन दानेन प्रेतत्वं ते विनश्यति॥ ३३॥

जो छन् भोक तृषाले आकुल भयेका छँदा त्यहीँ एक प्रेत देख्याभये, त्यो प्रेत कस्तो भने ठाडा केश, मैलो कुब्रो मांसुले रहित, हाड नसा मात्र भएको डरलाग्दो देखियो॥ २८॥ घोर डरलाग्दो रूप भयेको प्रेतलाई देखी राजा विस्मित भये। पनि घोर जंगलमा आयेको राजालाई देखी विस्मित भयो॥ २९॥ हे गरुड! प्रेतराजले अति सुखी भयी राजा सित यो वचन भन्दो भयो॥ ३०॥ म प्रेतभाव छुटेर परमगतिमा प्राप्त हुने भयें। हे महाबाहो! हे राजन्? म धन्य रहेछु, हजुर जस्ता सँग सँयोग भयो॥ ३१॥ प्रेतको यस्तो वचन सुनी **राजा भन्दछन्,** कालोवर्ण भएर ठूलो डरलाग्दो मुख, घोर डरलाग्दो कुनकर्मका पापले प्रेतको यस्तो दुःखदायक अवस्था तिमले भोग्नु पऱ्यो॥ ३२॥ हे तात! प्रेतत्वभयेको कारण सम्पूर्ण बताऊ। तिमी को हौ? के दान गर्नाले तिम्रो यो प्रेतत्वको नाश हुन्छ॥ ३३॥ राजाले सोधेकोले

प्रेत उवाच —

कथयामि नृपश्रेष्ठ सर्वमेवादितस्तव। प्रेतत्वकारणं श्रुत्वा दयां कर्तुं त्वमर्हसि॥ ३४॥
वैदेशं नाम नगरं सर्वसंपत्समन्वितम्। नानाजनपदाकीर्णं नानारत्नसमाकुलम्॥ ३५॥
हर्म्यप्रासादशोभाढ्यं नानाधर्मसमन्वितम्। तत्राहं न्यवसं तात देवार्चनरतः सदा॥ ३६॥
वैश्यो जात्या सुदेवोऽहं नाम्ना विदितमस्तु ते। हव्येन तर्पिता देवाः कव्येन पितरस्तथा॥ ३७॥
विविधैर्दानयोगैश्च विप्राः संतर्पिता मया। दीनान्धकृपणेभ्यश्च दत्तमन्नमनेकधा॥ ३८॥
तत्सर्वं निष्फलं राजन्मम दैवादुपागतम्। यथा मे निष्फलं जातं सुकृतं तद्वदामि ते॥ ३९॥

प्रेत भन्छ, हे नृपश्रेष्ठ! सम्पूर्ण हजुरलाई म बताउँछु। मेरो प्रेत भयेको कुरा सुन्दा हजुर दयागर्नमा योग्य होई बक्सिन्छ॥ ३४॥ सम्पूर्ण सम्पत्तिले युक्त भयेको वैदेश नगर छ, त्यहाँ मणि माणिक रत्नले युक्त भयेको सारैजातका जनहरू सम्पत्तिले युक्तभयेर रहेका छन्॥ ३५॥ महत् हर्म्य, राजाको घर, धनिहरुको घर, अति शोभायमान छन्। धर्मले पनि युक्तछन् हे तात! तैसे शहरमा सधै देवताको पूजा गरी म बस्थें॥ ३६॥ मेरो वैश्य जात हो, सुदेव मेरो नाम हो, हजूरका अगाडीनै छु मैले हवनादि गरी देवतालाई खुसी पारें कव्य श्राद्धादिले पितृलाई खुसी गरायें॥ ३७॥ मैले अनेक प्रकारका दान गरेर ब्राह्मणलाई खुस गरें। दुःखी-दरिद्र अन्धालाई अन्नादि दिइ खुसी गरायें॥ ३८॥ हे राजन्! दैवका गतिले गर्दा त्यो सम्पूर्ण कर्म निष्फल भयो हजुरलाई त्यो निष्फल भयेको कारण पनि बताउँछु, सुन्नु हवोस्॥ ३९॥

मम वै संततिर्नास्ति न सुहृन्न च बान्धवाः। न च मित्रं हि मे तादृग्यः कुर्यादौर्ध्वदेहिकम्॥ ४०॥
यस्य न स्यान्महाराज श्राद्धं मासिकषोडशम्। प्रेतत्वं सुस्थिरं तस्य एतैः श्राद्धशतैरपि॥ ४१॥
त्वमौर्ध्वदेहिकं कृत्वा मामुद्धर महीपते। वर्णानां चैव सर्वेषां राजा बन्धुरिहोच्यते॥ ४२॥
तन्मां तारय राजेन्द्र मणिरत्नं ददामि ते। यथा मे सद्गतिर्भूयात्प्रेतयोनिश्च गच्छति॥ ४३॥
तथा कार्यं त्वया वीर मम चेदिच्छसि प्रियम्। क्षुधातृषादिभिर्दुःखैः प्रेतत्वं दुःसहं मम॥ ४४॥
स्वादूदकं फलं चास्ति वनेऽस्मिन् शीतलं शिवम्। न प्राप्नोमि क्षुधार्तोऽहं तृषार्तो न जलं क्वचित्॥ ४५॥

मेरा छोरा पनि थियेनन्, न ता दाजुभाई, न ता मित्र आदि कोहि थिये, न ता और्ध्वदेहिक क्रियागर्ने योग्य जन थिए॥ ४०॥ जस्को और्ध्व देहिक आदि मासिक र तीन षोडसी श्राद्ध भयेको छैन भने तेस्को सये श्राद्ध गरे पनि प्रेतत्त्व नाँश हुँदैन॥ ४१॥ हे महिपते! हजुरले और्ध्वदेहिक क्रिया गरी मेरो उद्धार गर्नु हवोस्। राजाहरू चारै जातका बन्धु हुन् भनि भनेका छन्॥ ४२॥ हे राजेन्द्र! मलाई तार्नु हवोस्, हजुरलाई एक मणिरत्न दिन्छु। जसरि मेरो प्रेतयोनि छुटि सद्गति हुन्छ सोहि गर्नुहोस्॥ ४३॥ हे वीर! मेरो कल्याणको इच्छा छ भने क्रिया गरियोस्। भोक तृषापाई मैले अति दुःख सहनु परेकोछ॥ ४४॥ यो वनमा पाकेको अतिमिष्ट रसीलो फल छन्। भोकमा खान

यदि मे हि भवेद्राजन्विधिर्नारायणो महान्। तदग्रे वेदमन्त्रैश्च क्रिया सर्वौर्ध्वदैहिकी॥ ४६॥
तदा नश्यति मे नूनं प्रेतत्त्वं नात्र संशयः। वेदा मन्त्रास्तपो दानं दया सर्वत्र जन्तुषु॥ ४७॥
सच्छास्त्रश्रवणं विष्णोः पूजा सज्जनसंगतिः। प्रेतयोनिविनाशाय भवन्तीति मया श्रुतम्॥ ४८॥
अतो वक्ष्यामि ते विष्णुपूजां प्रेतत्वनाशिनीम्। सुवर्णद्वयमानीय सुवर्णन्यायसंचितम्॥
तस्या नारायणस्यैकां प्रतिमां भूप! कल्पयेत्॥ ४९॥
पीतवस्त्रयुगच्छन्नां सर्वाभरणयुषिताम्। स्नापितां विविधैस्तोयैरधिवास्य यजेत्ततः॥ ५०॥

पाउँदिन, तृषालाग्दा पनि कहि पानी पाउँदिन, यस्तो दुःख पायेकोछु॥ ४५॥ हे राजन्! मेरो पैले विधिसित नारायणबली गर्नु र त्यहाँ देखि मेरो और्ध्वदेहिक क्रियागर्नु॥ ४६॥ यतिगरी दिनुभयो भने मेरो निश्चय प्रेतत्व नाश हुनेछ। वेद भये, मंत्र भयें तपस्या र सम्पूर्ण दान भये॥ ४७॥ र सत्शास्त्र सुन्नु, विष्णुको पूजा, सज्जनको सँग गर्नु, इ कर्म गर्नाले प्रेत, योनिको नाँश हुन्छ भनि मैले सुनेको थियो॥ ४८॥ तेसै कारण तिमीलाई प्रेतत्व नाँशहुने विष्णु पूजा भन्छु सुन, असली सुवर्णद्वय बत्तीस तोला सुनको हे भूप! एक नारायणको प्रतिमा बनाउँनु॥ ४९॥ पीताम्बर वस्त्र लगाई गहनादि पहिराई दिनु र नाना प्रकारको जलले स्नानगराई सिंहासनमा राखी पूजा गर्नु॥ ५०॥

पूर्वे तु श्रीधरं तस्या दक्षिणे मधुसूदनम्। पश्चिमे वामनं देवमुत्तरे च गदाधरम्॥ ५१॥
मध्ये पितामहं चैव तथा देवं महेश्वरम्। पूजयेच्च विधानेन गन्धपुष्पादिभिः पृथक्॥ ५२॥
ततः प्रदक्षिणीकृत्य वह्नौ संतर्प्य देवताः। घृतेन दध्ना क्षीरेण विश्वेदेवांश्च तर्पयेत्॥ ५३॥
ततः स्नातो विनीतात्मा यजमानः समाहितः। नारायणाग्रे विधिवत्स्वां क्रियामौर्ध्वदेहिकीम्॥ ५४॥
आरभेत यथाशास्त्रं क्रोधलोभविवर्जितः। कुर्याच्छ्राद्धानि सर्वाणि वृषस्योत्सर्जनं तथा॥ ५५॥
ततः पदानि विप्रेभ्यो दद्याच्चैव त्रयोदश। शय्यादानं प्रदत्त्वा च घटं प्रेतस्य निर्वपेत्॥ ५६॥

पूर्व भागमा श्रीधर नाम विष्णुको पूजागर्नु, पश्चिममा वामनको, उत्तरमा गदाधर नाम भगवानको पूजा गर्नु॥ ५१॥ मध्यमा ब्रह्माजीको र महादेवको, गन्ध पुष्पादिले पृथक्-पृथक् पूजा गर्नु, धूपद्दीप नैवेद्य चढाउनु॥ ५२॥ तेती गरेर प्रदक्षिणा गरी अग्निमा हवन गर्नु, देवता तृप्त हुन्छन्, घिउ दही दूधले विश्वदेवलाई तृप्तगर्नु॥ ५३॥ यति गरिसके पछि यजमान जो छ सो स्नान गरी शुद्धभै नमृत भै भक्ती सहित नारायणका अग्र भागमा विधि पूर्वक शास्त्रमा बताये बमोजीम दशदिन सम्म और्ध्वदेहिक क्रियागर्नु॥ ५४॥ क्रोधलोभ मोह छोडी शास्त्रानुसार षोडशश्राद्ध गरी वृषोत्सर्ग पनि गरोस्॥ ५५॥ एकादशाह गरी द्वादशदिनमा तेह्र जना ब्राह्मणलाई प्रेत घड़ाको पददान गरोस्

राजोवाच —

कथं प्रेतघटं कुर्याद्द्यात्केन विधानतः। ब्रूहि सर्वानुकम्पार्थं घटं प्रेतविमुक्तिदम्॥ ५७॥

प्रेत उवाच —

साधु पृष्टं महाराज कथयामि निबोध ते। प्रेतत्वं न भवेद्येन दानेन सुदृढेन च॥ ५८॥
दानं प्रेतघटं नाम सर्वाशुभविनाशनम्। दुर्लभं सर्वलोकानां दुर्गतिक्षयकारकम्॥ ५९॥

संतप्तहाटकमयं तु घटं विधाय ब्रह्मेशकेशवयुतं सह लोकपालैः।
क्षीराज्यपूर्णविवरं प्रणिपत्य भक्त्या विप्राय देहि तव दानशतैः किमन्यैः॥ ६०॥

अनी शय्यादान गरी॥ ५६॥ **राजा सोद्ध छन्,** प्रेत घड़ा भनेको के हो, कुन विधिले दानगर्नु त्यो सम्पूर्ण प्रेतको उपकारहुने प्रेत घड़ाको विधि बताऊ॥ ५७॥ **प्रेत भन्दछन्,** साधुमा श्रेष्ठ हे महाराज! असल प्रश्न सोध्नुभो, म कहन्छु, सुन्नुहोस्, जो नाश जो यह सुदृढदानले प्रेतत्वनाँस हुन्छ॥ ५८॥ प्रेतघड़ा दानगर्नाले सम्पूर्ण अशुभ नाश हुन्छन् यो दान लोकमा अति दुर्लभ छ, दुर्गति नाश भई शुभगति प्राप्त हुन्छ॥ ५९॥ शुद्ध शोधिएको सुनको घड़ा बनाई ब्रह्मा, विष्णु, शिव लोकपाल सहित चित्रयुक्त घडामा घिउ दूधले पूर्णगरि दान गर्नु, अरु शयदानको के काम छ?॥ ६०॥ घडाका मध्यमा ब्रह्मा, विष्णु, अव्यय अविनासि शिवजी क्रमैले स्थापना

ग० पु० ब्रह्मा मध्ये तथा विष्णुः शङ्करः शंकरोऽव्ययः। प्राच्यादिषु च तत्कण्ठे लोकपालान्क्रमेण तु॥ ६१॥ स० अ०
सम्पूज्य विधिवद्राजन्धूपैः कुसुमचन्दनैः। ततो दुग्धाज्यसहितं घटं देयं हिरणमयम्॥ ६२॥
सर्वदानाधिकं चैतन्महापातकनाशनम्। कर्तव्यं श्रद्धया राजन्प्रेतत्वविनिवृत्तये॥ ६३॥

श्रीभगवानुवाच —

एवं संजल्पतस्तस्य प्रेतेन सह काश्यप। सेना जगामानुपदं हस्त्यश्वरथसंकुला॥ ६४॥
ततो बले समायाते दत्वा राज्ञे महामणिम्। नमस्कृत्य पुनः प्राथ्र्य प्रेतोऽदर्शनमेयिवान्॥ ६५॥

गरि त्यै घडाको कण्ठमा क्रमैसित दश दिक्पालादिको चित्र पनि बनाउनु॥ ६१॥ हे राजन्! कुसुम आदि पुष्प चन्दनले पूजा गरी धूप-दीप-नैवेद्य-भेटीगरी दूधघिउले पूर्ण त्यो सुवर्णघट ब्राह्मणलाई दान दिनु॥ ६२॥ महापातक नाश गर्ने सम्पूर्ण दान भन्दा यो दान मुख्य हो। हे राजन्! श्रद्धा पूर्वक प्रेतघडा दान गर्नाले प्रेतत्व योनि छुटि शुभगतिमा प्राप्त हुन्छ॥ ६३॥ **श्री भगवान् आज्ञा गर्नु हुन्छ,** हे गरुड! सुन, यस्ता प्रकारको राजाको र प्रेतको संवाद हुँदै थियो, तेसै बेलामा राजालाई खोज्दै हात्ति घोड़ा, रथ सहित राजाका सेना त्यहाँ आई पुग्दाभये॥ ६४॥ राजाको सैन्यलाई आयेको देखी राजालाई मणि दियेर यो कर्मगरि दिनु भनि नमस्कार गरी प्रेत अन्तर्ध्यान

ग० पु० तस्माद्वनाद्विनिष्क्रम्य राजापि स्वपुरं ययौ। स्वपुरं च समासाद्य तत्सर्वं प्रेतभाषितम्॥ ६६॥ स० अ०
चकार विधिवत्पक्षिन्नौर्ध्वदेहिकजं विधिम्। तस्य पुण्यप्रदानेन प्रेतो मुक्तो दिवं ययौ॥ ६७॥
श्राद्धेन परदत्तेन गतः प्रेतोऽपि सद्गतिम्। किं पुनः पुत्रदत्तेन पिता यातीति चाद्भुतम्॥ ६८॥
इतिहासमिमं पुण्यं शृणोति श्रावयेच्च यः। न तौ प्रेतत्वमायातः पापाचारयुतावपि॥ ६९॥

॥ इति श्रीगरुडपुराणे सारोद्धारे बभ्रुवाहन प्रेतसंस्कारो नाम सप्तमोऽध्यायः॥ ७॥

भयो॥ ६५॥ तेस् बनदेखि निस्केर राजा पनि आफ्ना शहरमा जाँदा भये र दरवारमा पुगी प्रेतले भनेको कर्म गर्दा भये॥ ६६॥ हे गरुड! प्रेतले भने बमोजीम विधि पूर्वक और्ध्वदेहिक क्रिया गरी दिए। त्यस्का पुण्यले प्रेत पनि मुक्त भै देवलोकमा जाँदो भयो॥ ६७॥ अर्काले गरिदियेका श्राद्धले प्रेत मुक्ती भो भने आफ्ना पुत्रले गर्दा पितृहरु के मुक्त हुँदैनन्॥ ६८॥ यो प्रेत मुक्त भयेको पुण्यकथा सुन्ने अथवा सुनाउने दुवै जन घोर पाप गरेको भये पनि प्रेत हुने छैनन्॥ ६९॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां सप्तमोऽध्यायः॥ ७॥

* अथ अष्टमोऽध्यायः *

गरुड उवाच —

आमुष्मिकीं क्रियां सर्वां वद सुकृतिनां मम। कर्तव्या सा यथा पुत्रैस्तथा च कथय प्रभो॥ १॥

श्रीभगवानुवाच —

साधु पृष्टं त्वया तार्क्ष्य मानुषाणां हिताय वै। धार्मिकार्हं च यत्कृत्यं तत्सर्वं कथयामि ते॥ २॥
सुकृती वार्धके दृष्ट्वा शरीरं व्याधिसंयुतम्। प्रतिकूलग्रहांश्चैव प्राणघोषस्य चाश्रुतिम्॥ ३॥
तदा स्वमरणं ज्ञात्वा निर्भयः स्यादतन्द्रितः। अज्ञातज्ञातपापानां प्रायश्चित्तं समाचरेत्॥ ४॥

गरुड जी सोध्नु हुन्छ, हे प्रभो! मुक्त हुने सुकृत जनको क्रिया छोराले के के गर्नु पर्छ त्यो सम्पूर्ण भनि बक्सियोस्॥ १॥ गरुडले सोधे पछि **भगवान् आज्ञा गर्नु हुन्छ,** हे साधु गरुड! सुन, मनुष्यको हित हुने कुरा भन्छु। जुन कर्म गर्नाले धर्मात्मा शुभ गतिका हुन्छन्॥ २॥ सुकृती पुरुष वृद्धवस्थाभई व्याधिले ग्रस्तभएको देखि ग्रहादिको मार्केश पनि हेरी प्राण चलेको पनि विचारगरी॥ ३॥ अब निश्चय अन्त्यकाल आयेको बखत जानेर, निर्भय भै जानि न जानि गरेको पापको प्रायश्चित गरोस॥ ४॥

यदा स्यादातुरः कालस्तदा स्नानं समारभेत्। पूजनं कारयेद्विष्णोः शालग्रामस्वरूपिणः॥ ५॥
अर्चयेद्गन्धपुष्पैश्च कुम्कुमैस्तुलसीदलैः। धूपैर्दीपैश्च नैवेद्यैर्बहुभिर्मोदकादिभिः॥ ६॥
दत्वा च दक्षिणां विप्रान्नैवेद्यादेव भोजयेत्। अष्टाक्षरं जपेन्मन्त्रं द्वादशाक्षरमेव च॥ ७॥
संस्मरेच्छ्रणुयाच्चैव विष्णोर्नाम शिवस्य च। हरेर्नाम हरेत्पापं नृणां श्रवणगोचरम्॥ ८॥
रोगिणोन्तिकमासाद्य शोचनीयं न बान्धवैः। स्मरणीयं पवित्रं मे नामधेयं मुहुर्मुहुः॥ ९॥
मत्स्यः कूर्मो वराहश्च नारसिंहश्च वामनः। रामो रामश्च कृष्णश्च बुद्धः कल्की तथैव च॥ १०॥

जस् बखतमा अन्त्यकाल प्राणान्त हुने जानेर पैले पुत्रले गरोस् स्नान, पछि शालीग्राम पञ्चदेवताको पूजा गरोस्। शालीग्राम स्वरूप स्वयं विष्णु भगवानजीको पूजा विधि पूर्वक गरोस्॥ ५॥ विष्णुको पूजा चन्दानाक्षता कुम्कुम तुलसी पत्रादिले धूपदीप धेरै प्रकारका गरी लड्डु आदि नैवेद्य चढ़ाउनु॥ ६॥ ब्राह्मणहरूलाई दक्षिणादि नैवेद्यले नै भोजन गराऊनु, अष्टाक्षरी द्वादशाक्षरी मन्त्र जपाउनु॥ ७॥ विष्णु भगवानको नाम शिवको नाम जपोस्। हरिहरको नाम जपनाले वा सुन्नाले मनुष्यको पाप नाश हुन्छ॥ ८॥ बान्धवहरूले रोगीको नजिक शोक सुर्ता न गर्नु। भगवानको पवित्र मंगलदायक नाम बारंबार पढ़ी सुनाउनु॥ ९॥ भगवानको नाम कुन भने मत्स्य, कूर्म, वराह, नृसिंह, वामन, परशुराम, श्री राम, कृष्ण, बौद्ध, कल्की॥ १०॥ इ नाम जात्रे ज्ञानीले सँधै स्मरण गर्नु। रोगीका नजिकमा

एतानि दशनामानि स्मर्तव्यानि सदा बुधैः। समीपे रोगिणो ब्रूयुर्बान्धवास्ते प्रकीर्तिताः॥ ११॥
कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्तते। तस्य भस्मीभवन्त्याशु महापातककोटयः॥ १२॥
म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितम्। अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन्॥ १३॥
हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः॥ १४॥
हरेर्नाम्नश्च या शक्तिः पापनिर्हरणे द्विज। तावत्कर्तुं समर्थो न पातकं पातकी जनः॥ १५॥
किङ्करेभ्यो यमः प्राहानयध्वं नास्तिकं जनम्। नैवानयत भो दूता हरिनामस्मरं नरम्॥ १६॥

पुत्रादि बान्धवले बारंबार इनै दश नामलाई सुनाउनु॥ ११॥ जस्को नित्य मुखमा कृष्णको मंगल नाम रहन्छ तेस्को कोटी पाप भयेपनि छिटै नाश हुन्छ॥ १२॥ मर्ने बखतमा छोरँको नाम कृष्ण भये र तेस्को नाम लिए पनि मुक्त हुन्छ, जस्तै अजामिलको छोराको नाम पनि नारायण हुँदा अन्त्य समयमा छोरोलाई बोलाउँदा मुक्तभयो भने श्रद्धाले देवताको नाम लिंदा को मुक्त हुँदैनन्॥ १३॥ दुष्टचित्तले हरि नाम भन्नाले पनि जस्तै इच्छा विना छोए पनि अग्निले पोल्दछन् उसै किसिमले सबै पाप नाश हुन्छन्॥ १४॥ हे गरुड! जति पाप नाश गर्ने हरिको नाम छन त्यति पातक पातकी जनले गर्न सक्दैन॥ १५॥ यमराजले दूतलाई भनेका छन् कि नास्तिक जनलाई नर्कमा ल्याउनु। हे दूतहो! जो हरिको नाम स्मरण गर्छन् तिनलाई न ल्याउनु॥ १६॥ हरिको नाम कुन् कुन् भने अच्युत, केशव, राम, नारायण, कृष्ण, दामोदर,

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजेत्॥ १७॥
कमलनयन वासुदेव विष्णो धरणीधराच्युत शंख-चक्रपाणे।
भव शरणमितीरयन्ति ये वै त्यज भट दूरतरेण तानपापान्॥ १८॥
तानानयध्वमसतो विमुखान्मुकुन्दपादारविन्दमकरन्दरसादजस्त्रम्।
निष्किञ्चनः परमहंसकुलै रसज्ञैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान्॥ १९॥
जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम्।
कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान्॥ २०॥

वासुदेव, हरि, श्रीधर, गोपिबल्लभ, जानकीनायक, रामचन्द्र॥ १७॥ कमलनयन, वासुदेव, विष्णु, धरणिधर, अच्युत, शंखचक्रपाणि हुन्। यस्तो भगवानको नाम जसले नित्य स्मरण गर्छ, हे दूतहो! तिन्को नजिकै नजाउ॥ १८॥ कस्ता प्राणी ल्याउ भने भगवानको चरण कमलदेखि विमुख भयेका, हरिको भक्तिले रहित भयेका, नरकमा पर्नेबाटामा लागेका यस्तालाई ल्याउ॥ १९॥ जस्का जिभ्राले भगवान्को नाम र गुण गायेको छैन, चित्तमा भगवान् का चरणकमलको स्मरण पनि छैन, जस्का शिरले श्री कृष्णजीलाई कैले पनि नमस्कार गरेको

तस्मात्संकीर्तनं विष्णोर्जगन्मङ्गलमंहसाम्। महतामपि पक्षीन्द्र विद्धयैकान्तिकनिष्कृतिम् ॥ २१ ॥
प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम्। न निष्पुनन्ति दुर्बुद्धिं सुराकुम्भमिवापगाः ॥ २२ ॥
कृष्णनाम्ना न नरकं पश्यन्ति गतकिल्बिषाः। यमं च तद्भटांश्चैव स्वप्नेऽपि न कदाचन ॥ २३ ॥
मांसास्थिरक्तवत्काये वैतरण्यां पतेन्न सः। योऽन्ते दद्याद्द्विजेभ्यश्च नन्दनन्दनगामिति ॥ २४ ॥
अतः स्मरन्महाविष्णोर्नाम पापौघनाशनम्। गीतासहस्त्रनामानि पठेद्वा शृणुयादपि ॥ २५ ॥

छैन, हे दूतहो! त्यस्ता विष्णुका भक्तिले रहित भयेका पापिलाई बाँधेर ल्याउ ॥ २० ॥ हे गरुड! यसै कारण सम्पूर्ण जगतामा मनुष्यहरूको पावक प्रायश्चित्त निश्चय विष्णुको नाम मात्र छ र भगवानको नाम नित्य स्मरण गर्नु ॥ २१ ॥ यो पाप लाग्छ भनि जानि जानि गरेको पापको प्रायश्चित्त हुँदैन, नारायणदेखि विमुख भयेका जनको जस्तै मदीरा हालेको माटाको भाडो गंगा जल हाल्दा पनि शुद्ध हुँदैन ॥ २२ ॥ कृष्णको नाम जस्ले नित्य जपेका छन् ती पुण्यात्मा हुन्। तिन्ले यम र यमराजको दूतलाई स्वप्नमा पनि देख्नु पर्दैन, नर्क जानु ता के पर्दथ्यो ॥ २३ ॥ मासु हाड रकले बगेकी वैतरणी नदी छन् भनि भनिएको थियो, सो नदी तर्न जस्ले अन्त्य बखतमा वैतरणी गाई ब्राह्मणलाई दान गरेको छ भने तीन्ले नदीमा पर्नु पर्दैन ॥ २४ ॥ यस् कारण, हे गरुड! अन्त्य कालमा विष्णु भगवानको नाम जप्नाले घोर पाप गरेको भये पनि त्यो नाश हुन्छ। गीता पाठ, विष्णुसहस्त्र नाम पाठ, सुन्नु सुनाउनु। ई पाठ सुन्नाले मनुष्यको पाप धोइन्छ र ती अन्त्यमा

एकादशीव्रतं गीता गङ्गाम्बु तुलसीदलम्। विष्णोः पादाम्बु नामानि मरणे मुक्तिदानि च ॥ २६ ॥
ततः संकल्पयेदन्नं सघृतं सह काञ्चनम्। सवत्सा धेनवो देयाः श्रोत्रियाय द्विजातये ॥ २७ ॥
अन्ते जनो यद्ददाति स्वल्पं वा यदि वा बहु। तदक्षयं भवेत्तार्क्ष्य यत्पुत्रश्चानुमोदते ॥ २८ ॥
अन्तकाले तु सत्पुत्रः सर्वदानानि दापयेत्। एतदर्थं सुतो लोके प्रार्थ्यते धर्मकोविदैः ॥ २९ ॥
भूमिष्ठं पितरं दृष्ट्वा अर्धोन्मीलितलोचनम्। पुत्रैस्तृष्णा न कर्तव्या तद्धने पूर्वसंचिते ॥ ३० ॥
स तद्ददाति सत्पुत्रो यावज्जीवत्यसौचिरम्। अतिवाहस्तु तन्मार्गे दुःखं न लभते यतः ॥ ३१ ॥

सुखि हुन्छन् ॥ २५ ॥ एकादशी व्रत, गीता पाठ, गंगाजल, तुलसीदल, (मञ्जरी) विष्णुको चरणामृत ई सम्पूर्ण मनुष्यलाई मर्ने बखतमा मुक्तिदायक छन् ॥ २६ ॥ यती भई सके उप्रान्त ब्राह्मणलाई संकल्पपूर्वक अन्न घिउ सुन सहित बाछाले सँग गाई दानगर्नु ॥ २७ ॥ अन्त्य कालमा थोँरै वा धेँरै जो दान गरिन्छन् हे गरुड! त्यो दानको अक्षयपुण्य तिन्का पुत्रादिले पनि पाउँछन् ॥ २८ ॥ जो ज्ञानि सत्पुत्र छन् माता पिताको अन्त्यकालमा यो सबै दान गरुन्। यस्तो गर्ने पुत्रलाई सज्जन ज्ञानिपुरुषहरु पनि प्रार्थना गर्दछन्, यस्तै पुत्र हाम्रा कूलमा पनि हुन् भनि ॥ २९ ॥ आधा नेत्र चिम्लन लागेका पितालाई देखि पैले पिताले कमायेको धनको पुत्रले माया न गरोस्, र सबै गर्नु पर्ने दान गरिदेवोस् ॥ ३० ॥ सत्पुत्र हुनाले बाचुञ्जेल पनि सुखैमा पाली परलोकमा पनि सुखै पाई दुःख पाउँदैन ॥ ३१ ॥ आतुर कालको दान र

आतुरे चोपरागे च द्वयं दानं विशिष्यते। अतोऽवश्यं प्रदातव्यमष्टदानं तिलादिकम्॥ ३२॥ अ०
ग० पु० तिला लोहं हिरण्यं च कार्पासो लवणं तथा। सप्तधान्यं क्षितिर्गावो ह्येकैकं पावनं स्मृतम्॥ ३३॥ अ०
एतदष्टमहादानं महापातकनाशनम्। अन्तकाले प्रदातव्यं शृणु तस्य च सत्फलम्॥ ३४॥
मम स्वेदसमुद्भूताः पवित्रास्त्रिविधास्तिलाः। असुरा दानवा दैत्यास्तृप्यन्ति तिलदानतः॥ ३५॥
तिलाः श्वेतास्तथा कृष्णा दानेन कपिलास्तिलाः। संहरन्ति त्रिधा पापं वाङ्मनः कायसंचितम्॥ ३६॥
लोहदानं च दातव्यं भूमियुक्तेन पाणिना। यमसीमां न चाप्नोति न गच्छेत्तस्य वर्त्मनि॥ ३७॥

ग्रहणदान ई दुई दान सुख दिने छन्। अवश्य आतुरमा तिलादि अष्ट महादान गरिदिनु॥ ३२॥ अष्टमहादान कुन भने तिल १, फलाम २, सुन ३, कपास ४, नुन ५, सप्तधान्य ६, भूमि ७, गाई ८ ई प्रत्येक पवित्र छन्। आतुर्मा दान गरोस्॥ ३३॥ ई अष्टमहादान महा पातक नाश गर्ने हुन्, अवश्य आतुर्कालमा दान गर्नु। तेस्को फल सुन॥ ३४॥ मेरो पसीनादेखि उत्पन्न भएका तीन प्रकारका तिल छन्। तिल दान गर्नाले असुर, दानव, दैत्य आदि सबै सुखी हुन्छन्॥ ३५॥ तिल जो छ सेतो कालो र कैलो हुन्छन् र ई दान गर्नाले मन, वचन, शरीरले गरेको तीन पाप नाश हुन्छन्॥ ३६॥ भूमिमा हात राखी फलाम दान गर्नाले यमलोक जानु ता के तेसका सीमामा पनि जानु पर्दैन॥ ३७॥

कुठारो मुसलो दण्डः खड्गश्च छुरिका तथा। शस्त्राणि यमहस्ते च निग्रहे पापकर्मणाम्॥ ३८॥ अ०
ग० पु० यमायुधानां सन्तुष्ट्यै दानमेतदुदाहृतम्। तस्माद्दद्याल्लोहदानं यमलोके सुखावहम्॥ ३९॥ अ०
ऊरणः श्यामसूत्रश्च शुण्डामर्कोऽप्युदुम्बरः। शेषम्बलो महादूता लोहदानात् सुखप्रदाः॥ ४०॥
शृणु तार्क्ष्य परं गुह्यं दानानां दानमुत्तमम्। दत्तेन तेन तुष्यन्ति भूर्भुवःस्वर्गवासिनः॥ ४१॥
ब्रह्माद्या ऋषयो देवा धर्मराजसभासदाः। स्वर्णदानेन सन्तुष्टा भवन्ति वरदायकाः॥ ४२॥
तस्मादेयं स्वर्णदानं प्रेतोद्धरणहेतवे। न याति यमलोकं स स्वर्गतिं तात गच्छति॥ ४३॥

पापिलाई दण्डदिने यमराजको हतियार बञ्चरो, मुसल, दण्ड, खड्ग छुरी आदि हुन्छन्॥ ३८॥ फलामको हतियार दान गर्नाले यमराज खुसी हुन्छन्। अवश्य यमलोकमा सुख होस् भन्ने इच्छा राख्नेले फलाम दान गरोस्॥ ३९॥ ऊरण, श्याम, सूत्र, शुण्डामर्क, उदुम्बर आदि गरिएका दूतहरू फलाम दान गर्नाले खुसी हुन्छन्, दुःख दिदैनन्॥ ४०॥ हे गरुड! यो अति गुह्य उत्तमदान छ भन्छु सुन, जुन दान गर्नाले स्वर्ग, मर्त्य, पातालका सबै खुसी हुन्छन्॥ ४१॥ ब्रह्मा आदि ऋषि देवता यमराजका सभासद सम्पूर्ण सुनदान गर्नाले खुसीभै वर दिने हुन्छन्॥ ४२॥ यसैं कारण प्रेत उद्धारका निमित्त सुन दान देवोस्। हे तात! सुन दान गरेको छ भने यमलोकमा जाँदैन, स्वर्गै जान्छ॥ ४३॥

चिरं वसेत्सत्यलोके ततो राजा भवेदिह। रूपवान् धार्मिको वाग्मी श्रीमानतुलविक्रमः॥ ४४॥
कार्पासस्य तु दानेन दूतेभ्यो न भयं भवेत्। लवणं दीयते यच्च तेन नैव भयं यमात्॥ ४५॥
अयोलवणकार्पासतिलकाञ्चनदानतः । चित्रगुप्तादयस्तुष्टा यमस्य पुरवासिनः॥ ४६॥
सप्तधान्यप्रदानेन प्रीतो धर्मध्वजो भवेत्। तुष्टा भवन्ति येऽन्येऽपि त्रिषु द्वारेष्वधिष्ठिताः॥ ४७॥
व्रीहयो यवगोधूमा मुद्गा माषाः प्रियेङ्गवः। चाणकाः सप्तमा ज्ञेयाः सप्तधान्यमुदाहृतम्॥ ४८॥
गोचर्ममात्रं वसुधा दत्ता पात्रे विधानतः। पुनाति ब्रह्महत्याया दृष्टमेतन्मुनीश्वरैः॥ ४९॥

स्वर्गदेखि सत्यलोकमा गयेर धेरै काल बसी पृथिवीमा राजा भई जन्म हुन्छ। रूपवान् धर्मात्मा सत्य बोल्ने धनी पराक्रमी हुन्छ॥ ४४॥ कपास दान गर्नाले यमदूतको भय हुँदैन। नून दान गरे यमराजको डर केहि हुँदैन॥ ४५॥ फलाम, नून, कपास, तिल, सुन दान गर्नाले यमराजका सभासद चित्रगुप्तआदि सबै खुसी हुन्छन्॥ ४६॥ यमराजको ढोकाका धर्मध्वज आदि चारै जना खुसी हुन्छन्॥ ४७॥ सप्त धान्य के हो भने धान १, जौ २, गेहूँ ३, मुगीं ४, माष ५, कागुनु ६, चना ७, यति ८ चीजलाई सप्तधान्य भनी शास्त्रमा भनियेको छ॥ ४८॥ एक गाईको थलो जती भूमि सुपात्र ब्राह्मणमा विधि पूर्वक दान गरेको छ भने ब्रह्महत्यादि पाप नाश हुन्छ भनि ज्ञानिमुनिहरूले

न व्रतेभ्यो न तीर्थेभ्यो नान्यदानाद्विनश्यति। राज्ये कृतं महापापं भूमिदानाद्विलीयते॥ ५०॥
पृथिवीं सस्यसम्पूर्णां यो ददाति द्विजातये। स प्रयातीन्द्रभुवने पूज्यमानः सुरासुरैः॥ ५१॥
अत्यल्पफलदानि स्युरन्यदानानि काश्यप। पृथिवीदानजं पुण्यमहन्यहनि वर्द्धते॥ ५२॥
यो भूत्वा भूमिपो भूमिं न ददाति द्विजातये। स नाप्नोति कुटीं ग्रामे दरिद्रः स्यात्समुद्भवे॥ ५३॥
अदानाद् भूमिदानस्य भूपतित्वाभिमानतः। निवसेन्नरके यावच्छेषो धारयते धराम्॥ ५४॥
तस्माद्भूमीश्वरो भूमिदानमेव प्रदापयेत्। अन्येषां भूमिदानार्थं गोदानं कथितं मया॥ ५५॥

बतायेका छन्॥ ४९॥ व्रत, तीर्थ अरु दान गर्दा नाश न भयेको पाप र राजा भै राज्यमा गरेको पाप भूमिदानले नाश हुन्छ॥ ५०॥ धान खेतीले युक्त भयेकी भूमि ब्राह्मणलाई दान गरे त्यो मनुष्य जो छ देवताले पूजा गरेको छँदो इन्द्रलोकमा जान्छ॥ ५१॥ हे गरुड! अरूदान गर्नाले थोरै पुण्य हुन्छ, भूमिदान गर्नाले दिनदिनै पुण्य बढ्दै जान्छ॥ ५२॥ जो भूमिको मालिक छ, राजा छ ता पनि ब्राह्मणमा पृथ्वीदान गरेन भने त्यो जो छ सो गाउँमा बस्ने झुप्रो सम्म पनि पाउँदैन। जन्मजन्मलाई दरिद्रभै रहन्छ॥ ५३॥ राजा भयेर अभिमानले भूमिदान गरेन भने तेस्ले जहाँ सम्म पृथ्वी शेष रहन्छन् वहाँ सम्म नरकमा रहनु पर्दछ॥ ५४॥ यसै कारण भूमिको मालिकले भूमिदान दिन र अरुलाई भूमिको बदला गौदान दिनु भन्ने भनियो॥ ५५॥ अन्त्यमा दुख नाशलाई अन्त्य धेनु दानगर्नु, रुद्र धेनु रुद्र मृत्युञ्जय हुन्। जानि न जानि

ततोऽन्तर्धेनुदातव्या रुद्रधेनुं प्रदापयेत्। ऋणधेनुं ततो दत्त्वा मोक्षधेनुं प्रदापयेत्॥ ५६॥
दद्याद्वैतरणीं धेनुं विशेषविधिना खग। तारयन्ति नरं गावस्त्रिविधाच्चैव पातकात्॥ ५७॥
बालत्वे यच्च कौमारे यत्पापं यौवने कृतम्। वयः परिणतौ यच्च यच्च जन्मान्तरेष्वपि॥ ५८॥
यन्निशायां तथा प्रातर्यन्मध्याह्नपराह्णयोः। संध्ययोर्यत्कृतं पापं कायेन मनसा गिरा॥ ५९॥
दत्त्वा धेनुं सकृद्वापि कपिलां क्षीरसंयुताम्। सोपस्करां सवत्सां च तपोवृत्तसमन्विते॥ ६०॥
ब्राह्मणे वेदविदुषे सर्वपापैः प्रमुच्यते। उद्धरेदन्तकालं सा दातारं पापसंचयात्॥ ६१॥

ऋणनाशक ऋणधेनु तथा मोक्षदिने मोक्षधेनु हुन्, मोक्षधेनु दान गर्नु॥ ५६॥ हे गरुड! विधिपूर्वक वैतरणी धेनु दानगर्नु। गौदान गर्नाले मनुष्यको तीन प्रकारको पापदेखि गाइले तार्दछिन्॥ ५७॥ बालावस्थामा, कुमार अवस्थामा, यौवनावस्थामा, वृद्धावस्थामा गरेको पाप गौदानले नाश हुन्छन्॥ ५८॥ रातमा गरेको, प्रातमा गरेको, मध्याह्नमा गरेको पाप, शरीरले, मनले, वचनले, गरेको पाप नाश हुन्छन्॥ ५९॥ जन्म भरी गरेको पाप एकैवार दूध पिउने कैलीगाई दान गर्नाले सम्पूर्ण नाश हुन्छ॥ ६०॥ सम्पूर्ण वेद जान्ने ज्ञानि ब्राह्मणमा दानगरे दानगर्ने दाताको सम्पूर्ण पाप अन्त्य कालमा नाश गरी उद्धार गरिदिन्छ॥ ६१॥ आफ्नु चित्त स्वस्थ भयेको बेलामा एक गाई दानगरेको,

एका गौः स्वस्थचित्तस्य ह्यातुरस्य च गोशतम्। सहस्रं म्रियमाणस्य दत्तं चित्तविवर्जितम्॥ ६२॥
मृतस्यैतत्पुनर्लक्षं विधिपूतं त तत्समम्। तीर्थपात्रसमोपेतं दानमेकं च लक्षधा॥ ६३॥
पात्रे दत्तं च यद्दानं तल्लक्षगुणितं भवेत्। दातुः फलमनन्तं स्यान्न पात्रस्य प्रतिग्रहः॥ ६४॥
स्वाध्यायहोमसंयुक्तः परपाकविवर्जितः। रत्नपूर्णामपि महीं प्रतिगृह्य न लिप्यते॥ ६५॥
विषशीतापहौ मन्त्रवह्नी किं दोषभागिनौ। अपात्रे सा च गौर्दत्ता दातारं नरकं नयेत्॥ ६६॥
कुलैकशतसंयुक्तं गृहीतारं तु पातयेत्। नापात्रे विदुषा देया ह्यात्मनः श्रेय इच्छता॥ ६७॥

आतुर्भयेका बेलामा सय गाईदान, भक्ती विना मरे पछि हजार गाईदान गरेको॥ ६२॥ विनाविधि लाख गाईदान गरेकोमा पनि पैलो दान तुल्य हुँदैन। तीर्थमा सत्पात्रमा गरेको दानले लक्षफल मिल्दछ॥ ६३॥ सुपात्रमा दान गरेको लक्ष्यगुण हुन्छ र दातालाई अनन्त फल मिल्छ। सुपात्रलाई दान गर्दा प्रतिग्रह हुँदैन॥ ६४॥ सुपात्र भनेको केहो भने पढने पढाउने, नित्यहोमादि बलीवैश्व गर्ने, अर्काले पकायेको न खाने, देवभक्त यस्ता ब्राह्मणलाई रत्नैरत्नले पूर्णभयाको पृथ्वी दान दिदा पनि प्रतिग्रह लाग्दैन॥ ६५॥ विषमन्त्रले नाश हुन्छ, शीत अग्निले नाश हुन्छ, सुपात्र अग्निमन्त्र हुन्। कुपात्रमा गाईदान भयेकोछ भने तार्नु ता के दातालाई पनि नर्कमा लै जान्छ॥ ६६॥ कुपात्रमा दानगर्दा सये कुल नर्कमा गिर्दछन्, जस्ले आफ्नु कल्याणको इच्छा गर्दछ तेस्ले कुपात्रमा दान न गर्नु॥ ६७॥ एउटा दान एउटै ब्राह्मणलाई दिनु।

एका ह्येकस्य दातव्या बहूनां न कदाचन। सा विक्रीता विभक्ता वा दहत्यासप्तमं कुलम्॥ ६८॥
कथिता या मया पूर्वं तव वैतरणी नदी। तस्या ह्युद्धरणोपायं गोदानं कथयामि ते॥ ६९॥
कृष्णां वा पाटलां वापि धेनुं कुर्यादलंकृताम्। स्वर्णसृङ्गीं रौप्यखुरां कांस्यपात्रोपदोहिनीम्॥ ७०॥
कृष्णवस्त्रयुगच्छन्नां कण्ठघण्टासमन्विताम्। कार्पासोपरि संस्थाप्य ताम्रपात्रं सचैलकम्॥ ७१॥
यमं हैमं न्यसेत्तत्र लोहदण्डसमन्वितम्। कांस्यपात्रे घृतं कृत्वा सर्वं तस्योपरि न्यसेत्॥ ७२॥
नावमिक्षुमयीं कृत्वा पट्टसूत्रेण वेष्टयेत्। गर्तं विधाय सजलं कृत्वा तस्मिन्क्षिपेत्तरिम्॥ ७३॥

एक गोदान धेरैलाई बाँटि न दिनु, एक गोदान बिक्रीगरि त्यस् धनलाई बाँडिदियेमा सातकुल नर्कमा जल्दछन्॥ ६८॥ हे गरुड! तिमीलाई पैले वैतरणी नदीको कुरा भनेको थियो, सो नदीमा तर्ने उपाय बताउछु, सुन॥ ६९॥ काली अथवा पहेली भये पनि गाईलाई गहना, अलंकार रत्न सुनका सिङ् चाँदीका खुर, काँसको कल्चौड़ो॥ ७०॥ कण्ठमा घण्ट, कालो वस्त्र ओढ़ाई, तामाको करङ् कपाल माथि राखि दानगर्नु॥ ७१॥ फलामको दण्ड हातमा लियेको सुनको यमराजको प्रतिमा बनाउनु. कास्य पात्रमा घिउ राखि सम्पूर्ण बराबर पारी॥ ७२॥ उखूको डुङ्गा बनाई रेशमी कपड़ाले वेही कूँवा खनी पानी राखि पानी माथि डुङ्गा राखिदिनु॥ ७३॥ त्यो डुङ्गाका ऊपर

तस्योपरि स्थितां कृत्वा सूर्यदेहसमुद्भवाम्। धेनुं संकल्पयेत्तत्र यथाशास्त्रविधानतः॥ ७४॥
सालंकाराणि वस्त्राणि ब्राह्मणाय प्रकल्पयेत्। पूजां कुर्याद्विधानेन गन्धपुष्पाक्षतादिभिः॥ ७५॥
पुच्छं संगृह्य धेनोस्तु नावमाश्रित्य पादतः। पुरस्कृत्य ततो विप्रमिमं मन्त्रमुदीरयेत्॥ ७६॥
भवसागरमग्नानां शोकतापोर्मिदुःखिनाम्। त्राता त्वं हि जगन्नाथः शरणागतवत्सलः॥ ७७॥
विष्णुरूप द्विजश्रेष्ठ मामुद्धर महीसुर। सदक्षिणा मया दत्ता तुभ्यं वैतरणीं नमः॥ ७८॥
यममार्गे महाघोरे तां नदीं शतयोजनाम्। तर्तुकामो ददाम्येतां तुभ्यं वैतरणीं नमः॥ ७९॥
धेनुके मां प्रतीक्षस्व यमद्वारमहापथे। उत्तारणार्थं देवेशि वैतरण्यै नमोस्तु ते॥ ८०॥

अथवा गौका ऊपर सूर्यका शरीरको ध्यानगर्नु, शास्त्रानुसार विधिपूर्वक गौसंकल्पगर्नु॥७४॥ ब्राह्मणलाई अलङ्कार, गहना, वस्त्र, चन्दनाक्षताले विधिपूर्वक पूजागर्नु॥ ७५॥ गौको पाउमा डुंगा बाँधी अलङ्कार सहित गाईको पुच्छर समाई ब्राह्मणलाई पनि अगाड़ि राखि हात जोडेर यो मन्त्र पढोस्॥ ७६॥ संसार रूपि समुद्रमा डुबेको शोकरूपि लहरिमा दुःख पायेको मलाई, हे जगन्नाथ! हे शरणागत! रक्षा गर्ने हजुरै होइबक्सिन्छ॥ ७७॥ हे विष्णुरूप द्विजश्रेष्ठ! मेरो उद्धार गर्नुहोस् दक्षिणाले सँग गौदान गरी वैतरणी नदीलाई पनि नमस्कार छ॥ ७८॥ अति डरलाग्दा यमलोक जाने बाटोमा सौ योजन फैलेकी वैतरणी नदी तर्न गौदान गरें, वैतरणीलाई नमस्कार छ॥ ७९॥ हे धेनुके!

गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ ८१ ॥
या लक्ष्मीः सर्वभूतानां या च देवे प्रतिष्ठिता। धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ ८२ ॥
इति मन्त्रैश्च सम्प्रार्थ्य साञ्जलिर्धेनुकां यमम्। सर्वं प्रदक्षिणीकृत्य ब्राह्मणाय निवेदयेत् ॥ ८३ ॥
एवं दद्याद्विधानेन यो गां वैतरणीं खग। स याति धर्ममार्गेण धर्मराजसभान्तरे ॥ ८४ ॥
स्वास्थ्यवस्थशरीरे तु वैतरण्यां व्रतं चरेत्। देया च विदुषा धेनुस्तां नदीं तुर्तुमिच्छता ॥ ८५ ॥
सा नायाति महामार्गे गोदानेन नदी खग। तस्मादवश्यं दातव्यं पुण्यकालेषु सर्वदा ॥ ८६ ॥

यमद्वारको महा पथमा जाँदा क्षमा गरी उतारि दिनु। हे देवेशि! वैतरणी! तिमीलाई नमस्कार छ ॥ ८० ॥ गौ मेरा अगाड़ी रहुन्, अर्थात् अघि पछी हृदयमा गौ रहुन्। मेरो पनि गाईको मध्य बास हवोस् ॥ ८१ ॥ जुन् लक्ष्मी संपूर्ण भूत प्राणिमा छौ, जुन् लक्ष्मी देवतामा छन्, सोई लक्ष्मी धेनुरूपले मेरो पाप नाश गरी बक्सीयोस् ॥ ८२ ॥ इनै मन्त्र भन्दै गौ यमराजलाई नमस्कार प्रदक्षिणा गरी संकल्पपूर्वक ब्राह्मणलाई गौ दान गरोस् ॥ ८३ ॥ हे गरुड! यस्ता प्रकार विधिपूर्वक वैतरणी गाई दान गरेको छ भने सो मनुष्य यमराजका सभामा विमानमा बसी जान्छन् ॥ ८४ ॥ आफ्ना स्वस्थ अवस्था मै पनि वैतरणी नदीको व्रत गरोस् वैतरणी तर्न इच्छा गर्नेले सुपात्र ब्राह्मणमा, आफैंले दान देवोस् ॥ ८५ ॥ हे गरुड, सो वैतरणी यमलोक जाने बाटोमा छन्। गाई दान गरे त्यो बाटो जानै पर्दैन, यसै कारण पुण्यकालमा पनि अवश्य

गङ्गादिसर्वतीर्थेषु ब्राह्मणावसथेषु च। चन्द्रसूर्योपरागेषु संक्रान्तौ दर्शवासरे ॥ ८७ ॥
अयने विषुवे चैवव्यतीपाते युगादिषु। अन्येषु पुण्यकालेषु दद्याद् गोदानमुत्तमम् ॥ ८८ ॥
यदैव जायते श्रद्धा पात्रं सम्प्राप्यते यदा। स एष पुण्यकालः स्याद्यतः सम्पत्तिरस्थिरा ॥ ८९ ॥
अस्थिराणि शरीराणि विभवो नैव शाश्वतः। नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंचयः ॥ ९० ॥
आत्मवित्तानुसारेण तत्र दानमनन्तकम्। देयं विप्राय विदुषे स्वात्मनः श्रेय इच्छता ॥ ९१ ॥
अल्पेनापि हि वित्तेन स्वहस्तेनात्मना कृतम्। तदक्षय्यं भवेद्दानं तत्कालं चोपतिष्ठति ॥ ९२ ॥

गौदान गर्नु ॥ ८६ ॥ पुण्यकाल कुन् कुन् भने गंगादि तीर्थहरुमा, ब्राह्मण सत्पात्र मिलेका बखत, चन्द्र-सूर्य ग्रहण, संक्रान्ति, औंसी आदिमा ॥ ८७ ॥ र अयनफिरेमा मेष, कर्कट, तुला, मकर संक्रान्तिमा, व्यतिपात योगमा, अक्षय तृतीयादि अरु पुण्यकालमा उत्तम गौदान देवोस् ॥ ८८ ॥ जब आफ्नु श्रद्धा भयो अथवा आफ्ना पास सत्पात्र आये, सत्पात्र नेर पुगियो त्यहि पुण्यकाल भनिछ किनकि सम्पत्ति स्थिर न हुनाले ॥ ८९ ॥ अस्थिर छ, धन सँधै हुँदैन, काल नजिकै रहेको छ। यसै कारण धर्मको संचय छिटै गर्नु ॥ ९० ॥ आफ्ना धनानुसार बखतमा दान गरेको पुण्य अनन्त हुन्छ र आफ्नु कल्याणको इच्छा गर्नेले ज्ञानि विद्वान् ब्राह्मणमा दान दिनु ॥ ९१ ॥ आत्माका निमित्त आफ्ना हातैले थोरैभए पनि दानगर्नु। त्यो अक्षय पुण्य हुन्छ, जहाँ भने पनि तत्कालै पायिन्छ ॥ ९२ ॥ दान गरेको छ भने बाटामा सुख पूर्वक जान्छ,

ग० पु० गृहीतदानपाथेयः सुखं याति महाध्वनि। अन्यथा क्लिश्यते जन्तुः पाथेयरहितः पथि॥ ९३॥ अ०
यानि यानि च दानानि दत्तानि भुवि मानवैः। यमलोकपथे तानि ह्युपतिष्ठन्ति चाग्रतः॥ ९४॥
महापुण्यप्रभावेण मानुषं जन्म लभ्यते। यस्तत्प्राप्य चरेद्धर्मं स याति परमां गतिम्॥ ९५॥
अविज्ञाय नरो धर्मं दुःखमायाति याति च। मनुष्यजन्मसाफल्यं केवलं धर्मसेवनम्॥ ९६॥
धनपुत्रकलत्रादि शरीरमपि बान्धवाः। अनित्यं सर्वमेवेदं तस्माद्धर्मं समाचरेत्॥ ९७॥
तावद्बन्धुः पिता तावद्यावज्जीवति मानवः। मृतानामन्तरं ज्ञात्वा क्षणात्स्नेहो निवर्तते॥ ९८॥

दान गरेको छैन भने बाटामा अति दुःख पाऊँछ। जो धनछ वहाँको त्यहि रहन्छ॥ ९३॥ जो जो दान मनुष्यहरूले पृथ्वीमा गरेको छ त्योदान यमलोक जाने बाटोमा अगाड़ी मिली सुख पाउँछन्॥ ९४॥ ठूलो पुण्यको प्रभावले मनुष्य जन्म पाईन्छ यसै कारण जस्ले धर्म गरेकोछ सो जन परमगतिमा प्राप्त हुन्छ॥ ९५॥ अज्ञानि मनुष्य धर्म न जानि दुःखले जन्मदै मर्दै गर्छन्। मनुष्यजन्मको सफलता धर्म गर्नाले मात्र हुन्छ॥९६॥ धन, पुत्र, स्त्री आदि सबै अनित्य छन्। बान्धव पनि, शरीर पनि अनित्यै छ। संसारमा सबै अनित्यछन्। यस कारण धर्मको आचरण गर्नु॥ ९७॥ जहाँ सम्म शरीरमा प्राण रहन्छ, तहाँ सम्म मनुष्यको पिता बन्धु आदि छन्। मरे पछि एकै क्षणमा माया १००

ग० आत्मैव ह्यात्मनो बन्धुरिति विद्यान्मुहुर्मुहुः। जीवन्नपीति सञ्चिन्त्य मृतानां कः प्रदास्यति॥ ९९॥ अ०
पु० एवं जानन्निदं सर्वं स्वहस्तेनैव दीयताम्। अनित्यं जीवितं यस्मात्पश्चात्कोऽपि न दास्यति॥१००॥ अ०
मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ। विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति॥ १०१॥
गृहादर्था निवर्तन्ते श्मशानात्सर्वबान्धवाः। शुभाशुभं कृतं कर्म गच्छन्तमनुगच्छति॥ १०२॥
शरीरं वह्निना दग्धं कृतं कर्म सहास्थितम्। पुण्यं वा यदि वा पापंभुङ्क्ते सर्वत्र मानवः॥ १०३॥
न कोऽपि कस्यचिद्बन्धुः संसारे दुःखसागरे। आयाति कर्मसम्बन्धाद्याति कर्मक्षये पुनः॥ १०४॥

निवृत्ति हुन्छ॥ ९८॥ आफ्नु बन्धु केवल आत्मैमात्र हो भनि बारम्बार भनेका छन्। जीउँदैमा ता चिन्ता छ, मरे पछि कसले दिन्छ॥ ९९॥ यस्तो जानेर जो दान गरिन्छ आफ्नै हातले दान देवोस्। यो जीव बाँच्नु अनित्य छ। पछिबाटकोई दिने छैन॥ १००॥ मरे पछि शरीर धूलो र काठ समानभूमिमा रहन्छ। बान्धव सबै विमुख हुन्छन्। शरीर पनि छाड़ी साथमा धर्ममात्र जान्छ॥ १०१॥ जो कमायेको छ त्यो धन घरैमा रहन्छ बान्धवहरू श्मशान सम्म मात्र जान्छन् जो गरेको शुभाशुभ कर्म मात्र साथमा सहायभै मनुष्यका साथ जान्छन्॥ १०२॥ १०१
शरीर अग्निमा जल्दछ। गरिएको कर्म सहायभै पुण्य अथवा पाप मनुष्यहरु भोग्दछन्॥ १०३॥ दुःख संसार रूपि सागरमा कोहि बन्धुहरू

ग० पु०

मातृपितृसुतभ्रातृबन्धुदारादिसङ्गमः । प्रपायामिव जन्तूनां नद्यां काष्ठौघवच्चलः ॥ १०५ ॥
कस्य पुत्राश्च पौत्राश्च कस्य भार्या धनं च वा। संसारे नास्ति कः कस्य स्वयं तस्मात्प्रदीयताम् ॥ १०६ ॥
आत्मायत्तं धनं यायत्तावद्विप्रे समर्पयेत्। पराधीने धने जाते न किंचिद्वक्तुमुत्सहेत् ॥ १०७ ॥
पूर्वजन्मकृताद्दानादत्र लब्धं धनं बहु। तस्मादेवं परिज्ञाय धर्मार्थं दीयतां धनम् ॥ १०८ ॥
धर्मात्संजायतेऽर्थश्च धर्मात्कामोऽभिजायते। धर्म एवापवर्गाय तस्माद्धर्मं समाचरेत् ॥ १०९ ॥
श्रद्धया धार्यते धर्मो बहुभिर्नार्थराशिभिः। निष्किञ्चना हि मुनयः श्रद्धावन्तो दिवं गताः ॥ ११० ॥

पनि आफ्ना हुँदैनन्। कर्मका संबन्धले जन्म्यो, कर्म नाश भयो फेरि गयो ॥ १०४ ॥ माता, पिता, पुत्र, बन्धु, स्त्री ई सम्पूर्णको संगत जिवित छउञ्जेल मात्र हो नदीमा काठजस्तै भिन्ना भिन्नै बग्दछ आखीरमा आफ्ना २ कर्म भोग्दछन् ॥ १०५ ॥ यो संसारमा पुत्र कसका, पौत्र कसका, स्त्री कस्को धन कस्को? आफ्ना कोहि छैन। यसै कारण गर्ने दानादि आफैं गर्नु ॥ १०६ ॥ जहाँ सम्म आफ्ना अधीनमा धन रहन्छ त्यहाँ सम्म धन ब्राह्मणमा अर्पणगर्नु। पराधीन भएपछिता यसै हुन्छ भन्न सकिंदैन ॥ १०७ ॥ पूर्वजन्ममा दान गरेको हुनाले यसजन्ममा धन पाइयो यसकारण धर्मकाममा धनदान गरोस् ॥ १०८ ॥ धर्मले धन हुन्छ, धर्मदेखि कामना (ईच्छा) पूर्ण हुन्छ, धर्मले मोक्ष पनि हुन्छ र धर्म गरोस् ॥ १०९ ॥ धर्म श्रद्धाले मात्र हुन्छ धेरै धनले धर्महुँदैन। धनहीन मुनीहरु पनि श्रद्धा भक्तिले स्वर्ग गये ॥ ११० ॥ पत्र-पुष्प,

अ० अ० १०२

ग० पु०

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ १११ ॥
तस्मादवश्यं दातव्यं तदा दानं विधानतः। अल्पं वा बहुवेतीमां गणनां नैव कारयेत् ॥ ११२ ॥
धर्मात्मा च स पुत्रो वै दैवतैरपि पूज्यते। दापयेद्यस्तु दानानि पितरं ह्यातुरं भुवि ॥ ११३ ॥
पित्रोर्निमित्तं यद्वित्तं पुत्रैः पात्रे समर्पितम्। आत्मापि पावितस्तेन पुत्रपौत्रप्रपौत्रकैः ॥ ११४ ॥
पितुः शतगुणं पुण्यं सहस्रं मातुरेव च। भगिनीदशसाहस्रं सोदरे दत्तमक्षयम् ॥ ११५ ॥
न चैवोपद्रवा दार्तुर्न वा नरकयातनाः। मृत्युकालेन च भयं यमदूतसमुद्भवम् ॥ ११६ ॥

फल-जल चित्तमा भक्तिराखि चढ़ायो भने खुसी संग म खान्छु ॥ १११ ॥ त्यसै कारण विधिपूर्वक दान दिनु, थोरै-धेरैको गणना गरिदैन, भक्ति मात्र छ ॥ ११२ ॥ धर्मात्मा सुपुत्रलाई देवताहरूले पनि पूजा गर्दछन्, सत्पुत्रले पितादि आतुरभई पृथ्वीमा, देखि सबै दान गरोस् ॥ ११३ ॥ पितातिका निमित्त पुत्रले जो दान गर्छ तेस्ले आत्मा र पुत्रपौत्रादि सबैकुल पवित्र गरियो ॥ ११४ ॥ पिताका निमित्त दानको पुण्य सयगुण, माताको सहस्रगुणा बैनीको नाउँमा गरेमा दससहस्रगुणा, सहोदरका नाममा अक्षयफल मिल्दछ ॥ ११५ ॥ सम्पूर्ण आतुर दानादि गरी दियेको छ भने यम यातना मर्ने बखतमा र दूतहरूको दुःख पनि केहि हुँदैन। सुखैले धर्मलोक जान्छ ॥ ११६ ॥ हे गरुड! आतुर कालमा यदि लोभले

अ० अ० १०३

यदि लोभान्न यच्छन्ति काले ह्यातुरसंज्ञके। मृताः शोचन्ति ते सर्वे कदर्याः पापिनः खग॥ ११७॥
पुत्राः पौत्राः सह भ्रात्रा सगोत्राः सुहृदस्तु ये। यच्छन्ति नातुरे दानं ब्रह्मघ्नास्ते न संशयः॥ ११८॥

॥ इति श्रीगरुडपुराणे सारोद्धारे आतुरदाननिरूपणं नाम अष्टमोऽध्यायः॥ ८॥

दान गरेन भने मरे पछि नर्कमा शोक गर्छन्। ती पापिहुन्॥ ११७॥ पुत्र, पौत्र, भाई, सगोत्री, मित्र आदि जो छन् तिनले आतुर कालमा केहि दान गरेनन् भने निश्चय ब्रह्महत्या पाप लाग्दछ॥ ११८॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां अष्टमोऽध्यायः॥ ८॥

* अथ नवमोऽध्यायः *

श्रीगरुड उवाच —

कथितं भवता सम्यग्दानमातुरकालिकम्। म्रियमाणस्य तत्कृत्यं तदिदानीं वद प्रभो॥ १॥

श्रीभगवानुवाच —

शृणु तार्क्ष्य प्रवक्ष्यामि देहत्यागस्य तद्विधिम्। मृता येन विधानेन सद्गतिं यान्ति मानवाः॥ २॥
कर्मयोगाद्यदा देही मुञ्चत्यत्र निजं वपुः। तुलसीसन्निधौ कुर्यान्मण्डलं गोमयेन तु॥ ३॥
तिलांश्चैव विकीर्याथ दर्भांश्चैव विनिःक्षिपेत्। स्थापयेदासने शुभ्रे शालग्रामशिलां तदा॥ ४॥
शालिग्रामशिला यत्र पापदोषभयापहा। तत्सन्निधानमरणान्मुक्ति र्जन्तोः सुनिश्चिता॥ ५॥

गरुडजी फेरि सोध्नुभयो, हे प्रभो आतुरकालको कर्म भनि बक्सियोस्। अब मरीसके पछि पुत्रले के गर्नु पदछ, सो भनियोस्॥ १॥ भगवान् आज्ञागर्नु हुन्छ, हे गरुड, देहत्यागको विधि भन्छु सुन। जुनगर्नाले मनुष्यहरु मृतभै सद्गतिमा जान्छन्॥ २॥ कर्मका योगले प्राणछुट्ने बखतमा तुलसी मठको नजिकै गाईको गोबरले लिपि शुद्ध मण्डप बनाउनु॥ ३॥ त्यो मण्डपमा तिल छरी कुश ओच्छ्याई सेता कपडाले ढाकी शालिग्राम शिला स्थापना गर्नु॥ ४॥ ठूला २ पाप भए पनि शालीग्रामका नजिकमा मर्ने जन निश्चय मुक्ति हुन्छन्॥ ५॥

तुलसीविटपच्छाया यत्रास्ति भवतापहा। तत्रैव मरणान्मुक्तिः सर्वदा दानदुर्लभा॥ ६॥
तुलसीविटपस्थानं गृहे यस्यावतिष्ठते। तद्गृहं तीर्थरूपं हि न यान्ति यमकिङ्कराः॥ ७॥
तुलसीमञ्जरीयुक्तो यस्तु प्राणान्विमुञ्चति। यमस्तं नेक्षितुं शक्तो युक्तं पापशतैरपि॥ ८॥
तस्या दलं मुखे कृत्वा तिलदर्भासने मृतः। नरो विष्णुपुरं याति पुत्रहीनोऽप्यसंशयः॥ ९॥
तिलाः पवित्रास्त्रिविधा दर्भाश्च तुलसी तथा। नूनं निवारयन्त्येते दुर्गतिं यान्तमातुरम्॥ १०॥
मम स्वेदसमुद्भूता यतस्ते पावनास्तिलाः। असुरा दानवा दैत्या विद्रवन्ति तिलैस्ततः॥ ११॥

र तुलसीका छायाचित्र जो मनुष्यको प्राण छुट्नजान्छ, तेस्ले अवश्य मुक्ति पाउँछ। सर्व दान गर्दा पाई न सक्ने पुण्य तेस्कन मिल्न जान्छ॥ ६॥ जस्का घरमा तुलसीको मन्दिर छ त्यो घर तीर्थ हो। त्यहाँ यमराजका दूत जान सक्तैनन्॥ ७॥ तुलसीको मञ्जरी मुखमा राखी जस्को प्राण छुट्दछ तेस्को सयपाप भयेपनि यमराजले लैजान ता के हेर्न सक्तैनन्॥ ८॥ जोमनुष्यको मर्ने बखतमा तिल कुशका उपर बसी शालिग्रामको जल मुखमा परि प्राण छुट्छ त्यो मनुष्य पुत्रहीन भये पनि वैकुण्ठ जान्छ, संशय छैन॥ ९॥ तिल तीन प्रकारका र कुश तथा तुलसी आतुर कालमा दुर्गति नाश गर्ने हुन्॥ १०॥ मेरो पसीनादेखि उत्पन्न भयेका पवित्र तिल छन्। तिलका ऊपर मर्दामा असुर, दानव, दैत्य सबै भाग्दछन्, नजीक आउन सक्तैनन्॥ ११॥ हे गरुड! मेरा रोमदेखि उत्पन्न भयेको कुश मेरा विभूति हुन्। स्पर्श

दर्भा विभूतिर्मे तार्क्ष्य मम रोमसमुद्भवाः। तस्मात्तस्पर्शनादेव स्वर्गं गच्छन्ति मानवाः॥ १२॥
कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः। कुशाग्रे शङ्करो देवस्त्रयो देवाः कुशे स्थिताः॥ १३॥
अतः कुशावह्निमन्त्रतुलसीविप्रधेनवः। नैते निर्माल्यतां यान्ति क्रियमाणाः पुनः पुनः॥ १४॥
दर्भाःपिण्डेषु निर्माल्या ब्राह्मणाः प्रेतभोजने। मन्त्रा गौस्तुलसी हीनैः चितायां च हुताशनः॥ १५॥
गोमयेनोपलिप्ते तु दर्भास्तरणसंस्कृते। भूतले ह्यातुरं कुर्यादन्तरिक्षं विवर्जयेत्॥ १६॥
ब्रह्मा विष्णुश्च रुद्रश्च सर्वे देवा हुताशनः। मण्डलोपरि तिष्ठन्ति तस्मात्कुर्वीत मण्डलम्॥ १७॥
सर्वत्र वसुधा पूता लेपो यत्र न विद्यते। यत्र लेपः कृतस्तत्र पुनर्लेपेन शुध्यति॥ १८॥

गर्नाले मनुष्यहरु स्वर्गमा जान्छन्॥ १२॥ कुशको मूल ब्रह्माहुन्। मध्यमा विष्णु रहन्छन्। अग्रभागमा शिव रहन्छन्, कुशमा इ तीन देवता रहन्छन्॥ १३॥ यसै कारण कुश, अग्नि, मंत्र, तुलसी, ब्राह्मण गाई इ बार-बार काममा लगाउनु। इनले सँधै पवित्र गर्दछन्॥ १४॥ अपवित्र कति भने पिण्ड मनिको कुश, प्रेत भोजन खायेको ब्राह्मण, मंत्र, गौ, तुलसी नीचो जातिको, चिताको अग्नि अपवित्र हुन्॥ १५॥ गोबरले लीपि तिल कुश राशि मण्डल बनाउनु र आतुर लाई न लीपेका भूमि र अन्तरिक्षमा आतुरलाई न राख्नु॥ १६॥ ब्रह्मा विष्णु शिव सबै धौता अग्नि मण्डलमा रहन्छन् र मण्डल बनाउनु॥ १७॥ न लीपेको भूमि सबै पवित्र छन् जहाँ लिप्ने गरेको छ त्यहाँ लिपे मात्र शुद्ध

ग० पु० राक्षसाश्च पिशाचाश्च भूताः प्रेता यमानुगाः। अलिप्तदेशे खट्वायामन्तरिक्षे विशन्ति च॥ १९॥ न०
अतोऽग्निहोत्रं श्राद्धं च ब्रह्मभोज्यं सुरार्चनम्। मण्डलेन विना भूम्यामातुरं नैव कारयेत्॥ २०॥ अ०
लिप्तभूम्यामतः कृत्वा स्वर्णं रत्नं मुखे क्षिपेत्। विष्णोः पादोदकं दद्याच्छालिग्रामस्वरूपिणः॥ २१॥
शालिग्रामशिलातोयं यः पिबेद्विन्दुमात्रकम्। स सर्वपापनिर्मुक्तो वैकुण्ठभुवनं व्रजेत्॥ २२॥
ततो गङ्गाजलं दद्यान्महापातकनाशकम्। सर्वतीर्थकृतस्नानदानपुण्यफलप्रदम् ॥ २३॥
चान्द्रायणं चरेद्यस्तु सहस्रं कायशोधनम्। पिबेद्यश्चैव गंगाम्भः समौ स्यातामुभावपि॥ २४॥

हुन्छन्॥ १८॥ न लीपेको भूमिमा राक्षस, पिशाच, भूत प्रेत यमदूत आदि खाटमा अन्तक्षिमा रहन्छन् अलिप्त भूमि न पार्नु॥ १९॥ यसैले होम श्राद्ध ब्राह्मण भोजन देवता पूजागर्दा मण्डल बनाउनु, अन्तरिक्ष अलिप्त भूमि न पार्नु॥ २०॥ लीपि शुद्ध गरी मण्डलमा राखी सुन पंचरत्न शालीग्रामको जल मुखमा राखि दिनु विष्णु रूप शालीग्राम हुन्॥ २१॥ शालीग्रामको जल एक विन्दु मात्र पनि आतुर्कालमा पिएको छ भने कस्तै पापी भये पनि मुक्तभै वैकुण्ठमा जान्छन्॥ २२॥ मर्ने बेलामा गंगाजल पनि मुखमा राखिदिनु महापाप नाश भै सम्पूर्ण १०८
तीर्थ स्नानको पुण्य पाउँदछन्॥ २३॥ हजार चान्द्रायण व्रतगरी शरीर शुद्धहुने एक बार गंगाजल आचमन गर्नाले समानफल हुनेछ॥ २४॥

ग० पु० अग्निं प्राप्य यथा ताक्ष्र्यं तूलराशिर्विनश्यति। तथा गंगाम्बुपानेन पातकं भस्मसाद्भवेत्॥ २५॥ न०
यस्तु सूर्यांशुसन्तप्तं गंगायाः सलिलं पिबेत्। स सर्वयोनिविनिर्मुक्तः प्रयाति सदनं हरेः॥ २६॥ अ०
जलावगाहने नैव पावयन्तीतरा जनान्। दर्शनात्स्पर्शनात्पानात्तथा गङ्गेति कीर्तनात्॥ २७॥
पुनात्यपुण्यान्पुरुषान् शतशोऽथ सहस्रशः। गङ्गा तस्मात्पिबेत्तस्या जलं संसारतारकम्॥ २८॥
गङ्गा गङ्गेति यो ब्रूयात्प्राणैः कण्ठगतैरपि। मृतो विष्णुपुरं याति न पुनर्जायते भुवि॥ २९॥
उत्क्रामद्भिश्च यः प्राणः पुरुषः श्रद्धयाऽन्वितः। चिन्तयेन्मनसा गङ्गां सोऽपि याति परां गतिम्॥ ३०॥

हे गरुड! जस्तै रुईका राशिमा अग्नि पर्दा क्षणमा भस्म हुन्छ तेस्तै गंगाजल पिउनाले सम्पूर्ण पाप भस्म हुन्छन्॥ २५॥ जस्ले सूर्य किरणमा उडेको कण जति पनि गंगाजल पियेको छ त्यो सम्पूर्ण योनिदेखि मुक्त भै वैकुण्ड जानेछ॥ २६॥ अरु नदीमा स्नान गर्दा मात्र मनुष्य शुद्ध हुन्छन्। गंगाजीको दर्शन स्पर्शन नामैमात्र जपेमा पनि पवित्र हुन्छन्॥ २७॥ सय हजारौं पापी पुरुष पनि गंगा नाम जप्तैमा मुक्त भये भने संसार सागर तर्न इच्छा हुनेले गंगा जल पान गरोस्॥ २८॥ गंगा गंगा नाम प्राण कण्ठमा गयेको बेलामा जस्ले जप्तछन् ती मनुष्य वैकुण्ठ जाने छन्, तिन्ले, पृथ्वीमा फेरि जन्मनु पर्दैन॥ २९॥ जस् पुरुषले भक्ति श्रद्धाले युक्तभै प्राण निस्कने बेलामा १०९
१० मनमा गंगाजी संझ्यो भने त्यो पनि परमगतिमा प्राप्त हुन्छ॥ ३०॥ यसै कारण गंगाजीको ध्यान गर्नु, सम्झना गर्नु, गंगाजल पानगर्नु,

ग० पु०

अतो ध्यायेन्नमेद्गङ्गां संस्मरेत्तज्जलं पिबेत्। ततो भागवतं किञ्चिच्छृणुयान्मोक्षदायकम्॥ ३१॥
श्लोकं श्लोकार्धपादं वा योऽन्ते भागवतं पठेत्। न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कदाचन॥ ३२॥
वेदोपनिषदां पाठाच्छिवविष्णुस्तवादपि। ब्राह्मणक्षत्रियविशां मरणं मुक्तिदायकम्॥ ३३॥
प्राणप्रयाणसमये कुर्यादनशनं खग। दद्यादातुरसन्यासं विरक्तस्य द्विजन्मनः॥ ३४॥
संन्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि। मृतो विष्णुपुरं याति न पुनर्जायते भुवि॥ ३५॥
एवं जातविधानस्य धार्मिकस्य तदा खग। ऊर्ध्वच्छिद्रेण गच्छन्ति प्राणास्तस्य सुखेन हि॥ ३६॥
मुखं च चक्षुषी नासे कर्णौ द्वाराणि सप्त च। एभ्यः सुकृतिनो यान्ति योगिनस्तालुरन्ध्र॥ ३७॥

न० अ०

आतुमा भागवत सुन्नु मोक्ष हुन्छन्॥ ३१॥ एक श्लोक अथवा आधा श्लोक अन्त्य समयमा भागवत पाठ सुन्यो भने ब्रह्मलोकदेखि पृथ्वीमा जन्मनु पर्दैन॥ ३२॥ वेद, उपनिषद, शिव, विष्णुको स्तोत्र, ब्राह्मण, क्षत्रिय, वैश्यहरुलाई मर्दा मुक्ति दिनेहुन्॥ ३३॥ हे गरुड! प्राण जाने बखतमा अनशन व्रतगरी अन्न पानी न खावोस्, विरक्त द्विजातिलाई आतुरकालमा सन्यासदीक्षा दिनु॥ ३४॥ जो मनुष्य प्राण कण्ठमा गयेको वेलामा म सन्यास लिन्छु भन्छ त्यो पुरुष वैकुण्ठ जान्छ, तेस्ले पृथ्वीमा फेरि जन्मनु पर्दैन॥ ३५॥ हे गरुड! जो धर्मात्मा मनुष्य आतुर संन्यास लिन्छ, यस्ताको प्राण मुखदेखि उभोको स्थानबाट जान्छ॥ ३६॥ मुख, आँखा, नाक, कान इ सात द्वारबाट सुकृति

ग० पु०

अपानान्मिलितप्राणौ यदा हि भवतः पृथक्। सूक्ष्मीभूत्वा तदा वायुर्विनिष्क्रामति तत्तलात्॥ ३८॥
शरीरं पतते पश्चान्निर्गते मरुतीश्वरे। कालाहतं पतत्येव निराधारो यथा द्रुमः॥ ३९॥
निर्विचेष्टं शरीरं तु प्राणैर्मुक्तं जुगुप्सितम्। अस्पृश्यं जायते सद्यो दुर्गन्धं सर्वनिन्दितम्॥ ४०॥
त्रिधावस्था शरीरस्य कृमिविड्भस्मरूपतः। किं गर्वः क्रियते देहे क्षणविध्वंसिभिर्नरैः॥ ४१॥
पृथिव्या लीयते पृथ्वी आपश्चैव तथा जले। तेजस्तेजसि लीयेत समीरस्तु समीरणे॥ ४२॥
आकाशश्च यथाऽऽकाशे सर्वव्यापी च शङ्करः। नित्यमुक्तो जगत्साक्षी आत्मा देहेष्वजोऽमरः॥ ४३॥

न० अ०

जनको प्राण जान्छ, संन्यासी योगीको तालु रन्ध्रबाट प्राण जान्छ॥ ३७॥ प्राण अपान वायु नाभिमा मिली सूक्ष्मभै जस्तै जरा काटेको वृक्ष गीर्दछन् सोहिरीत शरीरदेखि प्राण छुट्दछ॥ ३८॥ प्राण शरीरदेखि निस्के पछी शरीर पृथ्वीमा गीर्नजान्छ॥ ३९॥ प्राणछुटे पछि शरीर चेष्टाले रहित हुन्छ। छुन पनि अयोग्य हुन्छ। छीटैनै दुर्गन्धभै सर्व निन्दित हुन्छ॥ ४०॥ कीरा, विष्टा, भस्म मरे पछि शरीरका तीन अवस्था छन्। मनुष्यले के गर्व गर्नु, यो क्षण मै नाश हुने देह छ॥ ४१॥ पृथिव्यादि पाँचतत्त्वले बनीयेको यो शरीर हो, यो मरे पछि पृथ्वीको अंश पृथ्वीमा, तेजको तेजमा, वायुको वायुमा लीन हुन्छन्॥ ४२॥ आकाशको आकाशमा, शंकर जो छन् सो सम्पूर्णमा व्यापक छन्, आत्मा जो छ नित्यमुक्त जगतमा साक्षीभै रहेको कैल्हे न मर्ने अमर छ॥ ४३॥ जीव जो छ सबै इन्द्रियले युक्तभयेको, शब्दादि विषयले

सर्वेन्द्रिययुतो जीव: शब्दादिविषयैर्वृत:। कामरागादिभिर्युक्त: कर्मकोशसमन्वित: ॥ ४४॥
पुण्यवासनया युक्तो निर्मिते स्वेन कर्मणा। प्रविशेत्स नवे देहे गृहे दग्धे यथा गृही॥ ४५॥
तदा विमानदाय किंकिणीजालमालिमत्। आयान्ति देवदूताश्च लसच्चामरशोभिता: ॥ ४६॥
धर्मतत्वविद: प्राज्ञा सदा धार्मिकवल्लभा:। तदैनं कृत्यकृत्यं स्वविमानेन नयन्ति ते॥ ४७॥
सुदिव्यदेहो विरजाम्बरस्त्रक्सुवर्णरत्नाभरणैरुपेत:। दानप्रभावात्स महानुभाव: प्राप्नोति नाकं सुरपूज्यमान: ॥ ४८॥

॥ इति श्रीगरुडपुराणे सारोद्धारे म्रियमाणकृत्यनिरूपणं नाम नवमोऽध्याय: ॥ ९॥

ढाकियेको, काम राग र तृष्णादिले युक्त भयेको, यो शरीर कर्मको कोश हो॥ ४४॥ पुण्यको वासनाले युक्तभएको आफ्ना कर्मले अर्को शरीरमा जस्तै घर डढेमा अर्को घरबनाई बस्छन्, प्रवेशहुन्छ॥ ४५॥ जो धर्मात्मा छन्, तिनलाई लिन किंकिणी आदिका मालाले शोभायमान भयेको चामर डोलाउँदै पुष्पविमान ली आउछन्॥ ४६॥ धर्मको तत्त्व जान्ने धर्मात्मालाई धर्मको प्याराभै देवताका दूतले विमानमा राखि स्वर्गमा लैजान्छन्॥ ४७॥ सुन्दर दिव्य देवताको रूप धारि उत्तम वस्त्र पहिरि, रत्नले जडायेको गहनालाई दान गरेको प्रभावले महानुभाव जो छन् ती स्वर्गमा गै देवताले पूजागरी शोभा पाउँछन्॥ ४८॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां नवमोऽध्याय:॥ ९॥

* अथ दशमोऽध्याय: *

गरुड उवाच—

देहदाहविधानं च विभो सुकृतिनां वद। सती यदि भवेत्पत्नी तस्याश्च महिमां वद॥ १॥

श्रीभगवानुवाच—

श्रृणु तार्क्ष्य प्रवक्ष्यामि सर्वमेवौर्ध्वदेहिकम्। यत्कृत्वा पुत्रपौत्राश्च मुच्यन्ते पैतृकादृणात्॥ २॥
किं दत्तैर्बहुभिर्दानै: पित्रोरन्त्येष्टिमाचरेत्। तेनाग्निष्टोमसदृशं पुत्र: फलमवाप्नुयात् ॥ ३॥
तदा शोकं परित्यज्य कारयेन्मुण्डनं सुत:। समस्तबान्धवैश्चैव विधेयं मुण्डनं तदा ॥ ४॥

गरुडजी फेरि सोध्नु हुन्छ, हे प्रभो! मर्दा गर्ने कर्म सुनें, अब मरे पछि दाह कुन विधिले गर्नु सो भनियोस्, सती यदिभये तिन्को महिमा पनि बताइयोस्, यो सुन्नेको ईच्छा छ॥ १॥ **श्री भगवान् आज्ञागर्नु हुन्छ,** हे गरुड! सुन औध्व देहिक कर्म भनिन्छ, जो गर्नाले पुत्र पौत्रादि पितृ ऋणदेखि छुट्तछन्॥२॥ धेरै दान गर्नाले के हुन्छ, माता-पिताको अन्त्येष्टि कर्म गर्दिनाले अग्निष्टोम यज्ञ गरे समानको फलमिल्छ॥३॥ आतुर दानादि गरी पछिबाट शोक त्यागी पुत्रले मुण्डन गरोस्, तथा सम्पूर्ण बान्धवहरूले पनि मुण्डन गरून्॥४॥

मातापित्रोर्मृतौ येन कारितं मुंडनं नहि। आत्मजः सः कथं ज्ञेयः संसारार्णवतारकः॥ ५॥
अतोमुंडनमावश्यं नखकुक्षिविवर्जितम्। ततः सबान्धवः स्नात्वा धौतवस्त्राणि धारयेत्॥ ६॥
सद्यो जलं समानीय ततस्तं स्नापयेच्छवम्। मण्डयेच्चन्दनैः स्त्रग्भिर्गङ्गामृत्तिकयाऽथवा॥ ७॥
नवीनवस्त्रैः सञ्छाद्य तदा पिण्डं सदक्षिणम्। नामगोत्रे समुच्चार्य संकल्पेनापसव्यतः॥ ८॥
मृत्युस्थाने शवो नाम तस्य नाम्ना प्रदापयेत्। तेन भूमिर्भवेत् तुष्टा तदधिष्ठातृदेवताः॥ ९॥
द्वारदेशे भवेत् पान्थस्तस्य नाम्ना प्रदापयेत्। तेन नैवोपघाताय भूतकोटिषु दुर्गताः॥ १०॥
ततः प्रदक्षिणां कृत्वा पूजनीयः स्नुषादिभिः। स्कन्धः पुत्रेण दातव्यस्तदान्यैर्बान्धवैः सह॥ ११॥

मातापिता मर्दामा मुण्डन जस्ले गरेन त्यो छोरै भयेन। सन्सारमा त्यो पुत्र कसरि हुन्छ॥ ५॥ यसै कारण पुत्रले मुण्डन गर्नु आवश्यक छ। नँग काखी न काटोस्। पछि बान्धवले सहित स्नानगरि शुद्ध वस्त्र लाउनु॥ ६॥ शुद्धजल ल्याई मृतकलाई स्नान गराउनु। चन्दन र चन्दन माला पहिराई गंगामाटी गोपी चन्दन आदि लगाई दिनू॥ ७॥ मृतकलाई नयाँ वस्त्रले ढाकी अपसव्यभै नाम गोत्र उच्चारण गरी दक्षिणा सहित पिण्डदेवोस्॥ ८॥ मृत्युस्थानमा स्नान संकल्पगरि पिण्ड दिनु, त्यो पिण्ड दिनाले भूमिको अधिष्टातृ देवता खुसी हुन्छन्॥ ९॥ द्वारस्थानमा पान्थनामले पिण्ड देवोस्। त्यो पिण्ड दिनाले दुर्गति गराउने भूतगणले उपघात गर्दैनन्। ती भूत अगति भै रहेका हुन्॥ १०॥ त्यहाँदेखि वधूसहित पुत्रादिले प्रदक्षिणा पूजा गरी पुत्रले उठाई काँधमा राखोस्। पछि बान्धवले सहित श्मशानमा लैजाऊन॥ ११॥

धृत्वा स्कन्धे स्वपितरं यःश्मशानाय गच्छति। सोऽश्वमेधफलं पुत्रो लभते च पदे पदे॥ १२॥
नीत्वा स्कंधे स्वपृष्टे वा सदा तातेन लालितः। तदैव तदृणान्मुच्येन्मृतं स्वपितरं वहेत्॥ १३॥
ततोऽर्धमार्गे विश्रामं सम्प्राप्यार्भ्युक्ष्य कारयेत्। संस्नाप्य भूतसंज्ञाय तस्मै तेन प्रदापयेत्॥ १४॥
पिशाचा राक्षसा यक्षा ये चान्ये दिक्षु संस्थिताः। तस्य होतव्यदेहस्य नैवायोग्यत्वकारकाः॥ १५॥
ततो नीत्वा श्मशानेषु स्थापयेदुत्तरामुखम्। तत्र देहस्य दाहार्थं स्थलं संशोधयेद्यथा॥ १६॥
संमार्ज्य भूमिं संलिप्योल्लिख्योदधृत्य च वेदिकाम्। अभ्युक्ष्योपसमाधाय वह्निं तत्र विधानतः॥ १७॥

जो पुत्र माता पितालाई काँधमा बोकी श्मशानमा लैजान्छ, तेस् पुत्रले पाउपाउ हिडेको अश्वमेध यज्ञको फल पाउँछ॥ १२॥ सँधै लालना गरी पालने माता पिता मरेपछि काँधमा पीठमा बोकी लैजान्छ भने पितृ ऋणदेखि पुत्रहरू तत्काल छुट्छन्॥ १३॥ तेति भैसके उप्रान्त आधा बाटामा विश्रामगरि भूमिशुद्धगरि भूतनामले प्रेतपिण्ड देवोस्॥ १४॥ तेस्ले पिशाच, राक्षस, यक्ष आदि सबै दिशामा रहने प्रेतादि खुशीभै मृतकलाई दुःख दिदैनन्। विश्राममा पिण्डदियेन भने पिशाचादिले मृतकलाई दुःख दिन्छन्॥ १५॥ त्यतिगरि श्मशानमा लगि उत्तरा मुखगरि राखि मृतक जलाउने स्थान बढिया प्रकारले बनाओस्॥ १६॥ भूमि बढारि, गोवर आदिले लिपी, कुशले रेखागरि बीचमा अनामिका अंकुष्टले उद्धृत्य गरि जल शेचनगरि, शुद्धपारि क्रव्याद नामक अग्नि विधिपूर्वक स्थापना गर्नु॥ १७॥

ग० पु० द० अ०

पुष्पाक्षतैरथाभ्यर्च्य देवं क्रव्यादसंज्ञकम्। लोमभ्यस्त्वनुवाकेन होमं कुर्याद्यथाविधि॥ १८॥
त्वं भूतभृज्जगद्योनिस्त्वं भूतपरिपालकः। मृतः सांसारिकस्तस्मादेनं त्वं स्वर्गतिं नय॥ १९॥
इति संप्रार्थयित्वाऽग्निं चितां तत्रैव कारयेत्। श्रीखण्डतुलसीकाष्ठैः पलाशाश्वत्थदारुभिः॥ २०॥
चितामारोप्य तं प्रेतं पिण्डौ द्वौ तत्र दापयेत्।
चितायां शवहस्ते च प्रेतनाम्ना खगेश्वर। चितामोक्षप्रभृतिकं प्रेतत्वमुपजायते॥ २१॥
केऽपि तं साधकं प्राहुःप्रेतकल्पविदो जनाः। चितायां तेन नाम्ना वा प्रेतनाम्नाऽथवा करे॥ २२॥

पुष्पाक्षतादिले क्रव्यादनाम अग्नये नमः भनि पूजागरि लोमभ्यःस्वाहा भन्ने मंत्रले विधि सँग होमगर्नु॥ १८॥ तिमिनै मृतप्राणि धारण गर्छौ, पालनागर्छौ, जगतको उत्पत्ति स्थान हौ, ई सांसारिक मृतकलाई स्वर्गगतिमा प्राप्त गरिदेउ॥ १९॥ यस्ता प्रकारले अग्निमा प्रार्थनागरि त्यही श्रीखण्ड, तुलसी, पलाश, पिपल, आदिका दाउराको चिता बनाउनू॥ २०॥ हे गरुड! मृतकलाई चितामा राखि प्रेतनामले दुई पिण्ड दिनु। चितामा चढाएपछि सपिण्डी नहुञ्जले प्रेतनाम हुन्छ॥ २१॥ कोहि प्रेतकल्प जान्ने जनहरु साधक नाम पनि भन्छन्। साधकनामले अथवा प्रेतनामले २ हातमा २ पिण्डदिनु॥ २२॥ ई पाँचपिण्ड दियेपछि मूर्दा जलाउन योग्य हुन्छ।

ग० पु० द० अ०

इत्येवं पञ्चभिः पिण्डैः शवस्याहुतियोग्यता। अन्यथा चोपघाताय पूर्वोक्तास्ते भवन्ति हि॥ २३॥
प्रेतं दत्त्वा पञ्च पिण्डान् हुतमादाय तं तृणैः। अग्निं पुत्रस्तदा दद्यान्न भवेत्पञ्चकं यदि॥ २४॥
पञ्चकेषु मृतो यस्तु न गतिं लभते नरः। दाहस्तत्र न कर्तव्यः कृतेऽन्यमरणं भवेत्॥ २५॥
आदौ कृत्वा धनिष्ठार्धमेतन्नक्षत्रपञ्चकम्। रेवत्यन्तं न दाहेत्तं दाहे च न शुभं भवेत्॥ २६॥
गृहे हानिर्भवेत्तस्य ऋक्षेष्वेषु मृतो हि यः। पुत्राणां गोत्रिणां चापि कश्चिद्विघ्नः प्रजायते॥ २७॥
अथवा ऋक्षमध्ये हि दाहः स्याद्विधिपूर्वकः। तद्विधिं ते प्रवक्ष्यामि सर्वदोषप्रशान्तये॥ २८॥
शवस्य निकटे तार्क्ष्य निःक्षिपेत्पुत्तलांस्तदा। दर्भमयांश्च चतुर ऋक्षमन्त्राभिमन्त्रितान्॥ २९॥

यदि ५ पिण्ड भयेन पहिले भने मुताबिक भूतले दुःख दिन्छन्॥ २३॥ प्रेतलाई ५ पिण्ड दिई होम गरेको अग्नि तृणमा [illegible] यदि पञ्चक छैन भने अग्निदेवोस्॥ २४॥ पञ्चकमा मर्ने मनुष्यले गति पाँउदैन। त्यो मृतक दाह न गर्नु, दाहगरे घरमा अर्को मरण हुन्छ॥ २५॥ पञ्चक कति हुन् भने आधा धनेष्टादेखि रेवती नक्षत्रसम्म पञ्चकहुन्, इ नक्षत्रमा दाह गरे अशुभ हुन्छ॥ २६॥ जो मृतको ई ५ नक्षत्रमा दाहगरेको छ भने घरमा हानि पुत्र कोहिमा विघ्न अवश्य हुनेछ॥ २७॥ अतएव पञ्चकमा दाह विधिसित गर्नु। अब दोष शान्तिनि[illegible] तिमीलाई भन्छु सुन॥ २८॥ हे गरुड! मूर्दाका नजिकमा पुत्तला बनाई राखिदिनु। कुशको चार पुत्तला नक्षत्र नामले बनाई मूर्दा [illegible]

ततो होमः प्रकर्त्तव्यः वहन्ति ऋक्षनामभिः। ''प्रेताजयत'' मन्त्रेण पुनर्होमस्तु संपुटैः ॥ ३० ॥
ततो दाहः प्रकर्त्तव्यस्तैश्च पुत्तलकैः सह। सपिण्डदिवसे कुर्यात्तस्य शान्तिविधिं सुतः ॥ ३१ ॥
तिलपात्रं हिरण्यं च रूप्यं रत्नं यथाक्रमम्। घृतपूर्णं कांस्यपात्रं दद्याद्दोषप्रशान्तये ॥ ३२ ॥
एवं शान्तिविधानं तु कृत्वा दाहं करोति यः। न तस्य विघ्नो जायेत प्रेतो याति पराङ्गतिम् ॥ ३३ ॥
एवं पञ्चकदाहः स्यात्तद्विना केवलं दहेत्। सती यदि भवेत्पत्नी तया सह विनिर्दहेत् ॥ ३४ ॥
पतिव्रता यदा नारी भर्तुः प्रियहिते रता। इच्छेत्सहैव गमनं तदा स्नानं समाचरेत् ॥ ३५ ॥

एक एक गरि राखीदिनु ॥ २९ ॥ त्यस पछि नक्षत्रनाम प्रेतनाम संग प्रेताजयत मन्त्रले पाँचै नक्षत्रको संपुटी होमगर्नु ॥ ३० ॥ यतिगरि पुत्तला सँगै दाहगर्नू र सपिण्डी गरेका दिन पुत्रले विधिपूर्वक शान्ति गरिदिनू ॥ ३१ ॥ तिलपात्र, सुन, रत्न, चाँदी यथाक्रमैले घिउले पूर्ण काँस्यपात्र सपिण्डीका दिन पञ्चक दोष शान्तिका निमित्त दान गरोस् ॥ ३२ ॥ यस्ता प्रकारको विधान सँग शान्तिगरि दाह गऱ्यो भने विघ्न पनि हुँदैन, प्रेत पनि परमगतिमा प्राप्त हुन्छन् ॥ ३३ ॥ यो कर्म गरेर मात्र दाह गर्नु, शान्ति न गरि दान न गर्नू। यदि पत्नी सती हुने छन् भने ता पत्नीका सँगै दाह गरेमा दोष लाग्दै ॥ ३४ ॥ जो स्त्री पतिव्रता छन् स्वामिको अति हितकारि छन् स्वामिका साथ जाने इच्छा गर्ने भये हरे राम भनी स्नान गरुन् ॥ ३५ ॥ स्नानगरि शुद्ध भै कुंकुम, गाजल, सिंदुर, वस्त्र, गहनाले शरीर शोभित भै ब्राह्मणलाई दान दिनु, र

कुंकुमांजनसद्वस्त्रैर्भूषणैर्भूषितां तनुम्। दानं दद्याद्द्विजातिभ्यो बंधुवर्गेभ्य एव च ॥ ३६ ॥
गुरुं नमस्कृत्य तदा निर्गच्छेन्मन्दिराद्बहिः। ततो देवालयं गत्वा भक्त्या तं प्रणमेद्धरिम् ॥ ३७ ॥
समर्प्याभरणं तत्र श्रीफलं परिगृह्य च। लज्जां मोहं परित्यज्य श्मशानभवनं व्रजेत् ॥ ३८ ॥
तत्र सूर्यं नमस्कृत्य परिक्रम्य चितां तदा। पुष्पशय्यां तदारोहेन्निजांके स्वापयेत्पतिम् ॥ ३९ ॥
सखिभ्यः श्रीफलं दद्याद्दाहमाज्ञापयेत्ततः। गंगास्नानसमं ज्ञात्वा शरीरं परिदाहयेत् ॥ ४० ॥
न दहेद् गर्भिणी नारी शरीरं पतिना सह। जनयित्वा प्रसूतिं च बालं पोष्य सती भवेत् ॥ ४१ ॥

बन्धुवर्गलाई पनि दिनु ॥ ३६ ॥ दान सम्पूर्णगरि गुरूलाई नमस्कार गर्नु र घरदेखि बाहिर मन्दिरमा गई हरिलाई भक्तिले नमस्कार गर्नु ॥ ३७ ॥ त्यहाँ सबै गहना अर्पण गरी श्रीफल (नरिवल) हातमा लिई मोह र लज्जा त्यागी मृत स्वामिका साथ श्मशानमा जावोस् ॥ ३८ ॥ श्मशानमा गई सूर्यलाई नमस्कार गर्दै चिताको प्रदक्षिणा गरी पुष्पशैय्या समान चितामा चढी पतिलाई आफ्ना काखमा सुताओस् ॥ ३९ ॥ सखीहरुलाई नरिवल दोई, अग्नि लगाईदेठभनि आज्ञा देवोस्, यतिगरे सतीलाई अग्नि गंगाजन समान हुन्छ, डाहा हुँदैन ॥ ४० ॥ गर्भिणी स्त्री स्वामिका साथ न जलुन्, गर्भलाई पैदा गरेर बालक पाल्दापनि सतीनै समान हुन्छन् ॥ ४१ ॥ स्त्रीहरु जो छन् पतिका साथ

नारी भर्तारमासाद्य शरीरं दहते यदि। अग्निर्दहति गात्राणि नैवात्मानं प्रपीडयेत्॥ ४२॥
दह्यते ध्मायमानानां धातूनां च यथा मलः। तथा नारी दहेत्पापं हुताशे ह्यमृतोपमे॥ ४३॥
दिव्यादौ सत्ययुक्तश्च शुद्धौ धर्मयुतो नरः। यथा न दह्यते तप्तलोहपिण्डेन कर्हिचित्॥ ४४॥
तथा सा पतिसंयुक्ता दह्यते न कदाचन। अन्तरात्मात्मना भर्त्रा मृतेनैकत्वमागता॥ ४५॥
यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत्। तावन्न मुच्यते सा हि स्त्री शरीरात्कथञ्चन॥ ४६॥
तस्मात्सर्वप्रयत्नेन स्वपतिं सेवयेत्सदा। कर्मणा मनसा वाचा पत्यौ जीवति तद्गता॥ ४७॥
मृते भर्त्तरि या नारी समारोहेद्धुताशनम्। साऽरुन्धतीसमा भूत्वा स्वर्गलोके महीयते॥ ४८॥

सतीभै शरीर जलाऊँछे भने शरीर मात्र जल्दछ, पीड़ा कत्तीपनि हुँदैन॥ ४२॥ जस्तै धातु जलाउँदा मैलो साफ हुन्छ, तेस्तै नारीहरु स्वामिका साथ सती भई जले पापदेखि शुद्ध हुन्छन्॥ ४३॥ शपथ आदिमा सत्ययुक्तभै जो मनुष्य रहेका छन् तिनलाई तताएको फलामले पनि केहि गर्दैन॥ ४४॥ स्त्रीले पतिका साथ जल्दा कष्ट हुँदैन, अन्तरात्मा स्वामिका साथ एकै हुन्छ॥ ४५॥ आफ्ना पति मरेमा जो स्त्री सतिभै जल्दैनन्, तिनी स्त्रीहरु स्त्री शरीर देखि कैल्यै मुक्त हुँदैनन्॥ ४६॥ यसै कारण स्त्रीहरुले स्वामिको सेवा यत्नपूर्वक गरुन्। कर्मले
मनले वचनले जीवितमा सेवा गरी पछी मरेमा सतीभै शुभगतिमा प्राप्त हउन्॥ ४७॥ स्वामी मरेमा जो स्त्री स्वामीका साथ अग्निमा प्रवेश

तत्र सा भर्तृसहिता स्तूयमानाऽप्सरोगणैः। रमते पतिना सार्धं यावदिन्द्राश्चतुर्दश॥ ४९॥
मातृकं पैतृकं चैव यत्र सा च प्रतीयते। कुलत्रयं पुनात्यत्र भर्तारं याऽनुगच्छसि॥ ५०॥
तिस्रः कोट्योऽर्द्धकोटी च यानि रोमाणि मानुषे। तावत्कालं वसेत्स्वर्गे पतिना सह मोदते॥ ५१॥
विमाने सूर्यसंकाशे क्रीडते रमणेन सा। यावदादित्यचन्द्रौ च स्वर्गलोके चिरं वसेत्॥ ५२॥
पुनश्चिरायुः सा भूत्वा जायते विमले कुले। पतिव्रता तु या नारी तमेव लभते पतिम्॥ ५३॥
या क्षणं दाहदुःखेन सुखमेतादृशं त्यजेत्। सा मूढा जन्मपर्यन्तं दह्यते विरहाग्निना॥ ५४॥

हुन्छे त्यो अरुन्धती समानभै धेरैकाल स्वर्ग भोग्न पाउँदछन्॥ ४८॥ स्वर्गमा गै स्वामि सँग अती शोभा पाई अप्सरा गणले स्तुती पूजा गरिएको चौध इन्द्रको राज्य सम्म साथ सती हुन्छन् स्वर्गमा बस्न पाउँछन्॥ ४९॥ ती जो स्त्री पतिका र स्त्रीका माता पिता तीन कुल र स्वामिको तीनकुल पवित्र गराउँछन्॥ ५०॥ तीनकोटी पचास लाख मनुष्यको शरीरमा रोम हुन्छन्, त्यति वर्षसम्म पतीका सँग स्वर्गमा बस्न पाउँछन्॥ ५१॥ सूर्य समान कान्तिले शोभापाई पतिको संग विमानमा बसी क्रीड़ा गर्दछन्, जहाँ संम चन्द्र सूर्य प्रकाशमान हुन्छन्,
 तहाँ सम्म स्वर्गमा बस्दछन्॥ ५२॥ फेरि ठूला निर्मल कुलमा रुपवान् चिरायु भई जन्मी ती दुवै फेरि स्त्री पुरुष हुन्छन् र उहिनै पति
पाउँछन्॥ ५३॥ एक क्षणको दुःखले यत्रो सुख ठूलो त्यागने स्त्री मूढ़ हुन्, ती जन्म भर दुःख पाई विरहले जल्दछन्॥ ५४॥ हे गरुड!

तस्मात्पतिं शिवं ज्ञात्वा सह तेन दहेत्तनुम्। यदि न स्यात्सती तार्क्ष्य तमेव प्रदहेत्तदा॥ ५५॥
अर्धे दग्धेऽथवा पूर्णे स्फोटयेत्तस्य मस्तकम्। गृहस्थानां तु काष्ठेन यतीनां श्रीफलेन च॥ ५६॥
प्राप्तये पितृलोकानां भित्वा तद्ब्रह्मरन्ध्रकम्। आज्याहुतिं ततो दद्यान्मन्त्रेणानेन तत्सुतः॥ ५७॥
अकारादभिजातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावकः॥ ५८॥
एवमाज्याहुतिं दत्त्वा तिलमिश्रां समन्त्रकाम्। रोदितव्यं ततो गाढं तेन तस्य सुखं भवेत्॥ ५९॥
दाहादनन्तरं कार्यं स्त्रीभिः स्नानं ततः सुतैः। तिलोदकं ततो दद्यान्नामगोत्रोपकल्पितम्॥ ६०॥
प्राशयेन्निम्बपत्राणि मृतकस्य गुणान्वदेत्। स्त्रीजनोऽग्रे गृहं गच्छेत्पृष्ठतो नरसञ्चयः॥ ६१॥

यसकारण पति शिवै समान जानि पतिको साथ शरीर जलाउनु। यदि सती न भए पूर्व भने बमोजिम दाह गर्नु॥ ५५॥ आधा जले पछि मूर्दाको शिर फोरिदिनु, गृहस्थिको काठले, योगिको श्रीफल (नरीवल) लेँ फोरिदिनु॥ ५६॥ ब्रह्मलोक प्राप्तिका निमित्त ब्रहारन्ध्र भेद गर्दिनु र यो मन्त्र भनि छोराले घिउको आहुतिदिनू॥ ५७॥ हे पावक? तिमी वासुदेवदेखि उत्पन्न भयेका (अकारो वासुदेवः स्यात्) यस वचनले, स्थूलदेह हाम्रा मृतकलाई खुशी सँग जलाई स्वर्ग लै जाउ॥ ५८॥ यो मन्त्र पढ़ी घिउ तिलको आहुति दिई खुब रोई दिनु, रूनाले मृतकलाई सुख हुन्छ॥ ५९॥ दाह गरिसके पछी पहिले स्त्रीहरुले, पुत्रले स्नान गर्नु र गोत्र उच्चारणगरि तिल जल अञ्जलि दिउन्॥ ६०॥

गृहे स्नानं पुनः कृत्वा गोग्रासं च प्रदापयेत्। पत्रावल्यां च भुञ्जीयाद् गृहान्नं नैव भक्षयेत्॥ ६२॥
मृतकस्थानमालिप्य दक्षिणाभिमुखं ततः। द्वादशाहकपर्यन्तं दीपं कुर्यादहर्निशम्॥ ६३॥
सूर्येऽस्तमागते तार्क्ष्य श्मशाने वा चतुष्पथे। दुग्धं च मृण्मये पात्रे तोयं दद्याद्दिनत्रयम्॥ ६४॥
अपक्वमृण्मयं पात्रं क्षीरनीरप्रपूरितम्। काष्ठत्रयं गुणैर्बद्धं धृत्वा मन्त्रं पठेदिमम्॥ ६५॥
श्मशानानलदग्धोऽसि परित्यक्तोऽसि बान्धवैः। इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिब॥ ६६॥
चतुर्थे सञ्चयः कार्यः साग्निकैश्च निरग्निकैः। तृतीयेऽह्नि द्वितीये वा कर्तव्यश्चाविरोधतः॥ ६७॥

नीमको पत्रखाई मृतकको गुण गानगर्दै स्त्रीहरु अघि, पुरुष पछि लागी घरमा आउन्॥ ६१॥ घरमा गई फेरि स्नानगरि गोग्रास दिई पात्रमा भोजन खाँउन्, मृतकका घरको अन्न न खानू॥ ६२॥ मृत भयेको स्थान लिपी शुद्धगरि दक्षिण मुखभै द्वादशदिन सम्म रात दिन दीप बालून्॥६३॥ हे गरुड! सूर्यास्त भयेमा श्मशान अथवा, चौबाटामा दूध, पानी माटाको भाड़ामा तीन दिन सम्म देवोस्॥ ६४॥ काँचोमाटोको पात्रमा दूध पानीले भरी तृकाठी बनाई त्यसैका उपर राखी यो मन्त्र पढोस्॥ ६५॥ श्मशानमा क्रव्याद नाम अग्निले जलेका सबै बान्धवले त्यागीयेको हे प्रेत! यो जल हो स्नान गर, यो दूध हो पान गर॥ ६६॥ अग्निहोत्री पुरुषको चार दिनमा अस्थी संचय श्राद्ध गर्नु, अरूको तीन दिन अथवा दुई दिनमा गर्नु, यदि पञ्चक शनिवारमा परेको छैन भने॥ ६७॥ श्मशान भूमिमा गै स्नान गरि शुद्ध हुनु र ऊर्णा सूत्रले

गत्वा श्मशानभूमिं च स्नानं कृत्वा शुचिर्भवेत्। ऊर्णासूत्रं वेष्टयित्वा पवित्रीं परिधाय च॥ ६८॥
दद्यात् श्मशानवासिभ्यस्ततो माषबलिं सुतः। यमाय त्वेति मन्त्रेण तिस्रः कुर्यात्परिक्रमाः॥ ६९॥
ततो दुग्धेन चाभ्युक्ष्य चितास्थानं खगेश्वर। जलेन सेचयेत्पश्चादुद्धरेदस्थिवृन्दकम्॥ ७०॥
कृत्वा पलाशपत्रेषु क्षालयेद्दुग्धवारिभिः। संस्थाप्य मृण्मये पात्रे श्राद्धं कुर्याद्यथाविधि॥ ७१॥
त्रिकोणं स्थण्डिलं कृत्वा गोमयेनोपलेपितम्। दक्षिणाभिमुखो दिक्षु दद्यात्पिण्डत्रयं त्रिषु॥ ७२॥
पुञ्जीकृत्य चिताभस्म तत्र धृत्वा त्रिपादुकाम्। स्थापयेत्तत्र सजलमनाच्छाद्य सुखं घटम्॥ ७३॥
ततस्तण्डुलपाकेन दधिघृतसमन्वितम्। बलिं प्रेताय सजलं दद्यान्मिष्टं यथाविधि॥ ७४॥

बेरी पवित्र धारण गर्नू॥ ६८॥ श्मशानवासी भूतहरुलाई पुत्रले माषबली देवोस्, यमायत्वा भन्ने मन्त्रले तीन पल्ट बाँया प्रदक्षिणा गरोस्॥ ६९॥ हे गरुड! चितास्थानमा दूधले सेचनगरि पानीले पनि सेचन गरी अस्थी हातमा लिई॥ ७०॥ त्यो अस्थि पलासका पत्रमा राखि दूध जलले पखाली काँचो माटोको हण्डीमा राखि विधि पूर्वक अस्थि सञ्चय श्राद्ध गरोस्॥ ७१॥ दक्षिण पश्चिम उत्तर त्रिकोण बनाई गोबरले लिपी दक्षिण मुख गरी तीन दिशामा पिण्ड देवोस्॥ ७२॥ चिताको अस्थि लीई तीन पाउ हिडी एक घड़ामा जलभरि खुला मुखगरि स्थापना गरोस्॥ ७३॥ चामल दूधमा पकाई दहि, घिउ युक्त गरि प्रेतलाई बलि देवोस्॥ ७४॥ पन्ध्र पाईला उत्तर दिशातर्फ

पदानि दशपञ्चैव चोत्तरस्यां दिशि व्रजेत्। गर्तं विधाय तत्रास्थिपात्रं संस्थापयेत्खग॥ ७५॥
तस्योपरि ततो दद्यात्पिण्डं दाहार्तिनाशकम्। गर्तादुद्धृत्य तत्पात्रं नीत्वा गच्छेज्जलाशयम्॥ ७६॥
तत्र प्रक्षालयेद्दुग्धजलादस्थि पुनः पुनः चर्चयेच्चन्दनेनाथ कुङ्कुमेन विशेषतः॥ ७७॥
धृत्वा सम्पुटके तानि कृत्वा च हृदि मस्तके। परिक्रम्य नमस्कृत्य गङ्गामध्ये विनिक्षिपेत्॥ ७८॥
अन्तर्दशाहं यस्यास्थि गङ्गातोये निमज्जति। न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कदाचन॥ ७९॥
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति। तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ ८०॥
गङ्गाजलोर्मि संस्पृश्य मृत्तकं पवनो यदा। स्पृशते पातकं तस्य सद्य एव विनश्यति॥ ८१॥

गाई, हे गरुड। एक कुवा खनी त्यो अस्थिको पात्र राखोस्॥ ७५॥ अस्थिका उपर दाहको दुःखनाशक पिण्ड देवोस् र कुवादेखि अस्थि पात्रलीई जलाशयमा जावोस्॥ ७६॥ त्यहाँ पनि दूध जलले बारम्बार धोवोस् र कुंकुम चन्दनादिले विशेष पूजा गरोस्॥ ७७॥ अस्थिपात्र हातमा लीई हृदयमा राखि, प्रदक्षिणा नमस्कार गरी, गंगाजीमा क्षेपण गरोस्॥ ७८॥ दश दिन भित्रमा जस्को अस्थि गंगामा पर्छ तेस्को जन्म फेरि हुँदैन, ब्रह्मलोकै रहन्छ॥ ७९॥ जो मनुष्यको अस्थि गंगाजीमा जतिदिन रहन्छ, तेति वर्षसम्म तेसलाई स्वर्ग लोकमा सुखभोग गर्न मिल्दछ॥ ८०॥ गंगाजीमा लगेर आयेका हावाले मृतकलाई छुँदैमा सम्पूर्ण हजारौं पाप छिन्मा नाश हुन्छन्॥८१॥ भगिरथजीले

आराध्य तपसोग्रेण गङ्गादेविं भगीरथः। उद्धारार्थं पूर्वजानामानयद्ब्रह्मलोकतः॥ ८२॥
ग० त्रिषु लोकेषु विख्यातं गंगायाः पावनं यशः। या पुत्रान्सगरस्यैतान्भस्माख्याननयद्दिवम्॥ ८३॥ द०
पु० पूर्वे वयसि पापानि ये कृत्वा मानवा मृताः। गङ्गायामस्थिपतनात्स्वर्गलोकं प्रयान्ति ते॥ ८४॥ अ०
कश्चिद्व्याधो महारण्ये सर्वप्राणिविहिंसकः। सिंहेन निहतो यावत्प्रयाति नरकालयम्॥ ८५॥
तावत्कालेन तस्यास्थि गङ्गायां पतितं तदा। दिव्यं विमानमारुह्य स गतो देवमन्दिरम्॥ ८६॥
अतः स्वमेव सत्पुत्रो गङ्गायामस्थि पातयेत्। अस्थिसञ्चयनादूर्ध्वं दशगात्रं समाचरेत्॥ ८७॥
अथ कश्चिद्विदेशे वा वने चौरभये मृतः। न लब्धस्तस्य देहश्चेच्छृणुयाद्यद्दिने तदा॥ ८८॥

धेरै काल ठूलो तपस्या गरी आफ्ना पितामहआदिलाई उद्धारगर्न ब्रह्मलोकदेखि ल्यायेकी गंगाजी हुन्॥ ८२॥ तीनैलोकमा प्रख्यात छन्, पवित्र गराउने गंगाजीको यश हो, जुन् सगरका पुत्र ६० हजार गंगासागरमा भस्म भयेकालाई गंगाजीले मुक्तगरी स्वर्गमा लाँदिभईन्॥ ८३॥ जो मनुष्यले पैलो उमेरमा पापगरेको भये पनि मरि हड्डी गंगामा परेछ भने स्वर्गलोक जान्छ॥ ८४॥ कोई एक व्याधा ठूलो जंगलमा सबैप्राणिको हिंसा गर्दथ्यो, त्यसलाई सिंहले मारिदियो र त्यो नर्कमा पऱ्यो॥ ८५॥ कोई कालमा तेस्को हड्डी गंगाजिका जलमा पर्दा दिव्य विमानमा चढ़ी देवलोक जाँदोभयो॥ ८६॥ यसै कारण पुत्रले माता पिताको अस्थी गंगाजीमा लगि सेलावोस्, अस्थि सञ्चय पछि और्ध्वदेहिक दशगात्र क्रिया गरोस्॥ ८७॥ कोई पुरुष विदेशमा, वनमा, चोरले मारेमा, तेस्को देह मिलेन भने त्यस्को गर्ने

दर्भपुत्तलकं कृत्वा पूर्ववत्केवलं दहेत्। तस्य भस्म समादाय गंगातोये विनिक्षिपेत्॥ ८९॥
ग० दशगात्रादिकं कर्म तद्दिनादेव कारयेत्। स एव दिवसो ग्राह्यः श्राद्धे सांवत्सरादिके॥ ९०॥ द०
पु० पूर्णे गर्भे मृता नारी विदार्य जठरं तदा। बालं निष्कास्य निक्षिप्य भूमौ तामेव दाहयेत्॥ ९१॥ अ०
गंगातीरे मृतं बालं गंगायामेव पातयेत्। अन्यदेशे क्षिपेद्भूमौ सप्तविंशतिमासजम्॥ ९२॥
अतः परं दहेत्तस्य गंगायामस्थि निक्षिपेत् जलकुम्भश्च दातव्यो बालानामेव भोजनम्॥ ९३॥
गर्भे नष्टे क्रिया नास्ति दुग्धं देयं मृते शिशौ। घटं च पायसं भोज्यं दद्याद्बालविपत्तिषु॥ ९४॥

कर्म भन्छु, सुन॥ ८८॥ कुशको पुत्तला बनाई पूर्व कहे बमोजिम जलाई त्यो भस्म लगी गंगाजीमा सेलावोस्, त्यो पनि गति पाउँछ॥ ८९। दशगात्र क्रिया पनि तेसैदिनदेखि गरोस्, त्यो तिथी ली सवत्सरादि श्राद्ध पनि गर्नु॥ ९०॥ जो स्त्री गर्भवती मर्दछन्, गर्भपूर्ण (६ मैनाका उपर) भएको छ भने गर्भ चिरी बालख निकालि भूमिमा गाड़ी स्त्रीलाई जलाउनू॥ ९१॥ गंगाजीमा मरेको बालक मरेमा सेलाउनु अन्य देशमा मरे २७ मैना सम्मका बालकलाई भूमिमा छिपाउनू॥ ९२॥ सत्ताईस मैनादेखि उपर उमेर भयेका बालकलाई दाहगरि अस्थि क्षपणादिगर्नु, जल कुम्भदान बालादि भोजन गराउनू॥ ९३॥ गर्भपात भयेको क्रिया पर्दैन, दूधको बालक मरे बालकहरूलाई दुग्ध घडादि पायसले भोजन गरावोस्॥ ९४॥ कुमार अवस्थामा मरे कुमारै ख्वाउने ५ वर्ष कुमार १० वर्ष पौगण्ड हुन्, व्रतबन्धभयेका पौगण्डे

कुमारे च मृते बालान् कुमारानेव भोजयेत्। सबालान्भोजयेद्विप्रान्पौगण्डे सव्रते मृते ॥ ९५ ॥
मृतश्च पञ्चमादूर्ध्वमव्रतः सव्रतोऽपि वा। पायसेन गुडेनापि पिंडान्दद्याद्दश क्रमात्॥ ९६ ॥
एकादशं द्वादशं च वृषोत्सर्गविधिं विना। महादानविहीनं च पौगण्डे कृत्यमाचरेत् ॥ ९७ ॥
जीवमाने च पितरि न पौगण्डे सपिण्डनम्। अतस्तस्य द्वादशाहन्येकोद्दिष्टं समाचरेत् ॥ ९८ ॥
स्त्रीशूद्राणां विवाहस्तु व्रतस्थाने प्रकीर्तितः। व्रतात्प्राक्सर्ववर्णानां वयस्तुल्या क्रिया भवेत्॥ ९९ ॥
स्वल्पात्कर्मप्रसङ्गाच्च स्वल्पाद्विषयबंधनात्। स्वल्पे वयसि देहे च क्रियां स्वल्पामपीच्छति॥ १०० ॥
किशोरे तरुणे कुर्याच्छय्यावृषमखादिकम्। पददानं महादानं गोदानमपि दापयेत्॥ १०१ ॥

मरे बालक ब्राह्मण भोजन गराउनू॥ ९५ ॥ पाँच वर्ष उमेर भयेका बालक मर्दा व्रतबन्ध भयेका या नभएका को गुड पायसादिले दशक्रिया गरून्॥ ९६ ॥ पौगण्ड मरेमा वृषोत्सर्ग र महादान विना (छोडी) एकादश द्वादश गरून्॥ ९७॥ पिता जीवित छँदै पौगण्ड अवस्थामा मृतभयेकाको सपिण्डी नगर्नु, द्वादशदिनमा एकोदिष्ट श्राद्ध गर्दिनू॥ ९८ ॥ स्त्री और शूद्रहरूको व्रतबन्ध हुँदैन र विवाहै ब्रतबन्ध भनिएको हो, व्रतबन्ध पैले उमेर अन्सार क्रिया गरि दिनू॥ ९९ ॥ बालकहरूका कर्म थोरै विषय उमेर पनि थोर हुनाले क्रिया पनि थोर ईच्छा गर्दछन्॥ १००॥ किशोर मरेमा र तरुण मरेमा शैया दान महादान गोदानादि वृषोत्सर्ग सबैकर्म गरिदिऊन्, १० वर्ष उमेर किशोर, १६ वर्ष उमेर तरुण अवस्था हो॥ १०१ ॥ तूला सिद्ध भयेका योगी संन्यासिहरूको

यतीनां चैव सर्वेषां न दाहो नोदकक्रिया। दशगात्रादिकं तेषां न कर्त्तव्यं सुतादिभिः॥ १०२ ॥
दण्डग्रहणमात्रेण नरो नारायणो भवेत्। त्रिदण्डग्रहणात्तेषां प्रेतत्वं नैव जायते॥ १०३ ॥
ज्ञानिनस्तु सदा मुक्ताः स्वरूपानुभवेन हि। अतस्ते तु प्रदत्तानां पिण्डानां नैव कांक्षिणः॥ १०४ ॥
तस्मात्पिण्डादिकं तेषां न तु नोदकमाचरेत्। तीर्थश्राद्धं गयाश्राद्धं पितृभक्त्या समाचरेत्॥ १०५ ॥
हंसं परमहंसं च कुटीचकबहूदकौ। एतान्संन्यासिनस्तार्क्ष्य पृथिव्यां स्थापयेन्मृतान्॥ १०६ ॥
गंगादीनामभावे हि पृथिव्या स्थापनं स्मृतम्। यत्र सन्ति महानद्यस्तदा तास्वेव निःक्षिपेत्॥ १०७ ॥

॥ इति श्रीगरुडपुराणे सारोद्धारे दाहास्थिसंचयकर्मनिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

दाहादि क्रिया पुत्रले गर्नु पर्दैन, कर्मका इच्छै गर्दैनन्॥ १०२ ॥ दण्डधारण गर्दैमा मनुष्य नारायणरूप हुन्छन्, त्रिदण्ड धारण गर्दैमा प्रेतत्व हुँदैनन्, बालक, द्विज, संन्यस्त, त्रिदण्ड भनि कहिन्छन्॥ १०३ ॥ ज्ञानिहरुता आफ्नु स्वरूप अनुभव गरी नित्य मुक्तछन् र अर्काले दिए को पिण्ड इच्छा गर्दैनन्॥ १०४ ॥ यसैकारण तीनिहरुका पुत्रले तर्पण पिण्डादि न गरून्, पितृ भक्तभै तीर्थ श्राद्धादि गरून्॥ १०५ ॥ चार प्रकारका सन्यास हुन्छन्, हंस १, परमहंस २, कुटीचक ३, बहूदक ४, हे गरुड! ई सन्यासीलाई पृथ्वीमै राख्नु, दाह नगर्नू॥ १०६ ॥ गंगादि महानदी न भयेका जगामा भूमिमा स्थापनगर्नु, जहाँ तूला नदी छन् भने नदीमै क्षेपण गर्नु, संन्यासीहरूलाई न जलाउनू॥ १०७ ॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां दशमोध्यायः ॥ १० ॥

✻ अथ एकादशोऽध्यायः ✻

गरुड उवाच —

दशगात्रविधिं ब्रूहि कृते किं सुकृतं भवेत्। पुत्राभावे तु कः कुर्यात्तन्मे ब्रूहि जनार्दन॥ १॥

श्रीभगवानुवाच —

शृणु तार्क्ष्य प्रवक्ष्यामि दशगात्रविधिं तव। यद्विधाय च सत्पुत्रो मुच्यते पैतृकादृणात्॥ २॥
पुत्रः शोकं परित्यज्य धृतिमास्थाय सात्विकीम्। पितुः पिण्डादिकं कुर्यादश्रुपातं न कारयेत्॥ ३॥
श्लेष्माश्रु बांन्धवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः। अतो न रोदितव्यं हि तदा शोकनिरर्थकात्॥ ४॥

गरुडजी सोध्नु हुन्छ — दशगात्र विधिबताई बक्सियोस्, पुत्र छैन भने अपुत्रको क्रिया कसले गर्नू॥ १॥ श्री भगवान् आज्ञागर्नु हुन्छ — हे गरुड! दशगात्र (और्ध्वदेहिक) विधि भन्छु, सुन, जो गर्नाले पुत्र पितृ ऋणदेखि छुट्दछन्॥ २॥ पुत्र जो छ शोक त्यागी सत्वगुण धारणगरि पितादिलाई पिण्डादि देओस्, अश्रुपात न गरोस्॥ ३॥ बान्धवहरुले छाडेको श्लेष्मा अश्रु मैला अवशभै प्रेतले खान्छ, यस् कारण रुनु शोक गर्नु व्यर्थ छन् शोक न गर्नू॥ ४॥ मनुष्य जो छन् यदि हजार वर्ष सम्म रातदिन शोक गरे पनि मरेर गयेको

यदि वर्षसहस्राणि शोचतेऽहर्निशं नरः। तथापि नैव निधनं गतो दृश्येत कर्हिचित्॥ ५॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। तस्मादपरिहार्येऽर्थे न शोकं कारयेद् बुधः॥ ६॥
नहि कश्चिदुपायोऽस्ति दैवो वा मानुषोऽपि वा। यो हि मृत्युवशं प्राप्तो जन्तुः पुनरिहाव्रजेत्॥ ७॥
अवश्यंभाविभावानां प्रतीकारो भवेद्यदि। तदा दुःखैर्न युज्येरन्नलरामयुधिष्ठिराः॥ ८॥
नायमत्यन्तसंवासः कस्यचित्केनचित्सह। अपि स्वप्नशरीरेण किमुतान्यः पृथग्जनैः॥ ९॥
यथाहि पथिकः कश्चिच्छायामाश्रित्य विश्रमेत्। विश्रम्य च पुनर्गच्छेत्तद्वद्भूतसमागमः॥ १०॥
यत्प्रातः संस्कृतं भोज्यं सायं तच्च विनश्यति। तदन्नरससंपुष्टे काये का नाम नित्यता॥ ११॥

कैले पनि देख्न पाईदैन॥ ५॥ निश्चय जन्मे पछि मर्दछ, मरे पछि जन्मन्छ भन्ने निश्चयै छन् ज्ञानि जनले शोक न गर्नू, शोकगर्नु निरर्थक हो॥ ६॥ दैवको अथवा मनुष्यको केहि उपाय छैन, जो मरेर गयेको जीव फेरि फिरेर आउँदैन, आयेको देखिँदैन॥ ७॥ अवश्य हुने होईजान्छ, कोई उपाय गर्दा पनि टर्दैन, उपाय गर्दा टर्नेभये नलराजा, रामचन्द्र, युधिष्ठिर जस्तामा पनि दुःख पर्‍यो पर्ने थिएन्॥ ८॥ स्वप्न समान यो शरीर छ, कस्को साथ निज सम्बन्ध छन्, यो जगत्मा जनहरुले मेरा सम्बन्धी भन्नु व्यर्थै छ॥ ९॥ जस्तै बाटाका बटुवाहरु बाटाका पाटिमा विश्राम गर्दा तिन्को जो सम्बन्ध हो प्रातः भयेमा आफ्नु २ बाटो लइजान्छन्, तेस्तै संबन्ध हो॥ १०॥ जो प्रातःकालको

ग० पु० भैषज्यमेतद्दु:खस्य विचारं परिचिन्त्य च। अज्ञानप्रभवं शोकं त्यक्त्वा कुर्यात्क्रियां सुतः ॥ १२ ॥ ए० अ०

पुत्राभावे वधूः कुयाद्भार्याभावे च सोदरः। शिष्यो वा ब्राह्मणस्येव सपिण्डो वा समाचरेत् ॥ १३ ॥

ज्येष्ठस्य वा कनिष्ठस्य भ्रातुः पुत्रश्च पौत्रकः। दशागात्रादिकं कार्यं पुत्रहीने नरे खग ॥ १४ ॥

भ्रातृणामेकजातानामेकश्चेत्पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ १५ ॥

पत्न्यश्च बहव्य एकस्य चैका पुत्रवती भवेत्। सर्वास्ताः पुत्रवत्यः स्युस्तेनैकेन सुतेन हि ॥ १६ ॥

सर्वेषां पुत्रहीनानां मित्रः पिण्डं प्रदापयेत्। क्रियालोपो न कर्तव्यः सर्वाभावे पुरोहितः ॥ १७ ॥

भोज्यवस्तु सायंकालमा नाश हुन्छ, त्यसै अन्नका रसले बाँचेको शरीर अनित्यछ (अर्थात्) कोहि कसैको छैन ॥ ११ ॥ विचार गर्दा यो दुःखको अज्ञानको औषधी शोक मोह छाड्नु हो, पुत्र ले शोक छोडी पितामाताको क्रिया गरोस् ॥ १२ ॥ पुत्र छैनन्, स्त्रीले गरुन्, स्त्रीछैन भने दाजु भाईले गरुन्, अथवा शिष्यले गर्नु, न भये ज्येष्ठ सपिण्डीले गरुन् ॥ १३ ॥ हे गरुड ! पुत्र छैन भने ज्येष्ठ भ्राता अथवा ज्येष्ठ पुत्रले पनि दशगात्र क्रिया गर्दनु ॥ १४ ॥ एक पिता मातादेखि जन्मेका धेरै भाई भयेता पनि एक भाईको पुत्र भये भने सबै पुत्रवानै ठहर्दछन्, अपुत्र हुँदैन भनि मनुले भनेका छन् ॥ १५ ॥ एकका धेर पत्नी छन् ता पनि यौटिका पुत्र भये भने ती सबै पुत्रवती हुन्, अपुत्री हुँदैनन् ॥ १६ ॥ सबै १३२
कोहि छैन भने मित्रले पिण्डादि गरोस् चारै जातको मित्र पनि छैन भने पुरोहितले गरोस्, क्रिया लोप नगर्दिनु ॥ १७ ॥ स्त्रीको अथवा

ग० पु० स्त्री वाथ पुरुषः कश्चिदिष्टस्य कुरुते क्रियाम्। अनाथप्रेतसंस्कारात्कोटियज्ञफलं लभेत् ॥ १८ ॥ ए० अ०

पितुः पुत्रेण कर्तव्यं दशगात्रादिकं खग। मृते ज्येष्ठेऽप्यतिस्नेहान्नकुर्वीत पिता सुते ॥ १९ ॥

बहवोऽपि यदा पुत्रा विधिमेकः समाचरेत्। दशगात्रं सपिण्डत्वं श्राद्धान्यन्यानि षोडश ॥ २० ॥

एकेनैव तु कार्याणि संविभक्तधनेष्वपि। विभक्तस्तु पृथक्कार्यं श्राद्धं सांवत्सरादिकम् ॥ २१ ॥

तस्माज्ज्येष्ठः सुतो भक्त्या दशगात्रं समाचरेत्। एकभोजी भूमिशायी भूत्वा ब्रह्मपरः शुचिः ॥ २२ ॥

सप्तवारं परिक्रम्य धरणीं यत्फलं लभेत्। क्रियां कृत्वा पितुर्मातुस्तत्फलं लभते सुतः ॥ २३ ॥

आरभ्य दशगात्रे च यावद्वै वार्षिकं भवेत्। तावत्पुत्रः क्रियां कुर्वन् गयाश्राद्धफलं लभेत् ॥ २४ ॥

पुरुषको, इष्टको, अनाथको क्रिया गर्नाले कोटी यज्ञ गरेको फल क्रिया गर्दिनेलाई मिल्दछ ॥१८॥ हे गरुड ! पुत्रले माता पितादिको दशगात्रादि क्रियागर्नु, पुत्रादि मरेमा पिताले अति माया नगर्नु, संसारमा (माया अनित्य हो) ॥ १९ ॥ धेरै पुत्र भये पनि वर्षदिन सम्म विधि एउटै गर्नू, दशगात्र सपिण्डादि षोडश मासिक श्राद्धादि एकै जगा गर्नू ॥ २० ॥ भाई छुट्टीई भिन्नै २भये पनि वार्षिक पर्यन्त एकैगरि एकोदिष्ट
१२ श्राद्ध मात्र घरमा गर्नू ॥ २१ ॥ यस कारण ज्येष्ठ पुत्र मुख्य कर्ता भै दशगात्र और्ध्वदेहिक क्रिया गरुन्, एक छाक हविष्यान्न खाई भूमिमा १३३
शयन गरी शुची भै ब्रह्माजीको ध्यानगर्नू ॥ २२ ॥ पृथ्वीको सातवार प्रदक्षिणा गर्दा जो फल मिल्दछ माता पिताको शास्त्रानुसार क्रिया गरे

कूपे तडागे वाऽऽरामे तीर्थे देवालयेऽपि वा। गत्वा मध्यमयामे तु स्नानं कुर्यादमन्त्रकम्॥ २५॥
शुचिर्भूत्वावृक्षमूले दक्षिणाभिमुखः स्थितः। कुर्याच्च बेदिकां तत्र गोमयेनोपलिप्यताम्॥ २६॥
तस्यां पर्णे दर्भमयं स्थापयेत्कौशिकं द्विजम्। तं पाद्यादिभिरभ्यर्च्य प्रणमेदतसीति च॥ २७॥
तदग्रे च ततो दत्त्वा पिण्डार्थं कौशमासनम्। तस्योपरि ततः पिण्डं नामगोत्रोपकल्पितम्॥ २८॥
दद्यात्तण्डुलपाकेन यवपिष्टेन वा सुत। उशीरं चन्दनं भृंगराजपुष्पं निवेदयेत्।
धूपं दीपं च नवेद्यं मुखवासं च दक्षिणाम्॥ २९॥

पुत्रले सो फल पाउँदछ॥ २३॥ मृत्यु भयेका दिन देखि लियेर वार्षिक पर्यन्त विधि पूर्वक क्रिया गर्छ भने छोरालाई गयामा श्राद्ध गरे समान फल मिल्दछ॥२४॥ इनार, तलाउ, पोखरी, बगैंचा देवालयादि जलाश्रयमा गई मध्यान्ह कालमा मन्त्र विना स्नान गरून्॥ २५॥ स्नानागरि शुचि भै कोहि वृक्षका फेदमा दक्षिण मुखगरि वेदी बनाई गोबरले लिपोस्॥ २६॥ वेदीका दक्षिणतर्फ कुशका विश्वेदेवस्थापना गरी तिनलाई चन्दन अक्षताले पूजा गर्नु र (अतसी पुष्पसंकाशं) भन्ने मन्त्रले प्रार्थना गर्नू॥ २७॥ तिन्का अग्रभागमा वेदिका उपर कुशको पिण्ड आसन दिई त्यसै माथि नाम गोत्र उच्चारण गरी पिण्ड दिनु॥ २८॥ चामल दूधमा पकाईएको पायसले पिण्ड दिनु अथवा जौका पिठोको पिण्ड दिई पुत्रले भक्तिपूर्वक उशीर चन्दन, भृङ्गीराज, पुष्प, आदि चढाई पूजा गरि धूप, दीप, नैवेद्य, पुंगीफल (सुपारी) दक्षिणा चढाउनू॥ २९॥

पक्वान्नं पयसोः पात्रे वर्धमानजलांजलीन्। प्रेतायामुकनाम्ने च मद्दत्तमुपतिष्ठतु॥ ३०॥
अन्नं वस्त्रं जलं द्रव्यमन्यद्वा दीयते च यत्। प्रेतशब्देन यद्दत्तं मृतस्यानन्त्यदायकम्॥ ३१॥
तस्मादादिदिनादूर्ध्वं प्राक्सपिण्डीविधानतः। योषितः पुरुषस्यापि प्रेतशब्दं समुच्चरेत्॥ ३२॥
प्रथमेऽहनि यत्पिण्डो दीयते विधिपूर्वकम्। तेनैव विधिनान्नेन नव पिण्डान्प्रदापयेत्॥ ३३॥
नवमे दिवसे चैव सपिण्डैः सकलैर्जनैः। तैलाभ्यङ्गः प्रकर्तव्यो मृतकस्वर्गकाम्यया॥ ३४॥
जलाशये बहिः स्नात्वा दूर्वा लाजा समन्विताः। अग्रतः प्रमदां कृत्वा समागच्छेन्मृतालयम्॥ ३५॥

दूध र पानी एकपात्रमा राखी अन्नको काक बली दिनू, दिनदिनै अंजली चढाउँदै अञ्जली दिनु, यो भन्नु ''अमुकनाम्ने प्रेताय मद्दत्तमुपतिष्ठतु'' मैले दियेको मिलोस्॥ ३०॥ मृतकलाई प्रेत उच्चारण गरी अन्न, वस्त्र, जल, द्रव्य जो दिईन्छ त्यो अनन्त फल दायक हुन्छ॥ ३१॥ पैला दिनदेखि सपिण्डी न हुञ्जेल स्त्री अथवा पुरुष जो हुन् तिनले प्रेतशब्द उच्चारण गर्नू॥ ३२॥ प्रथम दिन जसरि पिण्ड दिइन्छ तेसै प्रकारले नौदिन सम्म पिण्डदिनु॥३३॥ नौदिनमा सपिण्डी सबै दाजुभाईहरुले मृतकको स्वर्गवासका निमित्त (तैलाभ्यङ्ग) अर्थात् तेल लगाउन्॥३४॥ बाहिर जलाशयमा स्नानगरि दूबो, लाजा हातमा ली स्त्रीजन अघिलागी दूबो, लाजा छर्दै मृतकका घरमा जाउन्॥ ३५॥ दूबोका झैं

दूर्वावत्कुलवृद्धिस्ते लाजा इव विकासता। एवमुक्त्वा त्यजेद्गेहे लाजान्दूर्वासमन्वितान्॥ ३६॥
दशमेऽहनि मांसेन पिण्डं दद्यात्खगेश्वर। प्रायेण तन्निषेधाद्वा कलौ न पलपैतृकम्॥ ३७॥
दशमे दिवसे क्षौरं बान्धवानां समुण्डनम्। क्रियाकर्तुः सुतस्यापि पुनर्मुण्डनमाचरेत्॥ ३८॥
मिष्टान्नैर्भोजयेदेकं दिनेषु दशसु द्विजम्। प्रार्थयेत्प्रेतमुक्तिं च हरिं ध्यात्वा कृताञ्जलिः॥ ३९॥
अतसीपुष्पसंकाशं पीतवाससमच्युतम्। ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम्॥ ४०॥

तिम्रो कुल बढोस्, लाजा जस्तै प्रकाश हउन् भन्दै घर वरिपरि दूवो लाजा छरिदिनू॥ ३६॥ हे गरुड! दशदिनमा विशेष मांसको पिण्ड दिउन्, तर कलियुगमा प्रायः पितृलाई मांस निषेध हुनाले अरू चिज पिण्ड दिनू॥ ३७॥ दशदिनमा सबै बान्धवले मुण्डन गर्नु, क्रियागर्ने छोराले पनि फेरि मुण्डन गरोस्॥ ३८॥ दश दिनमा कुलाचार देशाचारले चलेको छ भने मिष्टान्नादिले ब्राह्मण भोजन गराई प्रेतमुक्तिका निमित्त अञ्जली बाँधि हरिको ध्यानगरि प्रार्थना गरोस्॥ ३९॥ आलसका फूल समान प्रकाशमान भयेका पीताम्बर वस्त्र धारण गरेका अच्युत भगवान्को जो नमस्कार गर्छ तेस्लाई केहि भय हुँदैन॥ ४०॥ आदि अन्त्य न भयेका, शंख चक्र गदा पद्म धारण गरेका, (अक्षय)

अनादिनिधनो देवः शंखचक्रगदाधरः अक्षय्यः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥ ४१॥
इति संप्रार्थनामन्त्रं श्राद्धान्ते प्रत्यहं पठेत्। स्नात्वा गत्वा गृहे दत्त्वा गोग्रासं भोजनं चरेत्॥ ४२॥

॥ इति श्रीगरुडपुराणे सारोद्धारे दशगात्रविधिनिरूपणं नाम एकादशोऽध्यायः॥ ११॥

कैले नाश न हुने, हे पुण्डरीकाक्ष! प्रेतलाई मोक्ष दिइ बक्सियोस्॥ ४१॥ श्राद्धका अन्त्यमा यो प्रार्थना दिनदिनै गर्नु, घरमा स्नानगरि गोग्रास चढाई भोजन गरोस्॥ ४२॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां एकादशोऽध्यायः॥ ११॥

※ अथ द्वादशोऽध्यायः ※

गरुड उवाच —

एकादशदिनस्यापि विधिं ब्रूहिं सुरेश्वर। वृषोत्सर्गविधानं च वद मे जगदीश्वर॥ १॥

श्रीभगवानुवाच —

एकादशेऽह्नि गन्तव्यं प्रातरेव जलाशये। और्ध्वदेहिक्रिया सर्वा करणीया प्रयत्नत॥ २॥
निमन्त्रयेद् ब्राह्मणांश्च वेदशास्त्रपरायणान्। प्रार्थयेत्प्रेतमुक्तिं च नमस्कृत्य कृताञ्जलिः॥ ३॥
स्नानसंध्यादिकं कृत्वा ह्याचार्योपि शुचिर्भवेत्। विधानं विधिवत् कुर्यादेकादशदिनोचितम्॥ ४॥

गरुडजी सोध्नु हुन्छ — हे सुरेश्वर! एकादश दिनको विधि कहियोस्, हे जगदीश्वर! मेरा उपर दयागरी वृषोत्सर्गको विधि पनि कहियोस्॥ १॥ श्री भगवान् आज्ञा गर्नुहुन्छ — एधार दिनमा प्रातै काल जलाशयमा गै स्नान गरी यत्नपूर्वक और्ध्व देहिक क्रिया गरून्॥ २॥ वेद शास्त्र जान्ने ब्राह्मणलाई निमंत्रण गरि प्रेतमुक्तिका निमित्त हात जोड़ी नमस्कार गरी प्रार्थना गरोस्॥ ३॥ आचार्य ब्राह्मण पनि स्नान सन्ध्यादिले शुचिभयेका हुन्, एकादशको विधि संपूर्ण जानेका इ हुन्॥ ४॥ दशदिन सम्म मन्त्रविना नाम

अमन्त्रं कारयेच्छ्राद्धं दशाहं नामगोत्रतः। एकादशेऽह्नि प्रेतस्य दद्यात्पिण्डं समन्त्रकम्॥ ५॥
सौवर्णं कारयेद्विष्णुं ब्रह्माणं रौप्यकं तथा। रुद्रस्ताम्रमयः कार्यो यमो लोहमयः खग॥ ६॥
पश्चिमे विष्णुकलशं गङ्गोदकसमन्वितम्। तस्योपरिन्यसेद्विष्णुं पीतवस्त्रेण वेष्टितम्॥ ७॥
पूर्वे तु ब्रह्मकलशंक्षीरोदकसमन्वितम्। ब्रह्माणं स्थापयेत्तत्र श्वेतवस्त्रेण वेष्टितम्॥ ८॥
उत्तरस्यां रुद्रकुम्भं पूरितं मधुसर्पिषा। श्रीरुद्रं स्थापयेत्तत्र रक्तवस्त्रेण वेष्टितम्॥ ९॥
दक्षिणस्यां यमघटमिन्द्रोदकसमन्वितम्। कृष्णवस्त्रेण संवेष्ट्य तस्योपरि यमं न्यसेत्॥ १०॥
मध्ये तु मण्डलं कृत्वा स्थापयेत्कौशिकं सुतः। दक्षिणाभिमुखो भूत्वाऽपसव्येन च तर्पयेत्॥ ११॥

गोत्रले मात्र श्राद्ध गरून्, एकादश दिनमा वेदमन्त्रले प्रेतलाई पिंडदिउन्॥ ५॥ सुवर्णको विष्णु प्रतिमा, चाँदिको ब्रह्मा प्रतिमा, तामाको रुद्रप्रतिमा बनाउनु, हे गरुड!॥ ६॥ पश्चिम दिशामा विष्णुकलश स्थापना गर्नु, गंगाजलले पूर्णगरि पीत वस्त्रले ढाकी विष्णुको पूजा गर्नु॥ ७॥ पूर्व दिशामा दूध पानीले भरि ब्रह्मकलश स्थापना गरी श्वेतवस्त्रले ब्रह्माजिको पूजागर्नु॥ ८॥ उत्तरदिशामा घिउ महले भरि रुद्रकलश स्थापना गर्नु र रातो वस्त्रले ढाकी श्री महादेवको पूजागर्नु॥ ९॥ दक्षिण दिशामा आकाशबाट वर्षेका पानीले भरी यमकलश स्थापना गरी कालो वस्त्रले ढाकी यमप्रतिमाको पूजा गर्नु॥ १०॥ मध्यमा मण्डल बनाई (कौशिक सुतः) विश्वामित्रको स्थापना गरी दक्षिण मुखगरी

विष्णुं विधिं शिवं धर्मवेदमन्त्रैश्च तर्पयेत्। होमं कृत्वा चरेत्पश्चाच्छाह दशघंटादिकम्॥ १२॥
गोदानं च ततो दद्यात्पितॄणां तारणाय वै। गौरेषा हि मया दत्ता प्रीतयेऽस्तु माधव॥ १३॥
उपभुक्तं तु तस्यासीद्वस्त्रभूषणवाहनम्। घृतपूर्णं कांस्यपात्रं सप्तधान्यं तदीप्सितम्॥ १४॥
तिलाद्यष्टमहादानमन्तकाले न चेत्कृतम्। शय्यासमीपे धृत्वैतद्दानं तस्याः प्रदापयेत्॥ १५॥
प्रक्षाल्य विप्रचरणौ पूजयेदम्बरादिभिः। सिद्धान्नं तस्य दातव्यं मोदकाऽपूपकाः पयः॥ १६॥
स्थापयेत्पुरुष हैमं शय्योपरि तदा सुतः। पूजयित्वा प्रदातव्या मृतशय्या यथोदिता॥ १७॥

अपशव्य भै पूजागर्नु॥ ११॥ वेदका मन्त्रले एक २ गरी ब्रह्मा, विष्णु, रुद्र, यमराजहरूको पूजा गर्नु, हवनादि गरी षोडश श्राद्ध घट श्राद्धादि गर्नु॥ १२॥ पितृ उद्धारका निमित्त गौदान गरोस्, हे माधव! हजुर खुशीभै हाम्रा पितादि लाई सुख होस् भन्नाका निमित्त गौ अर्पण गरेको छ॥ १३॥ मृतकलाई भोगका निमित्त वस्त्र, गहना, वाहन, घृतपूर्ण काँसको पात्र सप्तधान्य प्यारो वस्तुहरू सबै दान गर्नु॥ १४॥ अन्त्य कालमा दानभएको छैन भने तिलादि अष्ट महादान पनि शैय्या समीप राखि गरोस्॥ १५॥ शैय्या दान गर्दा पैले दम्पति ब्राह्मणको पाउ धोई चन्दनादि वस्त्र गहनाले पूजागर्नु, लड्डु मिठाई मालपुवा आदि खाने वस्तु दिनू॥ १६॥ शैय्या माथि सुनको पुरुष स्थापना गरी पुत्रले पितादिलाई योग्य सामान राखि शैय्या प्रतिमाको पूजा गरोस्॥ १७॥ हे विप्र! (हे ब्राह्मण) प्रेतको प्रतिमा सहित सबै सर्जामले

प्रेतस्य प्रतिमायुक्ता सर्वोपकरणैर्वृता। प्रेतशय्या मया ह्येषा तुभ्यं विप्र निवेदिता॥ १८॥
इत्याचार्याय दातव्यं ब्राह्मणाय कुटुम्बिने। ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत्॥ १९॥
एवं शय्याप्रदानेन श्राद्धेन तवकादिना। वृषोत्सर्गविधानेन प्रेतो याति परां गतिम्॥ २०॥
एकादशेऽह्नि विधिना वृषोत्सर्गं समाचरेत्। हीनाङ्गं रोगिणं बालं त्यक्त्वा कुर्यात्सलक्षणम्॥ २१॥
रक्ताक्षः पिङ्गलो यस्तु रक्तशृङ्गे गले खुरे। श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य विधीयते॥ २२॥
सुस्निग्धवर्णयोः रक्तः क्षत्रियस्य विधीयते। पीतवर्णश्च वैश्यस्य कृष्णः शूद्रस्य शस्यते॥ २३॥

युक्तभयेको यो शैय्या हजुरलाई दिन्छु भनी ब्राह्मणमा निवेदन गरोस्॥ १८॥ कुटुम्बी, पढेका ब्राह्मणमा शैय्या दान दिनु प्रदक्षिणा नमस्कार गरी विसर्जन गर्नु॥ १९॥ यस्ता प्रकारले शैय्या दानगरि तवकादि श्राद्ध गर्नु र विधान पूर्वक वृषोत्सर्ग गर्नाले प्रेत जो छन् परमगतिमा प्राप्त हुन्छन्॥ २०॥ वृषोत्सर्ग विधि भन्छु, एघार दिनमा प्रातः कालीय कर्मगरि वृषोत्सर्ग गरोस्, अङ्गहीन, बालक (वत्स), रोगीलाई छोडी लक्षणले युक्त भयेका बाछा बाछी ल्याउनु॥ २१॥ राता आँखा, पिङ्गल शरीर, रातै सीङ, खुर घांटी शेतो, पेट कालो, पृष्ठ भयेको वृष ब्राह्मणको कहियो॥ २२॥ रातो छीर्के मीर्के क्षत्रियलाई कहियो, पँहेलोवर्ण वैश्यलाई, कालो वर्ण भयेको शूद्रलाई कहियो॥ २३॥

यस्तु सर्वाङ्गपिंगः स्याच्छ्वेतः पुच्छे पदेषु च। सपिंगो वृष इत्याहुः पितॄणां प्रीतिवर्द्धनः॥ २४॥
चरणास्तु मुखं पुच्छं यस्य श्वेतानि गोपतेः। लाक्षारससवर्णो यस्स नील इति कीर्तितः॥ २५॥
लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः। पिंगः खुरविषाणाभ्यां रक्तनीलो निगद्यते॥ २६॥
सर्वांगेष्वेकवर्णो यः पिंगः पुच्छे खुरेषु यः। तं नीलपिंगमित्याहुः पूर्वजोद्धारकारकम्॥ २७॥
पारावतं सपर्णस्तु ललाटे तिलकान्वितः। तं बभ्रुनीलमित्याहुः पूर्णं सर्वांगशोभनम्॥ २८॥
नीलः सर्वशरीरेषु रक्तश्च नयनद्वये। तमप्याहुर्महानीलं नीलः पञ्चविधः स्मृतः॥ २९॥

सबै वर्ण पिंगल सेतो पुच्छर चारै पाउ सेतो भयेको पिंगवृष कहियेको पितृको प्रीति बडाउँने हो॥ २४॥ जुन वृषको चारै पाउ पुच्छर मुख सेतो छ और लाहाका रंग जस्तो सबै शरीर भयेको नील वृष कहियो॥ २५॥ लोहित सबै शरीर मुख पुच्छर पाण्डुवर्ण भयेको खुर सींग पिंग रंग भयेको वृष रक्तनील भनि कहिन्छ॥ २६॥ संपूर्ण शरीर एक वर्ण छ पुच्छर खुर पिंग रंगको छ भने पिंगवृष भनि कहिन्छ, त्यो वृष पुरुषको उद्धार गर्ने हुन्छ॥ २७॥ जो बृष रातो परेवा जस्तो सर्ववर्ण भयेको, निधारमा तारो भयेको हुन्छ, त्यो बभ्रुनील भनि कहिन्छ, सम्पूर्ण अङ्ग शोभायमान हुन्छ॥ २८॥ सबै शरीर नीलो राता आँखा भयेको वृष महानील भनि कहिन्छ, नील पाँच प्रकारको

अवश्यमेव मोक्तव्यो न स धार्यो गृहे भवेत्। तदर्थमेषा चरति लोके गाथा पुरातनी॥ ३०॥
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। गौरीं विवाहयेत्कन्यां नीलं वा बृषमुत्सृजेत्॥ ३१॥
स एव पुत्रो मन्तव्यो बृषोत्सर्गं तु यश्चरेत्। गयायां श्राद्धदाता च योऽन्यो विष्ठासमः किल॥ ३२॥
रौरवादिषु ये केचित्पच्यन्ते यस्य पूर्वजाः। बृषोत्सर्गेण तान्सर्वांस्तारयेदेकविंशतिम्॥ ३३॥
बृषोत्सर्गं किलेच्छन्ति पितरः स्वर्गता अपि। अस्मद्वंशे सुतः कोपि बृषोत्सर्गं करिष्यति॥ ३४॥
तदुत्सर्गाद्वयं सर्वे यास्यामः परमां गतिम्। सर्वयज्ञेषु चास्माकं बृषयज्ञो हि मुक्तिदः॥ ३५॥

कहिये॥ २९॥ अवश्य बृषोत्सर्ग छोडेका वृषलाई स्वछन्दमा छोडिदिनु, तेस्लाई बाँध्नु जोतनु हुँदैन, यसै कारण पैले देखिनै घरमा न राख्ने प्रथा चलेको छ॥ ३०॥ धेरै पुत्रहरूमा एकै पुत्रले गया गै श्राद्ध गरोस्, अथवा गौरी कन्या कन्यादान गरोस् या नीलवृषोत्सर्ग गरोस्॥ ३१॥ त्यो पुत्र कहिन्छ, जो पुत्रले गया श्राद्ध गर्छ, वृषोत्सर्ग गर्छ, पुत्र त्यसैलाई मात्र भनिन्छ, अरु पुत्र विष्ठा समान हुन्॥ ३२॥ पैलेका पूर्खाहरू नर्कमा परेका भये पनि बृषोत्सर्ग गर्नाले एक्काईश कुल तर्न जान्छन्॥ ३३॥ स्वर्गमा गयेका पितृहरु पनि निश्चय कोई हाम्रा बंशमा वृषोत्सर्ग गर्ने सन्तान उत्पन्न हुन्छकि भनी इच्छा गर्दछन्॥ ३४॥ पितामहादी र मातामहादि दुवै कुल वृषोत्सर्ग गरि दिये मुक्तिहुने थियौं, सम्पूर्ण यज्ञमा मुक्ति दिनेता बृषयज्ञ मात्र हो भन्दछन्॥ ३५॥ यसकारण पितृ मुक्तिका निमित्त यत्नविधि पूर्वक

तस्मात्पितृविमुक्त्यर्थं र्थं वृषयज्ञं समाचरेत्। यथोक्तेन विधानेन कुर्यात्सर्वं प्रयत्नतः ॥ ३६ ॥
ग्रहाणां स्थापनं कृत्वा तत्तन्मत्रैश्च पूजनम्। होमं कुर्याद्यथाथशास्त्रं पूजयेद्दशमातरः ॥ ३७ ॥
वत्सं वत्सीं समानाय्य बध्नीतात्कङ्कणं तयोः। वैवाह्येन विधानेन स्तम्भमारोपयेत्तदा ॥ ३८ ॥
स्नापयेच्च बृषं वत्सीं रुद्रकुम्भोदकेन च। गन्धमाल्यैश्च संपूज्य कारयेच्च प्रदक्षिणाम् ॥ ३९ ॥
त्रिशूलं दक्षिणे पार्श्वे वामे चक्रं प्रदापयेत्। तं विमुच्याञ्जलिं बध्वा पठेन्मन्त्रमिमं सुतः ॥ ४० ॥
धर्मस्त्वं बृषरूपेण ब्रह्मणा निर्मितः पुरा। तवोत्सर्गप्रदानेन तारयस्व भवार्णवात् ॥ ४१ ॥
इति मन्त्रान्नमस्कृत्य वत्सं वत्सीं समुत्सृजेत्। वरदोऽहं सदा तस्य प्रेतमोक्षं ददामि च ॥ ४२ ॥

वृषयज्ञनै गरोस् ॥ ३६ ॥ नौ ग्रह स्थानमा गरी ग्रहैको मन्त्रले पूजा गर्नु र होम गरी शास्त्रोक्त विधानले वृषत्सर्गको पूजा गरोस् ॥ ३७ ॥ बाछा बाछी ल्याई दुबैलाई कंकँण (गहना) लगाई, विधिले त्यहाँ खम्बा गाडोस् ॥ ३८ ॥ रुद्रकुम्भका जलले बाछा बाछीलाई स्नानगराई चन्दनाक्षता फूल मालाले पूजागरी प्रदक्षिणा गरोस् ॥ ३९ ॥ वृषका दाँहिने पातामा त्रिशूलको छाप बाँया फिलामा चक्रको छाप लगाई बृषछोडी अञ्जली बाँधी पुत्रले प्रार्थना गरोस् ॥ ४० ॥ तिमी धर्म हौ, पैले ब्रह्माले वृष रूपले बनायेका हौ, तिमीलाई छोडी दियौं, भवसागरदेखि हाम्रो कुल तारीदेउ ॥ ४१ ॥ यो मन्त्र पढ़ी नमस्कार गरी बाछा बाछी छोड़ी दिनु, मलाई वर देउ, प्रेतमोक्ष पनि

तस्मादेष प्रकर्त्तव्यस्तत्फलं जीवतो भवेत्। अपुत्रस्तु स्वयं कृत्वा सुखं याति परां गतिम् ॥ ४३ ॥
कार्तिकादौ शुभे मासे चोत्तरायणगे रवौ। शुक्लपक्षेऽथवा कृष्णे द्वादश्यादितिथौ तथा ॥ ४४ ॥
ग्रहणद्वितये चैव पुण्यतीर्थेऽयनद्वये। विषुवद्वितये चापि बृषोत्सर्गं समाचरेत् ॥ ४५ ॥
शुभे लग्ने मुहूर्ते च शुचौ देशे समाहितः। ब्राह्मणं तु समाहूय विधिज्ञं शुभलक्षणम् ॥ ४६ ॥
जपैर्होमैस्तथा दानैः प्रकुर्याद्देहशोधनम्। पूर्ववत्सकलं कृत्यं कुर्याद्धोमादिलक्षणम् ॥ ४७ ॥
शालग्रामं च संस्थाप्य वैष्णवं श्राद्धमाचरेत्। आत्मश्राद्धं ततः कुर्याद्द्यदानं द्विजन्मने ॥ ४८ ॥

गरिदेउ ॥ ४२ ॥ यसै कारण अवश्य वृषयज्ञ जीवित छँदैमा पनि गर्नु, अपुत्र छ भने स्वयं गरेता परमगति सुखैले जानेछन् ॥ ४३ ॥ जीवन वृषोत्सर्ग कार्तिकादि शुभ मैना उत्तरायण रवि भयेमा शुक्ल पक्ष अथवा कृष्णपक्ष द्वादशी तिथिमा गर्नु ॥ ४४ ॥ चन्द्र सूर्य ग्रहणमा, पुण्य तीर्थादिमा, अयन फेरिंदा दुवै अयनमा, विषुवत् योगमा पनि वृषोत्सर्ग गरुन् ॥ ४५ ॥ शुभलग्नमा शुभमुहूर्तमा शुभदेशमा आफु पनि शुभ भै शुभ लक्षणभयेका सबै विधिजानेका ब्राह्मण बोलाउनु ॥ ४६ ॥ जप होम दानले देह शुद्ध पारि पैला भयेका विधि सबै गरी होमादि गर्नु ॥ ४७ ॥ होम गरी सकेर शालिग्राम स्थापना गरी वैष्णव श्राद्ध गरोस् र आत्मश्राद्ध पनि गरी ब्राह्मणहरुलाई दानादि देवोस् ॥ ४८ ॥

एवं यः कुरुते पक्षिन्नपुत्रश्चापि पुत्रवान्। सर्वकामफलं तस्य वृषोत्सर्गात्प्रजायते॥ ४९॥
अग्निहोत्रादिभिर्यज्ञैर्दानैश्च विविधैरपि। न तां गतिमवाप्नोति वृषोत्सर्गेण यां लक्षेत्॥ ५०॥
बाल्ये कौमारे पौगण्डे यौवने वार्धके कृतम्। यत्पापं तद्विनश्येत वृषोत्सर्गान्न संशयः॥ ५१॥
मित्रद्रोही कृतघ्नश्च सुरापो गुरुतल्पगः। ब्रह्महा हेमहारी च वृषोत्सर्गात्प्रमुच्यते॥ ५२॥
तस्मात्सर्वप्रयत्नेन वृषयज्ञं समाचरेत्। वृषोत्सर्गसमं पुण्यं नास्ति तार्क्ष्य जगत्रये॥ ५३॥

हे गरुड! जो मनुष्य अपुत्र छन् भने पनि यो भनेको कर्म गर्नाले पुत्रवान् भै वृषोत्सर्गले पुत्रभये जति फल प्राप्त हुन्छन्॥ ४९॥ अग्निहोत्र आदि गरेका यज्ञहरू र अनेक प्रकारका दानहरूले जुन गतिलाई प्राप्त गर्न सक्तैनन् उस गतिलाई वृषोत्सर्ग गर्नाले प्राप्त गर्न सक्छन्॥ ५०॥ बालक कालमा, कुमार अवस्थामा, पौगण्ड, जवानी, बृद्ध अवस्था हरुमा गरेका जति पापहरू छन् ती सबै पापहरू वृषोत्सर्ग गर्नाले नाश हुन्छन्, यसमा संदेह छँदै छैन॥ ५१॥ पिताको रिसगर्ने कृतघ्न (भनेको जति सुकै उपकार गरे पनि एउटा कुराको पनि गुण न देख्नेलाई भन्दछन्) सुन, तागा धारि भयेर रक्सी खाने, गुरु मान्य जनहरूका बिछौनामा बस्ने र ब्राह्मणहरूलाई दुख दिने, (द्रोह गर्ने) सुन चोर्ने हरु पनि वृषोत्सर्ग गर्नाले सबै पापबाट मुक्त भै उत्तम लोकमा बास गर्दछन्॥ ५२॥ त्यस्कारणले जसरी भये पनि मिहीनेतले वृषोत्सर्ग गरोस्। हे गरुड! वृषोत्सर्ग जस्तो पुण्यदिने तीनै लोकमा अर्को कुनै छैन॥ ५३॥ यदि पति पुत्र भयेकी सधवा स्त्री पति

पतिपुत्रवती नारी द्वयोरग्रे मृता यदि। वृषोत्सर्गं नैव कुर्याद्दद्याद्गां च पयस्विनीम्॥ ५४॥
वृषभं वाहयेद्यस्तु स्कन्धे पृष्ठे च खेचर। संपतेन्नरके घोरे यावदाभूतसंप्लवम्॥ ५५॥
वृषभं ताडयेद्यस्तु निर्दयो मुष्टियष्टिभिः। स नरः कल्पपर्यन्तं भुनक्ति यमयातनाम्॥ ५६॥
एवं कृत्वा वृषोत्सर्गं कुर्याच्छ्राद्धानि षोडश। सपिण्डीकरणादर्वाक् तदहं कथयामि ते॥ ५७॥
स्थाने द्वारेऽर्धमार्गे च चितायां शवहस्तके। अस्थिसंचयने षष्ठो दशपिण्डा दशाह्निकाः॥ ५८॥
मलिनं षोडशं चैतत्प्रथमं परिकीर्तितम्। अन्यच्च षोडशं मध्ये द्वितीयं कथयामि ते॥ ५९॥

छोराहरुका अघि मरीन् भने तिन्का निमित्त वृषोत्सर्ग गर्नु पर्दैन केवल दुहुनी गाई दानदिनाले हुन्छ॥ ५४॥ हे गरुड़जी! वृषोत्सर्ग गरी छाडेका बाछा (अर्थात् साँडे साँडीहरु) हरुलाई जुन पुरुषले काँधमा जुवा पली जोतछ, अथवा पीठमा माल लादेर हिडाउँछन्, तीनलाई जहाँ सम्म सूर्य चन्द्र पृथ्वी रहन्छन् त्यहाँ सम्म नरकहरुमा बास गर्नु पर्दछ॥ ५५॥ जस्ले निर्दय भएर साँडेलाई लहुराले, मुडकीले कुट्दछ त्यो मनुष्यले कल्पान्त सम्म यमराजको यातना भोगनु पर्दछ॥ ५६॥ यस्ता प्रकारले बृषोत्सर्ग गरेर अनि षोडशो श्राद्ध गरुन् अब तिमी लाई सपिण्डी गर्नु भन्दा पैलेको काम भन्दछु॥ ५७॥ मरेका ठाउँमा दहिलागा, आधाबाटामा, चितामा, मुर्दाका हातमा, अस्थि संचयन गर्नेमा छ पिण्ड हुन्छन् अनि दशदिनका दशपिण्डहरु॥ ५८॥ यस्लाई मलिन षोडशी पहिलो भन्छन् अर्को मध्यम षोडशी तिमीलाई

प्रथमं विष्णवे दद्याद् द्वितीयं श्रीशिवाय च। याम्याय परिवाराय तृतीयं पिण्डमुत्सृजेत्॥ ६०॥
चतुर्थं सोमराजाय हव्यवाहाय पञ्चमम्। कव्यवाहाय षष्ठं च दद्यात् कालाय सप्तमम्॥ ६१॥
रुद्राय चाष्टमं दद्यान्नवमं पुरुषाय च। प्रेताय दशमं चैवैकादशं विष्णवे नमः॥ ६२॥
द्वादशं ब्रह्मणे दद्याद्विष्णवे च त्रयोदशम्। चतुर्दशं शिवायैव यमाय दशपञ्चकम्॥ ६३॥
दद्यात्तत्पुरुषायैव पिण्डं षोडशकं खग। मध्यं षोडशकं प्राहुरेतत्तत्त्वविदो जनाः॥ ६४॥
द्वादशप्रतिमाषेषु पाक्षिकं च त्रिपाक्षिकम्। न्यूनषाण्मासिकं पिण्डं दद्यान्न्यूनाब्दिकं तथा॥ ६५॥

भन्छु॥ ५९॥ दोस्रो षोडशीको पहिलो विष्णुलाई दोस्रो श्रीशिवजीलाई तेस्रो पिण्ड यमराजका परिवारहरु समेतलाई देवोस्॥ ६०॥ चारौं पिण्ड सोमराजलाई, हव्यवाहनलाई पाँचो पिण्ड, कव्यवाहनलाई छैटौं, कालका निमित्त सातौं पिण्ड दीउन्॥ ६१॥ रुद्रका निमित्त आठौं पिण्ड देओस्, नवौं चाही पुरुषलाई, प्रेतको दशौं पिण्ड, एगारहौ विष्णुलाई॥ ६२॥ बाह्रौं चाँही ब्रह्मालाई देवोस् फेरि तेह्रौं चाँही पनि विष्णुलाई चौदौं चाही शिवजीलाई, यमराजलाई पन्द्रौं पिण्ड देओस्॥ ६३॥ हे गरुड! तत्ववेत्ता अर्थात् कर्मकाण्ड जात्रे पुरुषले भनेका छन् सोही पिण्ड पुरुषलाई देवोस्, यस्लाई मध्यम षोडशी भनी भन्दछन्॥ ६४॥ अब बाह प्रत्येक मैन्हाहरुमा पाक्षिक, मासिक, त्रैपाक्षिक अर्थात् पैंतालिस दिनमा हुने उन मासिक उनसठ्ठी मासिक छ महिनाको उनाब्दिक अनि वार्षिक पिण्डहरू देओस्, आफ्ना देशमा चलेका

उत्तमं षोडशं चैतन्मता ते परिकीर्तितम्। अर्पयित्वा चरुं तार्क्ष्य कुर्यादिकादशेऽहनि॥ ६६॥
चत्वारिंशत्तथैवाष्टौ श्राद्धं प्रेतत्वनाशनम्। यस्य जातं विधानेन स भवेत्पितृपंक्तिभाक्॥ ६७॥
पितृपंक्तिप्रवेशार्थं कारयेत् षोडशत्रयम्। एतच्छ्राद्धविहीनश्चेत्प्रेतो भवति सुस्थिरम्॥ ६८॥
यावन्न दीयते श्राद्धं षोडशत्रयसंज्ञकम्। स्वदत्तं परदत्तं च तावन्नैवोपतिष्ठते॥ ६९॥
तस्मात्पुत्रेण कर्तव्यं विधिना षोडशत्रयम्। भर्तुर्वा कुरुते पत्नी तस्याः श्रेयो ह्यनन्तकम्॥ ७०॥
संपरेतस्य या पत्युः कुरुते चौर्ध्वदेहिकम्। क्षयाहं पाक्षिकंश्राद्धं सा सतीत्युच्यते मया॥ ७१॥

रीतिले॥ ६५॥ हे गरुड! यस्लाई उत्तम षोडशी भन्दछन्, यो मैले तिमीलाई भने, खीर पकायेर एघाहौं दिनमा गरोस्, यो तेस्रो चाँही षोडशी हो॥ ६६॥ चालीस र आठ अर्थात् अठचालीस श्राद्ध गर्नाले प्रेतयोनि नाश हुन्छ र पितृहरूका पंक्तिमा मिल्दछ, जसको विधि पूर्वक भयेको छैन तेसले प्रेतयोनिनै भोग्नु पर्दछ॥६७॥ पितृलोकमा जानलाई यिनै तीन षोडशी अर्थात् मलिन, मध्यम, उत्तम गरोस्, श्राद्धहरू जसको भयेको छैन प्रेत योनि धेरै काल सम्म भोगी रहनु पर्छ॥ ६८॥ षोडशी नामको यो तीनै श्राद्ध जहाँ सम्म जस्को हुँदैन आफ्ना हातले दान दियेको अरूहरूले दान गरी दियेको, त्यहाँ सम्म त्यस्ले भोग्न पाउँदैन॥ ६९॥ त्यसो हुनाले छोराले विधि पूर्वक तीनै षोडशी गर्नु कर्तव्य नै हो। पतिको काम जुन स्त्रीले गर्दछन् तेस्को कल्याण अनन्त हुन्छ॥ ७०॥ जुन स्त्रीले मरेका पतिको दशक्रिया

उपकाराय सा भर्तुर्जीवत्येषा पतिव्रता। जीवितं सफलं तस्या या मृतं स्वामिनं भजेत्॥ ७२॥
अथ कश्चित्प्रमादेन म्रियते वह्निवारिभिः। संस्कारप्रमुखं कर्म सर्वं कुर्याद्यथा विधि॥ ७३॥
प्रमादादिच्छया वापि नागाद्वा म्रियते यदि। पक्षयोरुभयोर्नागं पञ्चमीषु प्रपूजयेत्॥ ७४॥
कुर्यात्पिष्टमयीं लेख्यां नागभोगाकृतिं भुवि। अर्चयेत्तां सितैः पुष्पैः सुगन्धैश्चन्दनेन च॥ ७५॥
प्रदद्याद्धूपदीपौ च तण्डुलांश्च तिलान्क्षिपेत्। आमपिष्टं च नैवेद्यं क्षीरं च विनिवेदयेत्॥ ७६॥
सौवर्णं शक्तितो नागं गां च दद्याद् द्विजन्मने। कृताञ्जलिस्ततो ब्रूयात्प्रीयतां नागराडिति॥ ७७॥

र पाक्षिक क्षयतिथिको श्राद्धहरू गर्दछन् तिनी सती जतिकै हुन् भनी मैले भन्दछु॥ ७१॥ यिनी पतिव्रता उपकारका निमित्त बाँचेकी छन् तिन्को बाच्नुनै सफल हो जस्ले मरेका पतिलाई भजेकीछन्॥ ७२॥ अब प्रमाद भनेको बेहोसी आगोहरूमा मऱ्यो वा जलमा डुबीमऱ्यो भने तेस्लाई संस्कार गरी विधि पूर्वक सबै कर्म गरोस्॥ ७३॥ प्रमादले अथवा इच्छाले वा सर्पले डसेर मरे यदि भने दुवै पक्षका पञ्चमीमा नागको पूजा गरोस॥ ७४॥ पिठाले नागको आकार भूमिमा लेखेर सेतो, चन्दन, फूल अक्षता सुगन्धि वस्तुहरूले पूजा गरोस्॥ ७५॥ धूप, दीप, तिल, चामल, काँचो पिठाले बनेका नैबेद्यहरू र दूध चढाओस॥ ७६॥ आफ्ना शक्ति अनुसार सुवर्णको नाग बनायेर ब्राह्मणलाई दान देवोस्, गाईदान गरोस वहाँ पछी हात जोडी नाग राजा हामीहरूदेखि खुशी हुन् भनोस्॥ ७७॥ एति गरी सके पछी फेरि तिनीहरु

पुनस्तेषां प्रकुर्वीत नारायणबलिक्रियाम्। तया लभन्ते स्वर्वासं मुच्यते सर्वपातकैः॥ ७८॥
एवं सर्वक्रियां कृत्वा घटं सान्नं जलान्वितम्। दद्यादाब्दं यथा संख्यान्पिडान् वा सजलान् क्रमात्॥ ७९॥
एवमेकादशे कृत्वा कुर्यात सापिण्डनं ततः। शय्यापदानां दानं च कारयेत् सूतके गते॥ ८०॥

॥ इति श्रीगरुडपुराणे सारोद्धारे एकादशदिन विधि निरूपणं नाम द्वादशोऽध्यायः॥ १२॥

अगति परेर मरेकाहरूको नारायण बलि गर्नाले सम्पूर्ण पापले मुक्भै स्वर्गवास हुन्छन्॥ ७८॥ यस्ता हिसावले सबै काम गरेर वर्ष दिन सम्म अन्न जल पूर्ण भयेको घड़ा दान गरोस् अथवा पिण्ड जलाञ्जलि दिने गरोस् (नित्य गरोस् वा मासिक हरुमा)॥ ७९॥ यस्ता प्रकारले एकादशाहका दिनमा गरेर त्यहाँ पछी सपिण्डन (भनेको पिण्डमेलन जुठो सिद्धीये पछी) शय्या पददानहरु दान गरोस्॥ ८०॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां द्वादशोऽध्यायः॥ १२॥

✻ अथ त्रयोदशोऽध्यायः ✻

गरुड उवाच —

सपिण्डनविधिं ब्रूहि सूतकस्य च निर्णयम्। शय्यापदानां सामग्री तेषां च महिमां प्रभो ॥ १ ॥

श्रीभगवानुवाच —

शृणु ताक्ष्र्य प्रवक्ष्यामि सपिण्डस्याखिलां क्रियाम्। प्रेतनाम परित्यज्य यया पितृगणे विशेत् ॥ २ ॥
न पिण्डो मिलितो येषां पितामहशिवादिषु। नोपतिष्ठन्ति दानानि पुत्रैर्दत्तान्यनेकधा ॥ ३ ॥
अशुद्धः स्यात्सदा पुत्रो न शुद्धयति कदाचन। सूतके न निवर्तेत सपिण्डीकरणं विना ॥ ४ ॥

गरुड बिन्ती गर्दछन् — हे प्रभो, सपिण्डीको विधि, जुठोको निर्णय र शैयाको र पददानहरूका सामग्री र तिनीहरूको महिमा मेरा ऊपर कृपा गरेर आज्ञा हवोस् ॥ १ ॥ **श्रीभगवान् आज्ञा गर्नु हुन्छ —** गरुडजी! सुन, तिमीलाई सपिण्डी आदि कर्महरू भन्दछु, जुन गर्नाले प्रेतयोनि छोडि पितृगणमा प्रवेश गर्दछन् ॥ २ ॥ जस्को पितामहादिहरूमा पिण्ड मिलेन तेस्का छोराहरूले अनेक प्रकारका दानहरू दिनाले पनि मृतकलाई प्राप्त हुँदैन ॥ ३ ॥ सदा सर्वदा पुत्र अशुद्ध रहन्छ, कहिलै शुद्ध हुदैन यस्को कारण केहो भने सपिण्डी न

तस्मात्पुत्रेण कर्तव्यं सूतकान्ते सपिण्डनम्। सूतकान् ते प्रवक्ष्यामि सर्वेषां च यथोचितान् ॥ ५ ॥
ब्राह्मणस्तु दशाहेन क्षत्रियो द्वादशेऽहनि। वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥ ६ ॥
दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्धयन्ति गोत्रजाः ॥ ७ ॥
चतुर्थे दशरात्रं स्यात्षण्निशाः पुंसि पञ्चमे। षष्ठे चतुरहः प्रोक्तं सप्तमे च दिनत्रयम् ॥ ८ ॥
अष्टमे दिनमेकं तु नवमे प्रहरद्वयम्। दशमे स्नानमात्रं हि मृतकं जन्मसूतकम् ॥ ९ ॥

गरे सम्म जुठो जाँदैन ॥ ४ ॥ त्यस्कारणले सपिण्डी कर्म (जुठो सकिये पछी) गरोस्। अब सम्पूर्ण मनुष्य जातिलाई उचित जुठाहरूको बयान गर्दछु ॥ ५ ॥ चारै वर्णहरूमा ब्राह्मण दशदिनमा, क्षत्रिय बाहदिनमा, वैश्य पन्द्रदिनमा, शूद्र एक महिनामा शुद्ध हुन्छन् ॥ ६ ॥ सपिण्डी मित्रका भाईहरू मृताशौचमा दशदिनले शुद्ध हुन्छन्। सपिण्डी बाहिरका दाजुभाईहरू तीनरातमा शुद्ध हुन्छन्, एकै गोत्रमा वा एकै वंशमा जन्मेका वा सात पुस्ता बितेकाको स्नान गर्नाले मात्र शुद्धि हुन्छ ॥ ७ ॥ चार पुस्ते दाजु भाईहरू छन् भने दशदिनमा, पाँच पुस्ता भयेको छ भने छ रातमा छ पुस्ता बितेको छ भने चार दिनमा, सात पुस्ता भैसके को छ भने तिनैदिनमा शुद्धि हुन्छ भनेको छ ॥ ८ ॥ आठ पुस्ता भैसकेको छ भने एक दिनमा शुद्धि हुन्छ नौ पुस्ता भयेको छ भने दुई पहरमा शुद्धि हुन्छ। दशपुस्ते छन् भने स्नान मात्रले शुद्धि हुन्छ।

ग० देशान्तरगतः कश्चिच्छ्रणुयाद्यो ह्यनिर्दशम्। यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्॥ १०॥ त्र०
पु० अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्। संवत्सरे व्यतीते तु स्नानमात्राद्विशुध्यति॥ ११॥ अ०
आद्यभागद्वयं यावन्मृतकस्य च सूतके। द्वितीये पतिते चाद्यात्सूतकाच्छुद्धिरिष्यते॥ १२॥
आदन्तजननात्सद्य आचौलात्नैशिकी स्मृता। त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम्॥ १३॥
ओजन्मतस्तु चौलान्तं यत्र कन्या विपद्यते। सद्यःशौचं भवेत्तत्र सर्ववर्णेषु नित्यशः॥ १४॥

मृताशौच (जुठो) र जन्मशौच (सुतका) मा यही छ॥ ९॥ कोही परदेशमा गयेकाले दशदिन भित्रमा अशौच सुन्यो भने दशदिन भित्रमा जति दिन बाकी छ उति दिन बारनाले शुद्ध हुन्छ॥ १०॥ दशदिन बिती सके पछी सुन्यो भने तिन रातमा शुद्ध हुन्छ। वर्ष पुगेकोछ भने स्नान गर्नाले मात्र शुद्ध हुन्छ॥ ११॥ मृताशौचमा सुतकको दुई भाग बिते पछी अर्को मृताशौच पर्न आयो भने पहिलो आशौचका सँगै शुद्ध हुन्छ॥ १२॥ अव बालकहरुको आशौच भन्दछु— जन्मेदेखि दाँत नउम्रे सम्मका बालकहरुको अशुद्धि तत्काल मात्र हुन्छ दाँत उम्रेका तर क्षौर न भयेकाको एक रात अशुद्धि रहन्छ क्षौर भयेका व्रतबन्ध नभयेका तीन रात्रमा शुद्ध हुन्छन् व्रतबन्ध भयेकाको ता दश रात्रमा शुद्धि हुन्छ॥ १३॥ कन्या जन्मदेखि चूडा (अर्थात् ३ वर्षकी) सम्ममा मरीन् भने त्यस्तामा तत्काल आशौचबाट शुद्ध हुन्छन् १५४
चारै वर्णहरुको यही विधि हो॥ १४॥ कन्याको वागदान नभये सम्मको एकदिन मात्र आशौच रहन्छ यहाँदेखि उप्रान्तको अर्थात्

ग० ततो वाग्दानपर्यन्तं यावदेकाहमेव हि। अतःपरं प्रवृद्धानां त्रिरात्रमिति निश्चयः॥ १५॥ त्र०
पु० वाक्प्रदाने कृतात्वत्र ज्ञेयं चोभयतस्त्र्यहम्। पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि॥ १६॥ अ०
षण्मासाभ्यन्तरे यावद्गर्भस्त्रावो भवेद्यदि। तदा मासमैस्तासां दिवसैः शुद्धिरिष्यते॥ १७॥
अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यते। सद्यःशौचं सपिण्डानां गर्भस्य पतने सति॥ १८॥
सर्वेषामेव वर्णानां सूतके मृतकेऽपि वा। दशाहाच्छुद्धिरित्येष कलौ शास्त्रस्य निश्चयः॥ १९॥
आशीर्वादं देवपूजां प्रत्युत्थानाभिवन्दनम्। पर्यङ्के शयनं स्पर्शं न कुर्यान्मृतसूतके॥ २०॥

विवाहभै सकेकीको त्रिरात्रिले शुद्ध हुन्छ भन्ने निश्चय छ॥ १५॥ अब वाग्दान भैसके पछी मरेकी छन् भने पिता र ससुरा दुवै तिर तीन् तीन् दिन अशौच जान्नु विवाह भैसकेको ता जुन कुलमा विवाह भयेको छ उसै कुललाई दश रात जान्नु॥ १६॥ अब स्राव भयेकाको (तुहेकाको) छ महिना भित्रमा श्राव भयो भने महिनाका गन्तिले मातालाई आशौच जान्नु अनि शुद्धि हुन्छ॥ १७॥ यहाँदेखि उप्रान्त आफ्ना जातमा भनियेका रीतले आशौच आमालाई जान्नु, सपिण्डी भित्रकालाई गर्भपातको आशौचबाट तत्कालै शुद्धि हुँन्छ॥ १८॥ सबै वर्णहरूको जन्म मरणको आशौच दशै दिनमा शुद्ध हुन्छ भन्ने यस्तो कलियुगमा शास्त्रको निश्चय छ॥ १९॥ आशौच परेका बेलामा १५५
कसैलाई आशीर्वाद दिनु, देवताको पूजा गर्नु, कसैको आदर सत्कार गर्नु, ढोगदिनु, पलङ्गमा सुत्नु, छुतछात गर्नु आदि कसै सँग कसैले

ग० पु०

संध्यां दानं जपं होमं स्वाध्यायं पितृतर्पणम्। ब्रह्मभोज्यं व्रतं नैव कर्तव्यं मृतसूतके॥ २१॥
नित्यनैमित्तिक काम्यं सूतके यः समाचरेत्। तस्य पूर्वकृतं नित्यादिकं कर्म निवश्यति॥ २२॥
व्रतिनो मन्त्रपूतस्य साग्निकस्य द्विजस्य च। ब्रह्मनिष्ठस्य यतिनो नहि राज्ञां च सूतकम्॥ २३॥
विवाहोत्सवयज्ञेषु जाते च मृतसूतके। तस्य पूर्वकृतं चान्नं भोज्यं तन्मनुरब्रवीत्॥ २४॥
सूतके यस्तु गृह्णाति तदज्ञानान्न दोषभाक्। दाता दोषमवाप्नोति याचकाय ददन्नपि॥ २५॥
प्रच्छाद्य सूतकं यस्तु ददात्यन्नं द्विजाय च। ज्ञात्वा गृह्णन्ति ये विप्रा दोषभाजस्त एव हि॥ २६॥

न गर्नु॥ २०॥ सन्ध्या, दान, जप, होम, पढ्नु, पढाउनु, पाठगर्नु, पितृतर्पण, ब्राह्मण भोजन, व्रत उपवास मृताशौचमा न गर्नु॥ २१॥ नित्य कर्म, नैमित्तिक कर्म, कामनाका कर्म, आशौचमा जो गर्छ त्यस्को पहिले गरेका नित्य कर्महरू सबै नाश हुन्छन्॥ २२॥ ब्रह्मचारी, मंत्रले पवित्र भयेका, अग्नि होत्री ब्राह्मण, ब्रह्मनिष्ठ भयेका, योगीहरू, राजाहरूलाई आशौच लाग्दैन॥ २३॥ विवाहका उत्सवमा, यज्ञहरूमा आशौच आयोभने नान्दिमुखि कर्म भै सके पछि सुतक जुठो पऱ्यो भने पहिले बनायेका अर्थात् आशौच पर्नुभन्दा पहिले बनायेका अन्नहरू खानु हुन्छ भनी मनुस्मृतिमा भनेको छ॥ २४॥ आशौच परेको था न पाई जस्ले लिन्छ त्यस्लाई दोष लाग्दैन, किन्तु दिनु हुँदैन भन्ने जानि जानि दिने दाता नै पापको भागी हुन्छ॥ २५॥ आशौच परेको ब्राह्मणहरूलाई खोजेर जो दिन्छ अथवा जानि जानि ब्राह्मणले लिए

त्र० अ०

१५६

ग० पु०

तस्मात्मृतकशुद्ध्यर्थं पितुः कुर्यात्सपिण्डनम्। ततः पितृगणैः सार्द्धं पितृलोकं स गच्छति॥ २७॥
द्वादशाहे त्रिपक्षे वा षण्मासे वत्सरेऽपि वा। सपिण्डीकरणं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः॥ २८॥
मया तु प्रोच्यते तार्क्ष्य शास्त्रधर्मानुसारतः चतुर्णामेव वर्णानां द्वादशाहे सपिंडनम्॥ २९॥
अनित्यात्कलिधर्माणां पुंसो चैवायुषःक्षयात्। अस्थिरत्वाच्छरीरस्य द्वादशाहे प्रशस्यते॥ ३०॥
व्रतबन्धोत्सवादीनि व्रतस्योद्यापनानि च। विवाहादि भवेन्नैव मृते च गृहमेधिनि॥ ३१॥
भिक्षुर्भिक्षां न गृह्णाति हन्तकारी न गृह्णते। नित्यं नैमित्तिकं लुप्येद्यावत्पिण्डं न मेलितम्॥ ३२॥

ब्राह्मणहरूनै पाप भागी हुन्छन्, दातालाई दोष छैन॥ २६॥ त्यस कारणले मृताशौच गात्रको शुद्ध हुनलाई पिताको सपिण्डी गरोस्, तब पितृ गणहरूका साथ लागि पितृलोक जान्छ॥ २७॥ पिण्डमेलन कैले गर्नु भने वर्ष दिन पुगे पछी अथवा छ महिनामा वा त्रैपक्षमा अथवा बाह्र दिनमा गरोस् भनी यसकुराका तत्त्व जान्ने मुनिहरूले भनेका छन्॥ २८॥ हे गरुडजी, धर्म शास्त्रको अन्सारले यस कलियुगमा चारै वर्णहरूका सपिण्डी कर्म बाह्रै दिनमा समाप्त गर्नु भनी मैले भन्दछु॥ २९॥ किन भने कलियुगमा सबै अनित्य हुनाले र शरीर पनी
१४ अस्थिर हुनाले बाह्रौं दिनमै गर्नु असल छ॥ ३०॥ सपिण्डी न गर्नाले अशुद्ध रहिन्छ। सपिण्डी भित्रका दाजु भाईहरू पनि अशुद्ध रहने हुनाले व्रतप्रतिष्ठाहरू कुनै पनि हुँदैनन्॥ ३१॥ यसै हुनाले भिक्षुकहरुले भिक्षा लिँदैनन्, हन्ताकारहरूले पनि ग्रहण गर्दैनन्

त्र० अ०

१५७

कर्मलोपात्प्रत्यवायी भवेत्तस्मात्सपिण्डनम्। निरग्निकः साग्निको वा द्वादशाहे समाचरेत्॥ ३३॥
यत्फलं सर्वतीर्थेषु सर्वयज्ञेषु यत्फलं। तत्फलं समवाप्नोति द्वादशाहे सपिण्डनात्॥ ३४॥
अतः स्नात्वा मृतस्थाने गोमयेनोपलेपिते। शास्त्रोक्तेन विधानेन सपिण्डीं कारयेत् सुतः॥ ३५॥
पाद्यार्घ्याचमनीयाद्यैर्विश्वेदेवांश्च पूजयेत्। कुपित्रे विकिरं दत्वा पुनराप उपस्पृशेत्॥ ३६॥
दद्यात्पितामहादीनां त्रीपिण्डांश्च यथाक्रमम्। वसुरुद्रार्करूपाणां चतुर्थं मृतकस्य च॥ ३७॥

(हन्तकार भनेका बलि वैश्वदेवकर्मका देवताहरू)। जहाँ सम्म पिण्डको मेलन हुँदैन नित्य नैमित्तिक गृहस्थले गर्नु पर्ने कर्महरू सबै लुप्त हुन्छन्॥ ३२॥ कर्म नाश हुनाले पापी हुन्छ त्यस्कारणले सपिण्डी क्रिया गर्ने काम गरोस्। अग्निहोत्री होस् अथवा अग्निहोत्र न भयेकाको पनी बान्है दिनमा सपिण्डन कर्म गरोस्॥ ३३॥ सम्पूर्ण तीर्थहरूमा जानाले जुन पुण्य पाइन्छ, संपूर्ण यज्ञहरू गर्दा जो फल पाइन्छ त्यो फल बान्हौं दिनमा पिण्डमिलन हुँनाले पाउँछ॥ ३४॥ यसैकारणले स्नान गरेर मरेका ठाउँमा गोबरले लिपी शास्त्रहरुले भनेका विधिले छोराले सपिण्डीको काम गरोस्॥ ३५॥ पाद्य, अर्घ, आचमनि गरी विश्वेदेवाको पूजा गरोस्, अनि कुपितृहरुलाई विकिर देवोस्, फेरि हात पाउ धोई आचमन गरोस्॥ ३६॥ अनि पितामहादि तीन जनाहरुलाई क्रमैले तीन पिण्ड वसुस्वरूप, रुद्र, आदित्य भनेर देवोस चौथो जो मरेको छ प्रेतलाई दिनु॥ ३७॥ चन्दन, अक्षता, फूल, तुलसीपत्रहरुले धूप दीप वस्त्रभोजनहरूले मुखशुद्धि

चन्दनैस्तुलसीपत्रैर्धूपैर्दीपैः सुभोजनैः। मुखवासैः सुवस्त्रैश्च दक्षिणाभिश्च पूजयेत्॥ ३८॥
प्रेतपिण्डं त्रिधा कृत्वा सुवर्णस्य शलाकया। पितामहादिपिण्डेषु मेलयेत्तं पृथक्पृथक्॥ ३९॥
पितामह्या समं मातुः पितामहसमं पितुः। सपिण्डीकरणं कुर्यादिति तार्क्ष्य मतं मम॥ ४०॥
मृते पितरि यस्याथ विद्यते च पितामहः। तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः॥ ४१॥
तेभ्यश्च पैतृकं पिण्डं मेलयेत्तं त्रिधा कृतम्। मातर्यग्रे प्रशान्तायां विद्यते च पितामही॥ ४२॥
तदा मातृकश्राद्धेऽपि कुर्यात् पैतृकवद्विधिम्। यद्वा मयि महालक्ष्म्यां तयोः पिण्डं च मेलयेत्॥ ४३॥

दक्षिणाहरूले पूजा गरोस्॥ ३८॥ अब प्रेतपिण्डलाई सुनको तारले तीन टुक्रा गरेर पितामहादिका तीन पिण्डहरूमा क्रमैले ती पिण्डका टुक्रा एक एकमा मेलन गरोस्॥ ३९॥ आमाको सपिण्डी गर्दा पितामहीहरू संग, बाबाको पितामहहरू संग गरोस् यस्तो मेरो संमति छ गरुडजी॥ ४०॥ जस्को पिता मरे तर पितामह जीवित छन् भने तिनले प्रपितामहहरुमा पिण्ड मेलन गरोस्॥ ४१॥ तीन भाग गरेको पिताको पिण्ड जो हो प्रपितामहहरू संग मेलन गरोस्, माता मरीन् तर पितामही बाँचेकैछन् भने॥ ४२॥ त्यहाँ मातृश्राद्ध पनि पितृको श्राद्धमा गरेका रीतिले गरोस् अथवा मेरी महालक्ष्मीमा मिलाओस्। पिताको ममा भये पनि हुन्छ॥ ४३॥ जुन स्त्रीको पुत्रहरू कोही छैन

अपुत्रायाः स्त्रियाः कुर्यात्पतिः सपिण्डनादिकम्। श्वश्रादिभिः सहैवास्याः सपिण्डीकरणं भवेत् ॥ ४४ ॥
भर्त्रादिभिस्त्रिभिः कार्यं सपिण्डीकरणं स्त्रियाः। नैतन्मम मतं तार्क्ष्य पत्या सापिण्ड्यमर्हति ॥ ४५ ॥
एकां चितां समारूढौ दम्पती यदि काश्यप। तृणमन्तरतः कृत्वा श्वशुरादेस्तदाचरेत् ॥ ४६ ॥
एक एव सुतः कुर्यादादौ पिण्डादिकं पितुः। तदूर्ध्वं च प्रकुर्वीत सत्याः स्नानं पुनश्चरेत् ॥ ४७ ॥
हुताशं या समारूढा दशाहाभ्यन्तरे सती। तस्या भर्तुर्दिने कार्यं शय्यादानं सपिण्डनम् ॥ ४८ ॥
कृत्वा सपिण्डनं तार्क्ष्य प्रकुर्यात्पितृतर्पणम्। उदाहरेत् स्वधाकारं वेदमन्त्रैः समन्वितम् ॥ ४९ ॥

तिनको सपिण्डी पतिले गरुन्। पिण्डमेलन सासुहरूका साथ गरे हुन्छ ॥ ४४ ॥ पति ससुराहरू संग स्त्रीको सपिण्डी कर्म हुँदैन। हे गरुडजी! स्त्रीको पतिका साथ पिण्ड मेलन गर्नु भन्ने मेरो संमति छैन ॥ ४५ ॥ हे गरुड! यदि सती भयी एकै चितामा जलेकी छन् भने यौटा तृणको अन्तर गरेर ससुराहरू संग सतीको सम्मेलन गरोस् ॥ ४६ ॥ ती सती भयेकी स्त्रीको पनि एकै छोराले गरुन्। पैले पिताको गरोस् अनि स्नान गरेर सती भयेकी माताको पिण्ड देवोस् ॥ ४७ ॥ दशदिन भित्रमा सती भयेकी छन् भने तिनको शैय्यादान सपिण्डी कर्महरू पतिको श्राद्ध दिनमा गरोस् ॥ ४८ ॥ हे गरुड! सपिण्डी विधि गरेर पितृहरूको तर्पण गरोस्। वेदका मन्त्रहरूले स्वाहाकारको पनि

अतिथिं भोजयेत्पश्चाद्धन्तकारं च सर्वदा। तेन तृप्यन्ति पितरो मुनयो देवदानवाः ॥ ५० ॥
ग्रासमात्रा भवेद्भिक्षा चतुर्ग्रासं तु पुष्कलम्। पुष्कलानि च चत्वारि हन्तकारो विधीयते ॥ ५१ ॥
सपिण्ड्यां विप्रचरणौ पूजयेच्चन्दनाक्षतैः। दानं तस्मै प्रदातव्यमक्षय्यतृप्तिहेतवे ॥ ५२ ॥
वर्षवृत्तिघृतं चान्नं सुवर्णं रजतं सुगाम्। अश्वं गजरथं भूमिमाचार्याय प्रदापयेत् ॥ ५३ ॥
ततश्च पूजयेन्मन्त्रैः स्वस्तिवाचनपूर्वकम्। कुंकुमाक्षतनैवेद्यैर्ग्रहान् देवी-विनायकम् ॥ ५४ ॥
आचार्यस्तु ततः कुर्यादभिषेकं समन्त्रकम्। बद्ध्वा सूत्रं करे दद्यान्मंत्रपूतांस्तथाक्षताम् ॥ ५५ ॥

उच्चारण गरोस् ॥ ४९ ॥ यति गरेपछी अतिथिहरूलाई भोजन र हन्तकारलाई पनि देलोस् ॥ ५० ॥ अब कुन कर्ममा कति अन्न चाहिन्छ सो सुन एक ग्रास मात्रलाई भिक्षा भन्दछन्, चार ग्रासको एक पुष्कल तथा चार पुष्कलको एक हन्तकार हुन्छ ॥ ५१ ॥ सपिण्डीमा ब्राह्मणको चरण चन्दनहरूले पूजा गरोस्। पितृहरुको अक्षय तृप्तिका निमित्त ती ब्राह्मणलाई दान देवोस् ॥ ५२ ॥ वर्ष दिनको जीविकाका लागि ध्यू, अन्न, सुन, चाँदि, घोड़ा, हात्ती, पृथ्वीहरू आचार्यलाई दीउन् ॥ ५३ ॥ त्यहाँ पछी वेदका मन्त्रहरूले शान्ति-स्वस्ति वाचन गरायेर चन्दन, अक्षता, कुमकुम, धूप-दीप नैवेद्यहरूले गणेश देवी देवता ग्रहहरूको पूजा गरोस ॥ ५४ ॥ अनि आचार्यले अभिषेकका मन्त्रहरुले अभिषेकगरेका र हातमा रक्षा डोरीबाँधि तिलक प्रसाद लेवोस ॥ ५५ ॥ त्यहाँ पछि ब्राह्मणहरूलाई मीठा अन्न पक्वान्नहरूले भोजन गराई

ततश्च भोजयेद्विप्रान् मिष्टान्नैर्विविधैः शुभैः। दद्यात्सदक्षिणांस्तेभ्यः सजलान्नद्विषड्घटान्॥ ५६॥
वार्यायुधप्रतोदस्तु दण्डस्तु द्विजभोजनात्। स्प्रष्टव्यानन्तरं वर्णैःशुद्ध्येरंस्ते ततः क्रमात्॥ ५७॥
एवं सपिण्डनं कृत्वा क्रियावस्त्राणि संत्यजेत्। शुक्लाम्बरधरो भूत्वा शय्यादानं प्रदापयेत्॥ ५८॥
शय्यादानं प्रशंसन्ति सर्वे देवाः सवासवाः। तस्माच्छय्या प्रदातव्या मरणे जीवितेऽपि वा॥ ५९॥
सारदारुमयीं रम्यां सुचित्रैश्चित्रिता दृढाम्। पट्टसूत्रैर्विततनितां हेमपत्रैरलंकृताम्॥ ६०॥
हंसतूलीप्रतिच्छन्नां शुभशीर्षोपधानिकाम्। प्रच्छादनपटोयुक्तां पुष्पगन्धैः सुवासिताम्॥ ६१॥

ती ब्राह्मणहरूलाई दक्षिणाका संग १२ वटा जलले पूर्ण भयेका घडा र अन्न देवोस्॥ ५६॥ ब्राह्मण भोजन गरी सक् पछी चारै वर्णहरूले क्रमैले जल, हतियार, तुलो, लट्ठीको स्पर्शले शुद्ध हुंछन्॥ ५७॥ यस्ता प्रकारले सपिण्डी कर्म गरेर क्रियामा लगायेका लुगाहरू त्यागी शुद्ध सफा सेतो वस्त्र लगायेर शैय्यादान गरोस्॥ ५८॥ इन्द्रादि देवताहरू शय्यादानको प्रशंसा गर्दछन्। त्यस्कारणले मरे पछी अथवा जीवित छँदा पनि शैय्या दान गरोस्॥ ५९॥ शैय्याको खाट कस्तो हुनु पर्छ भने असल बलियो काठको खुट्टा हालेको बलिया रेशमका डोरीले बुनेको सुनका पाताहरूले शोभायमान भयेको॥ ६०॥ हाँसको जस्तो सेतो रूबोले बनायेको नरम ढसना, शिरानी, राम्रा तन्नाहरुले युक्त भयेको फूलका सुगन्धले सुवासित भयेको॥ ६१॥ मनोहर बन्धनले बाँधेको (फराक) तूलो स्थापना राखोस्॥ ६२॥ छाता, चाँदीको

दिव्यबन्धैः सुबद्धां च सुविशालां सुखप्रदाम्। शय्यामेवंविधां कृत्वाह्यास्तृतायां न्यसेद्भुवि॥ ६२॥
छत्रदीपालयं रौप्यं चामरासनभाजनम्। भृङ्गारकरकादश पञ्चवर्णवितानकम्॥ ६३॥
शयनस्य भवेत्किंचिद्यच्चान्यदुपकारकम्। तत्सर्वं परितस्तस्याः स्वे स्वे स्थाने नियोजयेत्॥ ६४॥
तस्यां संस्थापयेद्धैमं हरिं लक्ष्मीसमन्वितम्। सर्वाभरणसंयुक्तमायुधाम्बरसंयुतम्॥ ६५॥
स्त्रीणां च शयने धृत्वा कज्जलारक्तकुङ्कुमम्। वस्त्रं भूषादिकं यच्च सर्वमेव प्रदापयेत्॥ ६६॥
ततो विप्रं सपत्नीकं गन्धपुष्पैरलंकृतम्। कर्णाङ्गुलीयाभरणैः कण्ठसूत्रैश्च काञ्चनैः॥ ६७॥
उष्णीषमुत्तरीयं च चोलकं परिधाय च। स्थापयेत्सुखशय्यायां लक्ष्मीनारायणाग्रतः॥ ६८॥

पानस, चँमर, आसन, भाँडाहरू, करूवा, झारी, ऐना, पंचरंगी चँदुवाआदि॥ ६३॥ असल वस्तुहरु शैय्याका चारै तीर जुनठाउँमा जे राख्नु पर्छ त्यो वस्तु त्यसै ठाउँमा राखोस्॥ ६४॥ ती शैय्यामा लक्ष्मीनारायणको मूर्ति सुवर्णले बनायेको संपूर्ण गहनाहरू शंख, चक्र, गदा, पद्महरूले शोभायमान भयेको राखोस्॥ ६५॥ स्त्रीको शैय्यामा गाजल, माहूर, सिन्दूर, सिम्रीक, पोते, धागो, चुराहरू गहना वस्त्रहरू राखोस्॥ ६६॥ त्यहाँ पछी ब्राह्मण-ब्राह्मणीलाई चन्दन फूलमालाहरू र कानका कुण्डल, औंलाको औंठी, कण्ठा, जन्तर, तिलहरी र सुवर्णले बनेका आभूषणले शोभायमान गरोस्॥ ६७॥ अनि पगरी, उपर्ना (पछेउरा) भोटो, चोलो, धोती, साडीहरू लगाई दियेर लक्ष्मीनारायणको

कुंकुमैः पुष्पमालाभिर्हरिं लक्ष्मीं समर्चयेत्। पूजयेल्लोकपालांश्च ग्रहान् देवीविनायकम्॥ ६९॥
उत्तराभिमुखो भूत्वा गृहीत्वा कुसुमाञ्जलिम्। उच्चारयेदिमं मन्त्रं विप्रस्य पुरतः स्थितः॥ ७०॥
यथा कृष्ण त्वदीयास्ति शय्या क्षीरोदसागरे। तथाभूयादशून्येयं मम जन्मनि जन्मनि॥ ७१॥
एवं पुष्पाञ्जलिं विप्रे प्रतिमायां हरेः क्षिपेत्। ततः सोपस्करं शय्यादानं संकल्पपूर्वकम्॥ ७२॥
दद्याद्व्रतोपदेष्ट्रे च गुरवे ब्रह्मवादिने। गृहाण ब्राह्मणानां त्वं कोऽदाती च कीर्तयन्॥ ७३॥
आन्दोलयेद्द्विजं लक्ष्मीं हरिञ्च शयने स्थितम्। ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत्॥ ७४॥

मूर्तिका अघिल्तिर बसाओस्॥ ६८॥ चन्दन, फूल-माला, अबिरहरूले लक्ष्मीनारायणको र गणेश भगवती दश दिक्पालहरू र नवग्रहहरूको पूजा गरोस्॥ ६९॥ अनि उत्तर फर्केर पुष्पांजलि लियेर ब्राह्मणका अगाड़ी यो मन्त्र पढोस्॥ ७०॥ हे कृष्णजी, हजुरको शैय्या क्षीरसागरमा जस्तै शून्य छैन उस्तै मेरो पनि जन्म जन्मान्तरमा शून्य न होस्॥ ७१॥ यस्ता प्रकारले लक्ष्मीनारायणका मूर्तिमा र द्विज दम्पतिलाई (ब्राह्मण-ब्राह्मणी) पुष्पांजलि चढावोस्। अनि संपूर्ण वस्तुहरूले युक्त भयेको शैय्याको संकल्प लियेर॥ ७२॥ गायत्री गुरु, ब्रह्मवादी वेदपाठी कुटुम्बीलाई देवोस्। हे ब्राह्मण, यी शैय्यालाई (कोऽदात् भन्ने) मन्त्र उच्चारण गरी लिनुहोस् भनोस्॥ ७३॥ शयनमा बसेका लक्ष्मीनारायण र ब्राह्मण ब्राह्मणीलाई चमर पंखा डोलावोस, पाउदाबोस्, र प्रदक्षिणा गरी साष्टाङ्ग प्रणाम गरेर विर्सजन गरोस्॥ ७४॥

सर्वोपकरणैर्युक्तां प्रदद्यादतिसुन्दरम्। शय्यायां सुखसुप्त्यर्थं गृहं च विभवे सति॥ ७५॥
जीवमानः स्वहस्तेन यदि शय्यां ददाति यः। तज्जीवता वृषोत्सर्गं पर्वणीषु समाचरेत्॥ ७६॥
एवमेकस्य दातव्या बहूनां न कदाचन। सा विभक्ता च विक्रीता दातारं पातयत्यधः॥ ७७॥
पात्रे प्रदाय शयनं वांञ्छितं फलमाप्नुयात्। पिता च दाता तनयः परत्रेह च मोदते॥ ७८॥
पुरन्दरगृहे दिव्ये सूर्यपुत्रालयेऽपि च। उपतिष्ठेन्न सन्देहः शय्यादानप्रभावतः॥ ७९॥
विमानवरमारूढः सेव्यमानोऽप्सरोगणैः। आभूतसम्प्लवं यावत्तिष्ठत्यातङ्कवर्जितः॥ ८०॥

संपूर्ण सामग्रीले युक्त भयेको मनलाई हरणगर्ने, सुत्ता आनन्द दिने, यस्तो शैय्या देवोस्। आफ्नो सामर्थ्यछ भने तिनैलाई घर वारी खेतहरू पनि देवोस्॥ ७५॥ आफ्ना हातैले बाँचेकै बेलामा शय्यादान गरेको छ भने तेस्ले उत्तम पर्वहरूमा आफ्ना हातैले बृषोत्सर्ग पनि गरोस्॥ ७६॥ यो शैय्या कस्तो हो भने कसैलाई बाँड्नु हुँदैन। बाँड्यो भने अथवा बेच्यो भने दिने दाताले नरक भोग्नु पर्छ। यस्कारणले सुपात्रलाई दान दिनु॥ ७७॥ सत्पात्रमा शैय्या दिनाले मनले चितायेको फल भोग्न पाउँछ। यसलोकमा दानदिने छोरो र परलोकमा पिताले पनि सुख आनन्दको भोगगर्न पाउँछ॥ ७८॥ शैय्यादानका प्रभावले ईन्द्रका पुरीमा सूर्य पुत्रका (यमराज) नगरीमा सुन्दर घरमा वस्न पाउँछ, यस्मा केही पनी संदेह छैन॥ ७९॥ दानका प्रभावले उत्तम सुन्दर विमानमा चढी अप्सराहरूले सेवागरीयेका छंदा जहाँ सम्म महाप्रलय हुँदैन त्यहाँ सम्म आनन्दले तिनीहरुमा भोग गर्दछन्॥ ८०॥ शैय्यादानको कस्तो पुण्य छ भने सबै तीर्थहरू गर्नाले, ठूला साना सबै

सर्वतीर्थेषु तत्पुण्यं सर्वपर्वदिनेषु च। तेभ्यश्चाभ्यधिकं पुण्यं शय्यादानोद्भवं भवेत्॥ ८१॥
एवं दत्त्वा सुतः शय्यां पददानं प्रदापयेत्। तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते॥ ८२॥
छत्रोपानहबस्त्राणि मुद्रिका च कमण्डलुः। आसनं पञ्चपात्राणि पदं पञ्चविधं स्मृतम्॥ ८३॥
दण्डेन ताम्रपात्रेण ह्यामान्नैर्भोजनैरपि। अथ यज्ञोपवीतैश्च पदं संपूर्णतां व्रजेत्॥ ८४॥
त्रयोदशपदानीत्थं यथाशक्त्या विधाय च। त्रयोदशेभ्यो विप्रेभ्यः प्रदद्याद् द्वादशेऽहनि॥ ८५॥
अनेन पददानेन धार्मिका यान्ति सद्गतिम्। यममार्गगतानां च पददाने सुखप्रदम्॥ ८६॥

पर्वहरूको सेवन गर्नाले जो पुण्य पाईन्छ ती सबै भन्दा यस्को दानको फल बढता छ॥ ८१॥ यस्तो पुण्य दिने शैय्यादान गरेर अनि पददान गरोस्। तेस्को विधि सबै मैले तिमीलाई भन्दछु॥ ८२॥ पददानमा के चाहिन्छ भने छाता, जुत्ता, वस्त्र, औंठी, कमण्डलु, आसनी, पञ्चपात्र। यो पददान पाँच प्रकारको छ॥ ८३॥ दण्ड (लहुरी), तामाको भाँडा, आमान्न (न पकायेको अन्न), पक्वान्न र यज्ञोपवीत (जनै) हरूले पद संपूर्ण हुन्छ॥ ८४॥ यस्ता प्रकारले तेहवटा बनायेर आफ्ना शक्तिका अनुसार बाहौं दिनका दिन तेहजना ब्राह्मणहरूलाई देवोस्॥ ८५॥ यस्ता प्रकारका पददान दिनाले धर्मात्मा सद्गतिले जान्छ। यमराजको बाटोमा जानेहरूलाई पददान सुखदिने हुन्छ॥ ८६॥

आतपस्यात्र वै रोधो दह्यते येन मानवः। छत्रदानेन सुच्छाया जायते तस्य मूर्द्धनि॥ ८७॥
अतिसंकटसंकीर्णे यमलोकस्य वर्त्मनि। अश्वारूढाश्च ते यान्ति ददते यद्युपानहौ॥ ८८॥
शीतोष्णपातदुःखानि तत्र घोराणि खेचर। वस्त्रदानप्रभावेण सुखं निस्तरते पथि॥ ८९॥
यमदूता महारौद्राः करालाः कृष्णपिंगलाः। न पीडयन्ति तं मार्गे मुद्रिकायाः प्रदानतः॥ ९०॥
बहुधर्मसमाकीर्णे निर्वाते तोयवर्जिते। कमण्डलुप्रदानेन तृषितः पिबते जलम्॥ ९१॥
मृतोद्देशेन यो दद्यादुदपात्रं च ताम्रजम्। प्रपादानसहस्रस्य यत्फलं सोऽश्नुते ध्रुवम्॥ ९२॥

त्यो बाटामा सूर्य्य बहुतै लाग्दछन्। त्यसघामले मानिसहरूलाई पोल्दछ। छातादान गरेका प्रभावले असल छाया त्यस्का शरीरमा हुन्छ॥ ८७॥ अत्यन्त संकष्ट भयेको यमलोकको बाटो हुनाले जुत्ता दानका प्रभावले घोडामा चढेर जान्छन्॥ ८८॥ हे गरुडजी, त्यहाँ डरलाग्दो जाडो र गर्मी भयेकाले वस्त्र दानका प्रभावले सुख पूर्वक बाटो हिंडेर जान्छन्॥ ८९॥ औंठी दानका प्रभावले डर लाग्दो काला कैलाकेश भयेका यमदूतहरूले बाटामा तिनलाई दुःख दिदैनन्॥ ९०॥ धेरै गर्मी भयेको, वा न भयेका स्थानमा तृषा लाग्दा जलले पूर्णभयेका कमण्डलु दानगर्नाले आनन्दले जल पिउँदै जान्छन्॥ ९१॥ मरेकाको लागि जसले जलले पूर्ण भयेको तामाको घाडा दान गर्दछ त्यस्ले हजारौं पौशाला राख्नाले जुन पुण्य पाइन्छ त्यो एउटा जलपात्र दिनाले पाउँछ॥ ९२॥ आसन भोजन दिनाले यस् लोकको

ग० पु० प्र० अ०

आसने भोजने चैव दत्ते सम्यग्द्विजातये। सुखेन भुङ्क्ते पाथेयं पथि गच्छञ्शनैः शनैः॥ ९३॥
एवं सपिण्डनदिने कृत्वा दानं विधानतः। बहून् संभोजयेद्विप्रान् यः श्वपाकादिकानपि॥ ९४॥
ततः सपिण्डनादूर्ध्वमर्वासं वत्सरादपि। प्रतिमासं प्रदातव्यो जलकुम्भः सपिण्डकः॥ ९५॥
कृतस्य करणं नास्ति प्रेतकार्यादृते खग। प्रेतार्थं तु पुनः कुर्यादक्षय्यतृप्तिहेतवे॥ ९६॥
अतो विशेषं वक्ष्यामि मासिकस्याब्दिकस्य च। पाक्षिकस्य विशेषं च विशेषतिथिषु मृते॥ ९७॥
पौर्णमास्यां मृतो यस्तु चतुर्थी तस्य ऊनिका। चतुर्थ्यां तु मृतो यस्तु नवमी तस्य ऊनिका॥ ९८॥

बाटामा हिंड्दा सुख पूर्वक विस्तारै सामल खाँदै खाँदै जान्छ॥ ९३॥ यस्ता प्रकारले बाहदिन (सपिण्डीका दिन) दान दियेर धेरै ब्राह्मणहरूलाई र चाण्डाल (डूम) हरूलाई पनि खुवाउनु ॥९४॥ त्यहाँ पछी (सपिण्डीगरिसके पछी) वर्ष दिन सम्म (बाह्र दिन पछी वर्षीय भये सम्म) वर्षौ मैन्हा दिनमा (मासिक हरुमा) जल कुम्भ पिण्ड समेत देवोस्॥ ९५॥ हे गरुडजी! प्रेतको काम बाहेक अरु कुनै काम गरी सके पछी फेरि गर्नु पर्दैन तर प्रेतको काम अक्षयतृप्तिहोस् भन्नाका निमित्त बराबर गर्नुपर्छ॥ ९६॥ अब तिमीलाई मासिकको र वार्षिकको पाक्षिको र अरू विशेष तिथिहरूको विशेष कुरा भन्दछु॥ ९७॥ यदि कोही पूर्णीमाका दिन मऱ्यो भने त्यसको चतुर्थीको दिन उनमासिक हुन्छ, यदि चतुर्थी (चौथी) का दिन मऱ्यो भने त्यस्को नवमी उनमासिक हुन्छ॥ ९८॥ यदि नवमीमा मऱ्यो भने चतुर्दशी

ग० पु० प्र० अ०

नवम्यां तु मृतो यस्तु रिक्ता तस्य चतुर्दशी। इत्येवं पाक्षिकं श्राद्धं कुर्याद्विंशतिमे दिने॥ ९९॥
एक एव यदा मासः संक्रान्तिद्वयसंयुतः। मासद्वयगतं श्राद्धं मलमासे हि शस्यते॥ १००॥
एकस्मिन्मासि मासौ द्वौ यदि स्यातां तयोर्द्वयोः। तावेव पक्षौ तावेव तिथयस्त्रिंशदेव हि॥ १०१॥
तिथ्यर्धे प्रथमे पूर्वो द्वितीयाऽर्धे तदुत्तरः। मासाविति बुधैश्चिन्त्यौ मलमासस्य मध्यगौ॥ १०२॥
असंक्रान्ते च कर्तव्यं सपिण्डीकरणं खग। तथैव मासिकं श्राद्धं वार्षिकं प्रथमे तथा॥ १०३॥
संवत्सरस्य मध्ये तु यदि स्यादधिमासकः। तदा त्रयोदशे मासि क्रिया प्रेतस्य वार्षिकी॥ १०४॥

उनमासिक हुन्छ, यस्ता प्रकारले बिसौंदिनका दिन मासिक श्राद्ध गरोस्॥ ९९॥ अब एउटै मैन्हामा दुई ओटा संक्रान्ति भये भने (त्यस्लाई क्षयमास भन्दछन्) दुईटा महिनाको श्राद्ध मलमास (अधिक मासमा) मा गरोस्॥ १००॥ एउटै मैन्हा दुई मैन्हा भयो भने तिनै पक्ष र तिनी नै तिथीहरूमानै गरोस्, किन भने दिन तीस छ र तिथीहरू पनी पन्ध्रैछन्॥ १०१॥ अब तिमीलाई मलमासको निर्णय भन्दछु। पहिलो तिथिको आधा (एकपक्ष) पछी (मलमास) दोस्रो आधाको (अघि) मलमास जान्नु, यस्ता प्रकारको पण्डितहरूले चिन्तन (निश्चय) गरेका छन्॥ १०२॥ हे पक्षिराज! त्यसैले संक्रान्ति न भयेका मैनामा सपिण्डी कर्म, मासिक प्रथम र वार्षिक (वर्षी) गरून्॥ १०३॥ यदि वर्ष दिनका भित्र मलमास आयो भने त्यस्मा तेह्र मैना (मलमास समेत) मा वार्षिक कर्म गरोस्॥ १०४॥ अब संक्रान्ति छैन भने पिण्डलाई छाड्नु। संक्रान्तिले

पिण्डवर्ध्यमसंक्रान्ते संक्रान्तपिण्डसंयुतम्। प्रतिसंवत्सरं श्राद्धमेवं मासद्वयेऽपि च॥ १०५॥
एवं संवत्सरे पूर्णे वार्षिकं श्राद्धमाचरेत्। तस्मिन्नपि विशेषेण भोजनीया द्विजातयः॥ १०६॥
कुर्यात्संवत्सरादूर्ध्वं श्राद्धे पिण्डत्रयं सदा। एकोद्दिष्टं न कर्तव्यं तेन स्यात्पितृघातकः॥ १०७॥
तीर्थश्राद्धं गयाश्राद्धं गजच्छायं च पैतृकम्। अब्दमध्ये न कुर्वीत ग्रहणे न युगादिषु॥ १०८॥
यदा पुत्रेण वै कार्यं गयाश्राद्धं खगेश्वर। तदा संवत्सरादूर्ध्वं कर्तव्यं पितृभक्तितः॥ १०९॥
गयाश्राद्धात् प्रमुच्यन्ते पितरो भवसागरात्। गदाधरानुग्रहेण ते यान्ति परमां गतिम्॥ ११०॥

युक्त भयेको मैन्हामा पिण्ड देवोस् अर्थात् संक्रान्ति भये पनि न भये पनि यस्ता प्रकारका दुवै मैन्हामा वर्षिनी पिण्ड देओस्॥ १०५॥ यस्ता प्रकारको वर्ष दिन पुगे पछी (वर्षीको) श्राद्ध गरोस्। त्यस्मा पनि विशेषले ब्राह्मणहरूलाई भोजन गरावोस्॥ १०६॥ वर्ष पुगे पछि पनि श्राद्ध गर्दा त्रिपिण्डी नै गरोस्। यदि एकोदिष्ट मात्र गऱ्यो भने पितृघाती हुन्छ॥ १०७॥ तीर्थ श्राद्ध, गया श्राद्ध गज छाया योगमा ग्रहणमा युगादि पर्वहरुमा पनि वर्षी न सिद्धी न गरोस्॥ १०८॥ हे खगराज! पुत्रले गया श्राद्ध कैले गर्नु। वर्ष दिनको काम (वर्षी) गरीसके पछी पितृको भक्त भयेका पुत्रले गया श्राद्ध गरोस्॥ १०९॥ किन भने यो श्राद्ध गर्नाले पितृहरू भवसागर (नरक) देखि मुक्तभै गदाधर भगवानका अनुग्रहले परंगति (उत्तम लोक वैकुण्ठ) मा जान्छन्॥ ११०॥ गयाजीमा विष्णुको पाउलाई तुलसीका मंजरीहरूले पूजा गरोस्। ती पाउका आल-वाल

तुलसीमञ्जरीभिश्च पूजयेद्विष्णुपादुकाम्। तस्यालवादितीर्थेषु पिण्डान् दद्याद्यथाक्रमम्॥ १११॥
उद्धरेत् सप्त गोत्राणि कुलमेकोत्तरं शतम्। शमीपत्रप्रमाणेन पिण्डं दद्याद् गयाशिरे॥ ११२॥
गयामुपेत्य यः श्राद्धं करोति कुलनन्दनः। सफलं तस्य तज्जन्म जायते पितृतुष्टिदम्॥ ११३॥
श्रूयते चापि पितृभिर्गीता गाथा खगेश्वर। इक्ष्वाकोर्मनुपुत्रस्य कलापोपवने सुरैः॥ ११४॥
अपि नस्ते भविष्यन्ति कुले सन्मार्गशीलिनः। गयामुपेत्य ये पिण्डान् दास्यन्त्यस्माकमादरात्॥ ११५॥
एवमामुष्मिकीं ताक्ष्र्य यः करोति क्रियां सुतः। स स्यात्सुखी भवेन्मुक्तः कौशिकस्यात्मजो यथा॥ ११६॥

भयेका तीर्थहरूमा क्रमले पिण्डहरू देओस्॥ १११॥ गयाजीको पिण्ड दान कस्तो छ भने एक सय एक कुल सात गोत्रहरूलाई उद्धार गर्छ, श्रद्धावान् छ धन छैन भने पितृहरूलाई शमिका पात (शमिको अमलाको जस्तो पात, मसिमा खयरको जस्तो काँडा भयेका रूख) जत्रो पिण्ड दिनाले पनि मुक्त हुन्छन्॥ ११२॥ जो छोरो गयाजी पुगेर श्राद्ध श्रद्धाले गर्दछ त्यो छोरो कुललाई आनन्द दायक हुन्छ, त्यस्को जन्म सफल भयो, जसले पितृहरूलाई सन्तुष्ट गरायो॥ ११३॥ हे गरुडजी! वैवस्वत मनुको छोरा इक्ष्वाकुका दिव्य पितृहरूले हिमालयको नजिक कलापनाम भयेको उपवनमा गायेको गाथा सुनेको छु॥ ११४॥ (के भने) हामीहरूका वंशमा असल मार्गमा रहेका असल स्वभाव भयेका, गयामा गई हामीहरूलाई श्रद्धा पूर्वक पिण्ड दिने छन् कि (भनि भन्दछन्)॥ ११५॥ यस्ता तरहले यस्लोकको कर्म जो छोरो गर्दछ त्यो सुखी हुन्छ। जस्तै

भरद्वाजात्मजाः सप्त भुक्त्वा जन्मपरम्पराम्। कृत्वापि गोवधं तार्क्ष्य मुक्ताः पितृप्रसादतः॥ ११७॥
सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ। चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे॥ ११८॥
तेऽपि जाताःकुरुक्षेत्रे ब्राह्मणा वेदपारगाः। पितृभक्त्या च ते सर्वे गता मुक्तिं द्विजात्मजाः॥ ११९॥
तस्मात्सर्वप्रयत्नेन पितृभक्तो भवेन्नरः। इह लोके परे वापि पितृभक्त्या सुखी भवेत्॥ १२०॥
एतत्तार्क्ष्य मयाऽऽख्यातं सर्वमेवौर्ध्वदेहिकम्। पुत्रवाञ्छाप्रदं पुण्यंपितुर्मुक्तिप्रदायकम्॥ १२१॥
निर्धनोऽपि नरः कश्चिद्यः शृणोति कथामिमाम्। सोऽपि पापविनिर्मुक्तो दानस्य फलमाप्नुयात्॥ १२२॥

कौशिकका छोराहरू मुक्त भये॥ ११६॥ भरद्वाजका छोरा अनेक जन्म भोगेर पनि पितृहरूको प्रसादले गाईको वध गर्नाले पनी मुक्त भये॥ ११७॥ तिनै सात जना दशार्ण भन्ने स्थानमा व्याधा भयेर जन्मे फेरि कालञ्जर पर्वतमा तिनै सात जनाहरू मृग हुन गये। फेरि अर्को जन्ममा शरदीपमा सातजना चखेवा भयेर मानसरोवरमा हाँस भये॥ ११८॥ तिनै सात जना कुरुक्षेत्रमा वेदमा पारंगत भयेका ब्राह्मण हुँदा भये (तिनीहरू सबै) पितृहरूको श्रद्धा पूर्वक भक्ति गरेकाले (गाई मारेकोमा पनि) ब्राह्मण मुक्त भयेर गये॥ ११९॥ तस्मात्कारण हे गरुडजी! जसरी भये पनि पितृको भक्ति हुन्छ, जस्ले गर्दा यसलोकमा र परलोकमा पनि त्यो नर सुखी हुन्छ॥ १२०॥ यहाँ सम्म मैले सबै ऊर्ध्व देह सम्बन्धित कर्मको कुरा भने यी स कर्म कस्ता छन् भने पुत्रलाई इच्छा बमोजिमको पुण्य र पितालाई पनि मुक्ति दिने भयेका कर्म छन्॥ १२१॥ त्यसो हुनाले धनी छैन भने पनि यो कथालाई जो सुन्दछ त्यो पनि पापले मुक्त भयेर दानको फल पाउँदछ॥ १२२॥ मैले भनेका विधिले श्राद्ध दान पुण्य जो गर्दछ, गरुड

विधिना कुरुते यस्तु श्राद्धं दानं मयोदितम्। शृणुयाद् गारुडं चापि शृणु तस्यापि यत्फलम्॥ १२३॥
पिता ददाति सत्पुत्रान् गोधनानि पितामहः। धनदाता भवेत्सोपि यस्तस्य प्रपितामहः॥ १२४॥
दद्याद्विपुलमन्नाद्यं वृद्धस्तु प्रपितामहः। तृप्ताः श्राद्धेन ते सर्वे दत्वा पुत्रस्य वाञ्छितम्॥ १२५॥
गच्छन्ति धर्ममार्गैश्च धर्मराजस्य मन्दिरम्। तत्र धर्मसभायां ते तिष्ठन्ति परमादरात्॥ १२६॥

सूत उवाच —

एवं श्रीविष्णुना प्रोक्तमौर्ध्वदानसमुद्भवम्। श्रुत्वा माहात्म्यमतुलं गरुडो हर्षमागतः॥ १२७॥

॥ इति श्रीगरुडपुराणे सारोद्धारे सपिण्डनादिसर्वकर्मनिरूपणं नाम त्रयोदशोऽध्यायः॥ १३॥

पुराण सुन्नाले जो पुण्य फल पाइन्छ, त्यसको पनि महिमा सुन॥ १२३। बाबुले सज्जन छोरा, पितामह (बाबुका बाबु) ले गाई, धनहरु, प्रपितामहले (बाबुका बाजे) धन दिने हुन्छन्॥ १२४॥ वृद्ध प्रपितामह (बाबुका बाजेका बाबु) ले धेरै धन र अन्नहरू दिन्छन्, ती पितृहरु भयेर पुत्रको मनोरथ पूर्ण गर्दछन्॥ १२५॥ पुत्रले दान दियेको, श्राद्ध गरेको प्रभावले धर्मबाट धर्मराजका मन्दिरमा जान्छन्, त्यहाँ धर्म सभामा तिनी पितृहरू बड़ा आदर सत्कार सँग बस्तछन्॥ १२६॥ सूतजी शौनकादि ऋषिहरूलाई भन्नु हुन्छ कि यस्ता प्रकारले गरुड़लाई श्रीविष्णु भगवानले ऊर्ध्वगतिको काम भन्नु भो त्यो सबै माहात्म्य सुनेर गरुडजी अत्यन्त खुसी भये॥ १२७॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां त्रयोदशोऽध्यायः॥ १३॥

ॐ अथ चतुर्दशोऽध्यायः ॐ

गरुड उवाच —

यमलोकः क्रियन्मात्रः कीदृशः केन निर्मितः। सभा च किदृशी तस्यां धर्म आस्ते च कैः सह ॥ १ ॥
ये धर्ममार्गैर्गच्छन्ति धार्मिका धर्ममन्दिरम्। तान् धर्मानपि मार्गांश्च ममाख्याहि दयानिधे ॥ २ ॥

श्रीभगवानुवाच —

शृणु ताक्ष्र्य प्रवक्ष्यामि यद्गम्यं नारदादिभिः। तद्धर्मनगरं दिव्यं महापुण्यैरवाप्यते ॥ ३ ॥
याम्यनैर्ऋतयोर्मध्ये पुरं वैवस्वतस्य यत्। सर्ववज्रमयं दिव्यमभेद्यं तत्सुरासुरैः ॥ ४ ॥

गरुडजी बिन्ती गर्दछन् — भगवन्! यमलोक कति ठूलो छ, कसले बनायेको हो र त्यहाँ धर्मराज को कस्तो सँग कस् सँग बस्नु भयेको छ ॥ १ ॥ जुन धर्मात्माहरू धर्ममार्ग (बाटो) बाट धर्मराजका मन्दिरमा जान्छन् ती धर्महरू र बाटाहरू, हे दयासागर! मलाई आज्ञा होस् ॥ २ ॥ **भगवान् आज्ञा गर्नु हुन्छ —** हे गरुडजी! सुन म भन्दछु जहाँ नारदादि ऋषिहरू जान्छन् त्यो दिव्य (सुन्दर) नगर ठूला पुण्यहरूले पाइन्छ ॥ ३ ॥ जुन वैवस्वत (धर्मराज) को शहर हो, दक्षिण दिशाको र नैर्ऋत्य कुनाको माझमा छ देवता र दानवहरूले पनि

चतुरस्रं चतुर्द्वारमुच्चप्राकारवेष्टितम्। योजनानां सहस्रं हि प्रमाणेन तदुच्यते ॥ ५ ॥
तस्मिन्पुरेऽस्ति सुभगं चित्रगुप्तस्य मन्दिरम्। पञ्चविंशतिसंख्याकैर्योजनैर्विस्तृतायतम् ॥ ६ ॥
दशोच्छ्रितं महादिव्यं लोहप्राकारवेष्टितम्। प्रतोलीशतसंचारं पताकाध्वजभूषितम् ॥ ७ ॥
विमानगणसंकीर्णं गीतवादित्रनादितम्। चित्रितं चित्रकुशलैर्निर्मितं देवशिल्पिभिः ॥ ८ ॥
उद्यानोपवनैरम्यं नानाविहगकूजितम्। गन्धर्वैरप्सरोभिश्च समन्तात्परिवारितम् ॥ ९ ॥
तत्सभायां चित्रगुप्तः स्वासने परमाद्भुते। संस्थितो गणयेदायुर्मानुषाणां यथातथम् ॥ १० ॥

अभेद्य भयेको राम्रो वज्रैवज्रले बनेको छ ॥ ४ ॥ त्यस शहरमा चार ढोका छन् चारपाटे (कुना) भयेको अग्लो परखालले घेरेको हजार योजनको छ (एक योजनमा चार कोस हुन्छ) ॥ ५ ॥ त्यही शहरमा पचीसयोजन फराक भएको चित्रगुप्तको मन्दिर छ ॥ ६ ॥ त्यो चाँही दश योजन उँचा भयेको फलामको राम्रो परखाले बेरीयेको, सयौं बाटाहरू र ध्वजापताकाहरूले शोभायमान भयेको छ ॥ ७ ॥ अनेक किसिमका विमानहरूले भरि भयेको, गान बजानहरूले र निपुण चित्रकारीहरूले सिंगारेको, देवताका कालिगरहरूले बनायेको ॥ ८ ॥ बगैंचा फूलवारीहरूले र रमणीय, पक्षिहरूले शब्द गरियेको, गन्धर्व अप्सराहरूले चारै तिर रमणीय भयेको ॥ ९ ॥ यस्ता प्रकारका सभाले युक्त भयेको अद्भुत आसनमा बसेका चित्रगुप्तले मनुष्यहरूका आयुको यथार्थ गणना गरीरहेका छन् ॥ १० ॥ असल कमसल (बढीया

न मुह्यति कथञ्चित्स सुकृते दुष्कृतेऽपि वा। यद्यद्युपार्जितं कर्म शुभं वा यदि वाशुभम्॥ ११॥
तत्सर्वं भुञ्जते तत्र चित्रगुप्तस्य शासनात्। चित्रगुप्तालयात्प्राच्यां ज्वरस्यास्ति महागृहम्॥ १२॥
दक्षिणस्यां च शूलस्य लूताविस्फोटयोस्तथा। पश्चिमे कालपाशः स्यादजीर्णस्यारुचेस्तथा॥ १३॥
उदीच्यां राजरोगोऽस्ति पाण्डुरोगस्तथैव च। ऐशान्यां तु शिरोऽर्तिः स्यादाग्नेय्यामस्ति मूर्च्छना॥ १४॥
अतिसारो नैर्ऋते तु वायव्यां शीतदाहकौ। एवमादिभिरन्यैश्च व्याधिभिः परिवारितः॥ १५॥
लिखते चित्रगुप्तस्तु मानुषाणां शुभाशुभम्। चित्रगुप्तालयादग्रे योजनानां च विंशतिः॥ १६॥

घटीया) कुरामा जुन मनुष्यले शुभ अशुभ जस्तो गरेको छ तिनी कैले पनि विर्सदैनन्॥ ११॥ जुन ठाउँमा शुभ अशुभ कर्म जति छन् ती सबै चित्रगुप्तका आज्ञा बमोजीम भोग गर्दछन्, चित्रगुप्तका घरदेखि पूर्व ज्वराको ठूलो घर छ॥ १२॥ दक्षिणमा शूलरोगको र ठूलो खटिराहरूको घर छ। त्यस्तै पश्चिममा कालपाशको र अजीर्ण अरुचिको घर छ॥ १३॥ चित्रगुप्तका मन्दिरदेखि उत्तर दिशामा राजरोग र पाण्डुरोगको घर छ। ईशान कुनामा कपालका रोगहरूका घर छन्। आग्नेयमा मूर्छा हुने रोगको घर छ॥ १४॥ फेरि नैर्ऋत्य कुनामा अतिसारको घर छ। वायव्य कुनामा शीतको र दाहको घर छ। यस्तै प्रकारको अरू रोगहरूका घर पनि घरका वरिपरी छन्॥ १५॥ चित्रगुप्त मनुष्यले गरेका जति शुभ अशुभ छन् ती सबै लेख्दछन्। चित्रगुप्तका घरदेखि पच्चीस योजन अघिल्तिर॥ १६॥ त्यही शहरमा

पुरमध्ये महादिव्यं धर्मराजस्य मन्दिरम्। अस्ति रत्नमयं दिव्यं विद्युज्ज्वालार्कवर्चसम्॥ १७॥
द्विशतं योजनानां च विस्तारायामतः स्फुटम्। पञ्चाशच्च प्रमाणेन योजनानां समुच्छ्रितम्॥ १८॥
धृतं स्तम्भसहस्त्रैश्च वैडूर्यमणिमण्डितम्। काञ्चनालंकृतं नाना हर्म्यप्रासादसंकुलम्॥ १९॥
शारदाभ्रनिभं रुक्मकलशैः सुमनोहरम्। चित्रस्फटिकसोपानं वज्रकुट्टिमशोभितम्॥ २०॥
मुक्ताजालगवाक्षं च पताकाध्वजभूषितम्। घण्टानकनिनादाढ्यं हेमतोरणमण्डितम्॥ २१॥
नानाश्चर्यमयं स्वर्णकपाटशतसंकुलम्। नानाद्रुमलतागुल्मैर्निष्कण्टैः सुविराजितम्॥ २२॥

अत्यन्त सुन्दर धर्मराजको मन्दिर दिव्यरत्नमय हुनाले बिजुलीको ज्वाला झैं वा सूर्यको तेज जस्तो तेजीलो भयेको छ॥ १७॥ त्यो कस्तो छ भने दुई सय योजन लामो र उत्तीनै चौडा, स्पष्ट (चार कोस) बराबर भयेको, पचास योजन अग्लो (ऊँचा) भयेको॥ १८॥ वैदूर्य मणि (लसुने मणि)का हजारौं खम्बाहरूले सिंगारेका सुवर्णका पाताहरू जड़ेको अनेक तरहका घर र महल शरद कालका मेघझैं सेतो वर्णभयेका घरहरू चित्र-विचित्र स्फटिका सिंढीहरूले शोभायमान भयेका छन्॥ १९-२०॥ झ्यालमा मोतीहरूका झल्ला, ध्वजा पताकाहरू, अनेक घण्टा घुँगरूले शोभित भैरहेको, सुनका तोरणले शोभित भयेको छ॥ २१॥ नाना तरहका आश्चर्यले युक्त भयेको, सयौं सुनका ढोकाहरूले भरियेको, नाना किसिमका काँडा न भयेका रुख लहराहरूले शोभायमान भयेको छ॥ २२॥ यस्तो प्रकारको शोभाले युक्त

एवमादिभिरन्यैश्च भूषणैर्भूषितं सदा। आत्मयोगप्रभावैश्च निर्मितं विश्वकर्मणा॥ २३॥
तस्मिन्नस्ति सभा दिव्या शतयोजनमायता। अर्कप्रकाशा भ्राजिष्णुः सर्वतः कामरूपिणी॥ २४॥
नातिशीता न चात्युष्णा मनसोऽत्यन्तहर्षिणी। न शोको न जरा तस्यां क्षुत्पिपासे न चाप्रियम्॥ २५॥
सर्वे कामाः स्थिता यस्य ये दिव्या ये च मानुषाः। रसवच्च प्रभूतं च भक्ष्यं भोज्यं च सर्वशः॥ २६॥
रसवन्ति च तोयानि शीतान्युष्णानि चैव हि। पुण्याः शब्दादयस्तस्यां नित्यकामफलद्रुमाः॥ २७॥

भयेको र यस्तै अरू किसिमका सुन्दर सिंगारी वस्तुहरूले सदा सर्वदा शोभायमान भयेको छ, यो शहर विश्वकर्माले आफ्ना योगका प्रभावले बनायेका हुन्॥ २३॥ यस्ता प्रकारले बनेको त्यहाँ चारसय कोसको दिव्य सभा छ, त्यो सभामा सूर्य जस्तो प्रकाश भयेको झकाझक सबैतिर कामरूपी (जस्तो मनले चितायो उस्तै हुनेलाई भन्दछन्) छन्॥ २४॥ त्यहाँ कस्तो छ भने जाडो पनि गर्मी पनि छैन, मनलाई हर्षलाग्ने, शोक पनि छैन, बुढाई पनि छैन, त्यस सभामा भोक प्यास मन न पर्ने पनि छैन॥ २५॥ देवताहरूले भोग गर्ने पदार्थहरू सबै रसीला स्वादीला भोजन गर्ने, जस्तो चिन्तन गेरर खायो उस्तै हुने, धेरै पन॥ २६॥ मधुर रसले युक्तभयेको जल चिसो र तातो पनि जस्लाई जस्तो चाहिने उस्तै छ, मनलाई आनन्द दिने शब्दहरूले सबै जस्तो चितायो उस्तै फल फूल दिने रुखहरूले युक्तछन्॥ २७॥

असंबाधा च सा तार्क्ष्य रम्या कामागमा सभा। दीर्घकालं तपस्तप्त्वा निर्मिता विश्वकर्मणा॥ २८॥
तामुग्रतपसो यान्ति सुव्रताः सत्यवादिनः। शान्ताः संन्यासिनः सिद्धाः पूताः पूतेन कर्मणा॥ २९॥
सर्वे भास्वरदेहास्तेऽलंकृता विरजोऽम्बराः। स्वकृतैः कर्मभिः पुण्यैस्तत्र तिष्ठन्ति भूषिताः॥ ३०॥
तस्यां स धर्मो भगवानासनेऽनुपमे शुभे। दशयोजनविस्तीर्णे सर्वरत्नैः सुमण्डिते॥ ३१॥
उपविष्ट सतां श्रेष्ठश्छत्रशोभितमस्तकः। कुण्डलालंकृतः श्रीमान् महामुकुटमण्डितः॥ ३२॥
सर्वालङ्कारसंयुक्तो नीलमेघसमप्रभः। बालव्यजनहस्ताभिरप्सरोभिश्च बीजितः॥ ३३॥

हे गरुडजी! त्यो-सभामा कती भने जता जान मन लाग्यो उतै जान पाईने, कसैले कसैलाई बाधा न गर्ने, यस्तो राम्रो यो सभालाई बनाउनका निमित्त विश्वकर्माले धेरै वर्ष सम्म तपस्या गरी बनाएको हो॥ २८॥ त्यो सभामा उग्र तपस्या गर्ने, सुन्दर व्रत गर्ने, साँचो बोल्ने, शान्त स्वभाव, सन्यासी, सिद्ध, पवित्र कर्म द्वारा पवित्र भएका मानिसहरू जान्छन्॥ २९॥ सबैको शरीर तेजले परिपूर्ण र अलंकृत छ। उनिहरूको वस्त्र निर्मल छन्। मनुष्य आफुले गरेको पुण्यकर्मद्वारा अलंकृत भएर रहन्छन्॥ ३०॥ त्यो सभामा अनुपमेय भगवान् धर्म दश योजन सम्म फैलिएको सबै थरीका रत्नहरू जडित सुन्दर आसनमा॥ ३१॥ बसेका, सज्जनहरूमा श्रेष्ठ ढंगले शोभायमान मस्तक (निधार) भएका, उनका कानमा कुण्डल भूषित छन्॥ ३२॥ सर्व गहनाहरूले सिंगारीएका, नीलो मेघको जस्तो कान्ति भएका अप्सराहरू

गन्धर्वाणां समूहाश्च संघशश्चाप्सरोगणाः। गीतवादित्रनृत्याद्यैः परितः सेवयन्ति तम्॥ ३४॥
ग० मृत्युना पाशहस्तेन कालेन च बलीयसा। चित्रगुप्तेन चित्रेण कृतान्तेन निषेवितः॥ ३५॥ च०
पु० पाशदण्डधरैरुग्रैर्निदेशवशवर्तिभिः। आत्मतुल्यबलैर्नानासुभटैः परिवारितः॥ ३६॥ अ०
अग्निष्वात्ताश्च पितरः सोमपाश्चोष्मपाश्च ये। स्वधावन्तो बर्हिषदो मूर्तामूर्ताश्च ये खग॥ ३७॥
अर्यमाद्याः पितृगणा मूर्तिमन्तस्तथापरे। सर्वे ते मुनिभिः सार्धं धर्मराजमुपासते॥ ३८॥
अत्रिर्वसिष्ठः पुलहो दक्षः क्रतुरथाङ्गिराः। जामदग्न्योभृगुश्चैव पुलस्त्यागस्त्यनारदाः॥ ३९॥

हातमा चमर लिई डोलाउँछन्॥ ३३॥ गंधर्वहरूका समूह र अप्सराहरूका गणहरूले नाच गान गरी चारै तिरबाट सेवा गरी रहेका॥ ३४॥ फेरि हातमा पाश लिएका मृत्युले र बड़ा बलवान् भयेका कालले अरु चित्रगुप्त चित्रले कृतान्तले सेवा गरी रहेका छन्॥ ३५॥ पाश दण्ड धारण गरेका उग्र रूप भयेका आफु समान बलवान् भयेका आज्ञा पालनगर्नमा तत्पर भयेका यस्ता दूतहरुले घेरी रहेका॥ ३६॥ अग्निष्वात्ता पितृहरू र सोमपा नाम भयेका पितृहरू उष्मपा वर्हिषद नाम भयेका स्वधावान् पितृहरू मूर्तिवान् (देह भयेका) अमूर्तिवान् (स्वरूप न भयेका) जतिछन् सबै त्यहाँ छन्॥ ३७॥ अर्यमा आदि गरियेका पितृगणहरू मूर्तिले युक्त भयेका त्यस्तै अरू पनि सम्पूर्ण १८०
मुनिहरूले धर्मराजलाई सेवा गर्दछन्॥ ३८॥ धर्मराजका सभासदको ऋषि को छन् भने अत्रि, वशिष्ठ, पुलह, दक्ष, क्रतु, अङ्गिरा

एते चान्ये च बहवः पितृराजसभासदः। न शक्याः परिसंख्यातुं नामभिः कर्मभिस्तथा॥ ४०॥
ग० व्याख्याभिर्धर्मशास्त्राणां निर्णेतारो यथातथम्। सेवन्ते धर्मराजं ते शासनात्परमेष्ठिनः॥ ४१॥ च०
पु० राजानः सूर्यवंशीयाः सोमवंश्यास्तथापरे। सभायां धर्मराजं ते धर्मज्ञाः पर्युपासते॥ ४२॥ अ०
मनुर्दिलीपो मान्धाता सगरश्च भगीरथः। अम्बरीषोऽनरण्यश्च मुचुकुन्दो निमिः पृथुः॥ ४३॥
ययातिर्नहुषः पुरुर्दुष्यन्तश्च शिविर्नलः। भरतः शान्तनुः पाण्डुः सहस्त्रार्जुन एव च॥ ४४॥
एते राजर्षयः पुण्याः कीर्तिमन्तो बहुश्रुताः। इष्ट्वाऽश्वमेधैर्बहुभिर्जाता धर्मसभासदः॥ ४५॥

जमदग्नि, भृगु, पुलस्त्य, नारद इत्यादि॥ ३९॥ इनिहरू र अरुहरू धेरै नै पितृराजका सभासद्हरू छन्। तिनीहरू यति छन् भनी नामले र कर्मले गन्नै सकिन्न॥ ४०॥ धर्मशास्त्रका निर्णयका व्याख्यानले ब्रह्माजीका आज्ञानुसार धर्मराजकन सेवा गर्दछन्॥ ४१॥ सूर्यवंशी राजाहरू र चन्द्रवंशी राजाहरू त्यस्तै अरु वंशका राजाहरू पनि धर्म जान्ने भयेका ब्रह्माका आज्ञानुसार त्यो सभामा धर्मराजलाई सेवा गरेका छन्॥ ४२॥ को को ती राजाहरू हुन् भने मनु, दिलीप, मान्धाता, सगर, भगीरथ, अम्बरीष, अनरण्य, मुचुकुन्द, निमि, पृथु, ययाति, नहुष, पुरु,
१६ दुष्यन्त, शिवि, नल, भरत, शान्तनु, पाण्डु, र सहस्त्रार्जुनहरू छन्॥ ४३-४४॥ इनी राजऋषिहरूले धेरै अश्वमेध यज्ञ गरेर पुण्यात्मा, १८१
कीर्तिमान्, धर्म जान्ने भयेका हुनाले धर्मराजको सभासद हुन गये॥ ४५॥ धर्मराजका सभामा धर्ममात्र हुन्छ। त्यहाँ कसैको कसै सँग रिस

सभायां धर्मराजस्य धर्म एव प्रवर्तते। न तत्र पक्षपातोऽस्ति नानृतं न च मत्सरः॥ ४६॥ च०
सभ्याः सर्वे शास्त्रविदः सर्वे धर्मपरायणाः। तस्यां सभायां सततं वैवस्वतमुपासते॥ ४७॥ अ०
पु० ईदृशी सा सभा तार्क्ष्य धर्मराजमहात्मनः। न तां पश्यन्ति ये पापा दक्षिणेन पथा गताः॥ ४८॥
धर्मराजपुरे गन्तुं चतुर्मार्गा भवन्ति च। पापिनां गमने पूर्वं स तु ते परिकीर्तितः॥ ४९॥
पूर्वादिभिस्त्रिभिर्मार्गैर्ये गता धर्ममन्दिरे। ते हि सुकृतिनः पुण्यैस्तस्यां गच्छन्ति तान् शृणु॥ ५०॥
पूर्वमार्गस्तु तत्रैकः सर्वभोगसमन्वितः। पारिजाततरुच्छायाच्छादितो रत्नमण्डितः॥ ५१॥

पनि छैन, प्रेम पनि छैन, झुटो कुरा पनि कसैको कसैले गर्दैनन्॥ ४६॥ त्यहाँका सबै सभासद कस्ता छन् भने संपूर्ण शास्त्रका वेत्ता, धर्ममा तत्पर भयेका, निरन्तर धर्मराजलाई उपासना गरी रहेका छन्॥ ४७॥ धर्मराजको यस्तो प्रकारको सभा छ। हे गरुडजी! जो पापी दक्षिणतिरका बाटाबाट जान्छन् तिनीहरूले यसलाई देख्न पाउँदैनन्॥ ४८॥ धर्मराज (यमराजका) शहरमा जाँदा चार बाटा छन्। पापीहरूको जाने बाटो पहिलै तिमीलाई सबै भनी सकें॥ ४९॥ अब पूर्व आदि तिनवटा बाटाबाट धर्मराजका मन्दिरमा जानेहरू आफुले गरेका असल पुण्यको प्रभावले सभामा जान्छन्, हे गरुड ! सुन॥ ५०॥ त्यहाँ जाने तिन बाटा मध्ये एउटा पूर्वतिरको बाटो सम्पूर्ण भोग गर्ने वस्तुहरूले युक्त भयेको, रत्नहरूले भरिभराउ भयेको, पारिजातका छायाको छाहारी गरिएको छ॥ ५१॥ फेरि विमानहरूले

विमानगणसङ्कीर्णो हंसावलिविराजितः। विद्रुमाराम संकीर्णपीयूषद्रवसंयुतः॥ ५२॥ च०
ग० तेन ब्रह्मर्षयो यान्ति पुण्या राजर्षयोऽमलाः। अप्सरोगणगन्धर्वविद्याधरमहोरगाः॥ ५३॥ अ०
पु० देवताराधकाश्चान्ये शिवभक्तिपरायणाः। ग्रीष्मे प्रपादानरता माघे काष्ठप्रदायिनः॥ ५४॥
विश्रामयन्ति वर्षासु विरक्तान् दानमानतः। दुःखितस्यामृतं ब्रूते ह्याश्रयं तु ददन्ति ये॥ ५५॥
सत्यधर्मेरता ये च क्रोधलोभविवर्जिताः। पितृमातृषु ये भक्ता गुरुशुश्रूषणे रताः॥ ५६॥
भूमिदा गृहदा गोदा विद्यादानप्रदायकाः। पुराणवक्तृश्रोतारः पारायणपरायणाः॥ ५७॥

र हाँसका लस्करहरूले युक्त भयेको, मुँगाको बगैंचाले युक्त भयेको अमृतको, जलपूर्ण भयेको छ॥ ५२॥ त्यस बाटाले ब्रह्मऋषिहरू र पुण्यात्मा राजऋषि, निर्मल कीर्ति भयेका अप्सराहरू, विद्याधरहरू, ठूला सर्पहरूका गणहरू जान्छन्॥ ५३॥ देवताहरूको आराधना गर्ने, शिवजीको भक्ति गर्ने, ऋतुमा गृष्म (गर्मी) जलदान गर्ने, माघ (जाडा) मा दाउरा दिनेहरू जान्छन्॥ ५४॥ वर्षा ऋतुमा विरक्त भयेकालाई आदर सत्कारले बास गराउँदछन्, दुःखिहरूलाई मीठो बोल्ने आश्रय पनि दिने जति छन्॥ ५५॥ फेरि सत्य नै धर्मभयेका क्रोध लोभ न भयेका, पिता माताको सेवा गर्ने, गुरुहरूको सुसार गर्नमा लागेका जति छन्॥ ५६॥ भूमि दान, गृहदान, विद्यादान दिनेहरू, पुराणका वक्ता श्रोता, विधि बमोजिमको वेदपारायण (पाठ) गर्नेहरू सबै यस बाटाबाट जान्छन्॥ ५७॥ यी पुण्यात्माहरू र अरू पवित्र कीर्ति भयेकाले,

एते सुकृतिनश्चान्ये पूर्वद्वारे विशन्ति च। यान्ति धर्मसभायां ते सुशीलाः शुद्धबुद्धयः॥ ५८॥
द्वितीयस्तूत्तरो मार्गो महारथशतैर्वृत। नरयानसमायुक्तो हरिचन्दनमण्डितः॥ ५९॥
हंससारससंकीर्णश्चक्रवाकोपशोभितः। अमृतद्रवसंपूर्णस्तत्र भाति सरोवरः॥ ६०॥
अनेन वैदिका यान्ति तथाऽभ्यागतपूजकाः। दुर्गाभान्वोश्च ये भक्तास्तीर्थस्नाताश्च पर्वसु॥ ६१॥
ये मृता धर्मसंग्रामेऽनशनेन मृताश्च ये। वाराणस्यां गोगृहे च तीर्थतोये मृता विधेः॥ ६२॥
ब्राह्मणार्थे स्वामिकार्ये तीर्थक्षेत्रेषु ये मृताः। ये मृता देवविध्वंसे योगाभ्यासेन ये मृताः॥ ६३॥

सुशील (असल स्वभाव) शुद्ध बुद्धि भयेका (छल कपट न भयेका) पूर्व तिरका ढोकाबाट धर्मराजको सभामा प्रवेश गर्दछन्॥ ५८॥ अब दोस्रो उत्तर तिरको बाटमा कस्तो छ भने सयौं महारथिहरूले भरी भयेको तामदान मेहना श्री खण्डचन्दनहरूले सुशोभित छ॥ ५९॥ त्यस ठाउमा हाँस, सारस, चखेवाहरूले शोभायमान भयेको, अमृतरूपी जलले भरियेको पोखरी सुशोभित छ॥ ६०॥ यस्ता बाटाले वैदिकहरू (वेद पढ्ने, पढाउने), अभ्यागत (अतिथी) हरुको पूजा गर्नेहरू, सूर्यको, दुर्गा भगवतीहरूको पूजा गर्ने, पर्वहरूमा स्नान गर्नेहरू॥ ६१॥ धर्मयुद्धमा मरेका, अनशन (कहिले पनि न खाई) गर्नाले मरेका, काशीमा मरेका, तीर्थहरूका जलयोगमा मरेकाहरू॥ ६२॥ ब्राह्मणका निमित्तमा, स्वामी (चाकरी गरेको मालिक) का निमित्तमा, तीर्थक्षेत्रहरूमा मरेकाहरू देवताको देवालयहरूको

सत्पात्रपूजका नित्यं महादानरताश्च ये। प्रविशन्त्युत्तरे द्वारे यान्ति धर्मसभां च ते॥ ६४॥
तृतीयः पश्चिमो मार्गो रत्नमन्दिरमंडितः। सुधारससदापूर्णदीर्घिकाभिर्विराजितः॥ ६५॥
ऐरावतकुलोद्भूतमत्तमातङ्गसंकुलः। उच्चैःश्रवसमुत्पन्नहयरत्नसमन्वितः॥ ६६॥
एतेनात्मपरा यान्ति सच्छास्त्रपरिचिन्तकाः। अनन्यविष्णुभक्ताश्च गायत्रीमन्त्रजापकाः॥ ६७॥
परहिंसापरद्रव्यपरवादपराङ्मुखाः। स्वदारनिरताःसन्तः साग्निका वेदपाठकाः॥ ६८॥

नाश हुन लागेकोमा, योगाभ्यासले जो मरेका छन्॥ ६३॥ सज्जनको सेवा गर्ने, नित्य महादानहरू गर्ने जति छन् ती सबै उत्तर तिरका ढोकाका बाटाले धर्मराजका सभामा जान्छन्॥ ६४॥ तेस्रो पश्चिम तिरको बाटोमा रत्नहरूका मंदिरले शोभायमान भयेको, सुधानाम भयेको अमृत रस भयेको साना साना पोखरीहरूले विराजमान भयेको छ॥ ६५॥ ऐरावतका कुलमा उत्पन्न भयेका मत्तहात्तिहरूले युक्त भयेको, उच्चैःश्रवाका वंशमा जन्मेका असल घोडाहरूले युक्त भयेको छ॥ ६६॥ यताबाट आत्मपर भयेका (वेदान्ती), असल शास्त्रको चिन्तन गर्नेहरू, विष्णु बाहेक अरू कसैको चिन्तन (भक्ति) न गर्नेहरू, गायत्री जपने (पुरश्चरण) गर्नेहरू, सबै यही बाटाबाट जान्छन्॥ ६७॥ अरू फेरि कस्ता कस्ता जान्छन् भने अर्कालाई हिंसा न गर्ने, अर्काको धन, अर्काको अपवाद (अपयश, अपगाल) देखि पर रहेका, आफ्नी विवाहिता पत्निमा मात्र भोग विलास गर्ने, सज्जनहरूको सेवा र अग्निहोत्र गर्ने, वेद पाठीहरू जान्छन्॥ ६८॥

ब्रह्मचर्यव्रतधरा वानप्रस्थास्तपस्विनः। श्रीपादसंन्यासपराः समलोष्टाश्मकाञ्चनाः॥ ६९॥
ज्ञानवैराग्यसम्पन्नाः सर्वभूतहिते रताः। शिवविष्णुव्रतकराः कर्मब्रह्मसमर्पकाः॥ ७०॥
ऋणैस्त्रिभिर्विनिर्मुक्ताः पञ्चयज्ञरताः सदा। पितॄणां श्राद्धदातारः काले सध्यन्मुपासकाः॥ ७१॥
नीचसङ्गविनिर्मुक्ताः सत्सङ्गतिपरायणाः। एतेऽप्सरोगणैर्युक्ता विमानवरसंस्थिताः॥ ७२॥
सुधापानं प्रकुर्वन्तो यान्ति ते धर्ममंदिरम्। विशन्ति पश्चिमद्वारे यान्ति धर्मसभान्तरे॥ ७३॥
यमस्तानागतान्दृष्ट्वा स्वागतं वदते मुहुः। समुत्थानं च कुरुते तेषां गच्छति सम्मुखम्॥ ७४॥

ब्रह्मचारी भयेर बस्ने, वानप्रस्थ (छोरा बुहारीलाई धन सुम्पी आफु दुइ जना जंगलमा व्रत गर्ने) हरु, तपस्विहरू, श्रीपादसंन्यासीहरू, सुन, चाँदी, ढुङ्गा माटो सबै समान देख्नेहरू॥ ६९॥ ज्ञान वैराग्य युक्त भयेका सम्पूर्ण, प्राणिमात्रको हित चिताउने, शिवको विष्णुको भक्ति गर्ने, जुनसुकै काममा पनि तत्सत् ब्रह्मार्पणमस्तु भन्नेहरू जो छन्॥ ७०॥ तीन ऋणले मुक्त भयेका (देव, मनुष्य, पितृ), पंचयज्ञ सदा सर्वदा गर्ने, पितृहरूको श्राद्धगर्ने, शास्त्रले भनेका बेलामा संध्याको उपासना गर्नेहरू यताबाट जान्छन्॥ ७१॥ दुर्जनहरूको सँगै न गर्ने यस्ता अप्सरागणले सेवा गरियेका, श्रेष्ठ विमानमा बसेका छँदा जान्छन्॥ ७२॥ सुधा (अमृत) पान गर्दै धर्मराजका मन्दिरमा पश्चिम ढोकाबाट सभामा प्रवेश गर्दछन्॥ ७३॥ यमराज तिनीहरूलाई आउनलागेको देखेर आउनुहवस् बारंबार भन्दछन्, संमुखमा गै सिंहासनबाट उठेर सत्कार पनि गर्दछन्॥ ७४॥ त्यस बेलामा चार बाहुमा शंख, चक्र,

तदा चतुर्भुजो भूत्वा शंखचक्रगदासिभृत्। पुण्यकर्मरतानां च स्नेहान्मित्रवदाचरेत्॥ ७५॥
सिंहासनं च ददते नमस्कारं करोति च। पादार्घं कुरुते पश्चात्पूजते चन्दनादिभिः॥ ७६॥
नमस्कुर्वन्तु भोः सभ्या ज्ञानिनं परमादरात्। एष मे मण्डलं भित्वा ब्रह्मलोकं प्रयास्यति॥ ७७॥
भो भो बुद्धिमतां श्रेष्ठा नरकक्लेशभीरवः। भवद्धिः साधितं पुण्यैर्देवत्वं सुखदायकम्॥ ७८॥
मानुषं दुर्लभं प्राप्य नित्यं यस्तु न साधयेत्। स याति नरकं घोरं कोऽन्यस्तस्मादचेतनः॥ ७९॥
अस्थिरेण शरीरेण योऽस्थिरैश्च धनादिभिः। संचिनोति स्थिरं धर्मं स एको बुद्धिमान्नरः॥ ८०॥

गदा, तरवार धारण गरेर पुण्य कर्म गर्नेहरूलाई प्रेमले मित्र समान आदर गर्दछन्॥ ७५॥ तिनलाई सिंहासन पनि दिन्छन्, नमस्कार पनि गर्दछन्, पादार्घ (पाउधुनु) गर्दछन्, चन्दनहरूले पूजा पनि गर्दछन्॥ ७६॥ सभासदहरू सँग यीनि ज्ञानिलाई आदर पूर्वकको नमस्कार गर्नुहोस्, यीनि मेरो मंडल भेदन गरेर ब्रह्मलोकमा जान्छन्॥ ७७॥ हे बुद्धिमान् हरुमा श्रेष्ठ भयेका! नरकको दुःखदेखि डराउने तपाईहरुले सुखदायक भयेको देवता स्वरुप रुपी पुण्य सिद्ध गर्नु भो॥ ७८॥ संसारमा मनुष्य चैतन्य योनि दुर्लभ छ, यस्तो पाई कन जो यस्तो कुरा साद्धैन त्यही नरकमा जान्छ, अर्को को जान्छ, कोही पनि जाँदैन॥ ७९॥ यो शरीर कस्तो छ भने स्थिर छैन, धनहरू पनि स्थिर छैनन्। यस्तो हुनाले स्थिर भयेको धर्मलाई बटुलोस्, त्यही एक बुद्धिमान् नर हो॥ ८०॥ त्यसकारणले कुनै तरहले धर्मको संचय गरोस्। सबै भोगले युक्त भयेको पुण्यात्माका स्थानमा जानुहोस्

तस्मात्सर्वप्रयत्नेन कर्तव्यो धर्मसंचयः। गच्छध्वं पुण्यवत्स्थानं सर्वभोगसमन्वितम्॥ ८१॥
इति धर्मवचः श्रुत्वा तं प्रणम्य सभां च ताम्। अमरैः पूज्यमानास्ते स्तूयमाना मुनीश्वरैः॥ ८२॥
विमानगणसंकीर्णाः प्रयान्ति परमं पदम्। केचिद्धर्मसभायां हि तिष्ठन्ति परमादरात्॥ ८३॥
उषित्वा तत्र कल्पान्तं भुक्त्वा भोगानमानुषान्। प्राप्नोति पुण्यशेषेण मानुष्यं पुण्यदर्शनम्॥ ८४॥
महाधनी च सर्वज्ञः सर्वशास्त्रविशारदः। पुनः स्वात्मविचारेण ततो याति परां गतिम्॥ ८५॥
एतत्ते कथितं सर्वं त्वया पृष्टं यमालयम्। इदं शृण्वन्नरो भक्त्या धर्मराजसभां व्रजेत्॥ ८६॥

॥ इति श्रीगरुडपुराणे सारोद्धारे धर्मराजनगरनिरूपणं नाम चतुर्दशोऽध्यायः॥ १४॥

(भन्दछन्)॥ ८१॥ यस्ता प्रकारको धर्मराजको वचन सुनी ती सभा र धर्मराजलाई ढोगिदियेर, मुनीश्वरहरूले स्तुति गरियेका देवताहरूले पनि पूज्यमान भयेका छँदा॥ ८२॥ विमानहरूले संकीर्ण भयेका परंपद कन जान्छन्, कोही त धर्मराजका सभामा आदर पायेका छँदा बस्तछन्॥ ८३॥ त्यहाँ बसी दैवी भोगको एक कल्प सम्म भोग गरेर पुण्यको शेष रहन गयेकाले पुण्यलाई देखाउने (भयेको) मनुष्य जन्म पाउँछन्॥ ८४॥ महादानी सम्पूर्ण जान्ने सबै शास्त्रहरूको ज्ञाता हुन्छन्। फेरि आत्मविचारले परंपदमा जान्छन्॥ ८५॥ तिमी[illegible] सोधेको यमराजको मन्दिर सबै यस्तो प्रकारको छ भनि भनें। जसले यसलाई भक्ति पूर्वक सुन्दछ त्यो पनि धर्मराजको सभामा जान्छ॥ ८६॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां चतुर्दशोऽध्यायः॥ १४॥

✻ अथ पञ्चदशोऽध्यायः ✻

गरुड उवाच —

धर्मात्मा स्वर्गतिं भुक्त्वा जायते विमले कुले। अतस्तस्य समुत्पत्तिं जननीजठरे वद॥ १॥
यथा विचारं कुरुते देहेऽस्मिन्सुकृती जनः। तथाऽहं श्रोतुमिच्छामि वद मे करुणानिधे॥ २॥

श्रीभगवानुवाच —

साधु पृष्टं त्वया तार्क्ष्य परं गोप्यं वदामि ते। तस्य विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते॥ ३॥
वक्ष्यामि च शरीरस्य स्वरूपं पारमार्थिकम्। ब्रह्माण्डगुणसंपन्नं योगिनां धारणास्पदम्॥ ४॥

गरुड भन्दछन्— धर्मात्मा जन स्वर्गलाई भोगेर निर्मल कुलमा जन्मलिन्छन् भने अब आमाका पेटमा कसरी उत्पन्न हुन्छन् भन्ने कुरा आज्ञाहोस्॥ १॥ पुण्यात्मा जन यस गर्भमा रहेको देहमा जे विचार गर्छ त्यही कुरा सुन्नको इच्छा गर्दछु। हे करुणानिधान! मलाई भनि बक्सियोस्॥ २॥ **श्रीविष्णु भगवान् आज्ञा गर्नु हुन्छ —** हे गरुडजी! असल कुरा सोधेउ। जो परम गोप्यछ, जुन कुरा जान्नाले सर्वज्ञ हुन्छ, त्यो तिमीलाई म भन्दछु॥ ३॥ पारमार्थिक शरीरको स्वरूप भन्दछु, त्यो कस्तो छ भने ब्रह्माण्डको गुणले युक्त भयेको, योगिहरूको

ग० पु०

षट्चक्रचिन्तनं यस्मिन्यथा कुर्वन्ति योगिनः। ब्रह्मरन्ध्रे चिदानन्दरूपध्यानं तथा शृणु ॥ ५ ॥
शुचीनां श्रीमतां गेहे जायते सुकृती यथा। तथा विधानं नियमं तत्पित्रोः कथयामि ते ॥ ६ ॥
ऋतुकाले तु नारीणां त्यजेद्दिनचतुष्टयम्। तावन्नालोकयेद्वक्त्रं पापं वपुषि संभवेत् ॥ ७ ॥
स्नात्वा सचैलं सा नारी चतुर्थेऽहनि शुध्यति। सप्ताहात्पितृदेवानां भवेद्योग्या व्रतार्चने ॥ ८ ॥
सप्ताहमध्ये यो गर्भः स भवेन्मलिनाशयः। प्रायशः सम्भवन्त्यत्र पुत्रास्त्वष्टाहमध्यतः ॥ ९ ॥

धारण गर्ने स्थान भयेको छ ॥ ४ ॥ जुन शरीरमा योगिहरू जसरी षट्चक्रको चिन्तन गर्छन्, ब्रह्मरन्ध्रमा (शिरमा रहेको सहस्त्रदल कमललाई भन्दछन्) चिन्दानन्द स्वरूप भयेको परमेश्वरको त्यो वर्णन सुन ॥ ५ ॥ पुण्यात्मा पवित्र श्रीमान्का घरमा जसरी जन्मन्छन् तिनका पिताको विधान नियम तिमीलाई भन्दछु ॥ ६ ॥ ऋतुकालमा रजस्वला भयेको चार दिन स्त्रीको छाडी, किनभने तिनीहरूका शरीरमा त्यसबखत् पाप बसेको हुन्छ, त्यहाँ सम्म (चार दिन) मुख न हेरोस् ॥ ७ ॥ चारौं दिनका दिन चाँही सबै वस्त्र हरूका साथैमा स्नान गरेर अनि स्त्रीहरू शुद्ध हुन्छन्। पितृहरू देवताहरूको व्रत पूजा गर्नलाई सातदिनमा मात्र योग्य हुन्छन् ॥ ८ ॥ सातदिनका बीचमा जो गर्भ धारण हुन्छ त्यो मलिन (दुष्ट) आशय (चित्त) भयेको हुन्छ। विशेष धेरै गरी आठदिनको मध्यमा पुत्र हुन्छन् ॥ ९ ॥ जोर रात्रिमा (६/८, १०/१२, १४/१६) गर्भ रहेको छ भने पुत्र हुन्छन्, बिजोर रात्रिहरूमा छोरी हुन्छन्, त्यस्कारणले पैलेका सात दिन छाडी जोर

प० अ०

ग० पु०

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु। पूर्वसप्तकमुत्सृज्य तस्माद्युग्मासु संविशेत् ॥ १० ॥
षोडशर्तुनिशाः स्त्रीणां सामान्याः समुदाहृताः। या वै चतुर्दशी रात्रिर्गर्भस्तिष्ठति तत्र वै ॥ ११ ॥
गुणभाग्यनिधिः पुत्रस्तदा जायेत धार्मिकः। सा निशा प्राकृतैर्जीवैर्न लभ्येत कदाचन ॥ १२ ॥
पञ्चमेऽहनि नारीणां कार्यं मधुरभोजनम्। कटुक्षारं च तीक्ष्णं च त्याज्यमुष्णं च दूरतः ॥ १३ ॥
तत्क्षेत्रमौषधीपात्रं बीजं चाप्यमृतायनम्। तस्मिन्नुप्त्वा नरःस्वामी सम्यक्फलमवाप्नुयात् ॥ १४ ॥
ताम्बूलपुष्पश्रीखण्डैः संयुक्तः शुचिवस्त्रभृत्। धर्ममादाय मनसि सुतल्पं संविशेत्पुमान् ॥ १५ ॥

रात्रिमा स्त्री संभोग गरोस् ॥ १० ॥ अब स्त्रीहरूको सामान्य ऋतुकाल सोहरात्रिको भनेका छन्, तो सोहरात्रिहरूमा चौदह चाँही रात्रिमा गर्भ रहतो भने गुणको र भाग्यको खानी भएको धर्मात्मा छोरो जन्मन्छ। त्यो रात्रि साधारण मनुष्यहरूले कैले पनि पाउन कठिन छ ॥ ११-१२ ॥ (उत्तम गुणवान् पुत्र जन्माउन) चारदिनमा न्वाहो सके पछी पाँचैदिनमा (रजस्वला भयेका) मधुर पदार्थहरू खानु। अमिलो, तातो, पिरो, नुनिलो छाडी दिनु ॥ १३ ॥ यति गरेपछी त्यो क्षेत्र (खेत) औषधी कामको स्थल भयेको बीज (ब्यू) पनि अमृत तुल्य हुन्छ। त्यस क्षेत्रमा उपजायेको स्वामी (मालिक) ले असल फल पाउँछ ॥ १४ ॥ अब संभोग अवस्थामा शुद्ध वस्त्र पहिरेर श्रीखण्ड चन्दन सुगन्धि फूलको माला लगायेर, पानखाई असल मनोहर पलंगमा वसी मनमा धर्मस्वरूपी भगवानलाई चितायेर पुरुषले गर्भाधान गरोस् ॥ १५ ॥

प० अ०

निषेकसमये याद्दङ्नरचित्तविकल्पना। ताद्दक्स्वभावसम्भूतिर्जन्तुर्विशतिकुक्षिगः ॥ १६ ॥
चैतन्यं बीजभूतं हि नित्यं शुक्रेऽप्यवस्थितम्। कामश्चित्तं च शुक्रं च यदा ह्येकत्वमाप्नुयात्॥ १७ ॥
तदा द्रावमवाप्नोति योषिद्गर्भाशये नरः। शुक्रशोणितसंयोगात्पिण्डोत्पत्तिः प्रजायते॥ १८ ॥
परमानन्ददः पुत्रो भवेद्गर्भगतः कृती। भवन्ति तस्य निखिलाः क्रियाः पुंसवनादिकाः॥ १९ ॥
जन्म प्राप्नोति पुण्यात्मा ग्रहेषूच्चगतेषु च। तज्जन्मसमये विप्राः प्राप्नुवन्ति धनं बहु॥ २० ॥
विद्याविनयसंपन्नो वर्धते पितृवेश्मनि। सतां संगेन स भवेत्सर्वागमविशारदः॥ २१ ॥

गर्भाधानका बेलामा (स्त्री पुरुषले) जस्तो चिन्तन गर्छन् उस्तै स्वभाव भयेको जीव (प्राणी) गर्भमा बासगर्छ। (त्यसैले गर्भाधान विधिले भयेको छ भने उत्तम लक्षण भयेको बालक हुन्छ) ॥ १६ ॥ यस्मा चैतन्य स्वरूप भयेको बीज नित्य (सधैं) शुक्रमा रहेको छ। काम र चित्त शुक्र स्वरूप एक हुन्छन्॥ १७ ॥ त्यसै बेलामा द्रवरूप भयेको (पातलो) स्त्रीका गर्भाशयमा प्राप्त हुन्छ। शुक्र र शोणित (रज, रगत) को संयोग हुनाले अब पिण्डको उत्पत्ति हुन्छ ॥ १८ ॥ अनि परम आनन्द दिने गर्भमा आयेको पुण्यात्मा पुत्र हुन्छन्, त्यस्को पुंसवन (३/४ मैनामा गर्ने विधि) सीमन्तोनयन (छ सात मैनामा हुने कर्म) आदि गरेका सबै कर्म हुन्छन्॥ १९ ॥ यस्ता कर्म भयेका पुण्यात्माको जन्म ग्रह उच्चभयेका हुन्छन्। त्यस बेलामा ब्राह्मण हरूले पनि धेरै धनहरू पाउँदछन्॥ २० ॥ अब त्यो बालक विद्या विनय (नम्रता) ले युक्त

दिव्याङ्गनादिभोक्ता स्यात्तारुण्ये दानवान् धनी। पूर्वं कृततपस्तीर्थमहापुण्यफलोदयात् ॥ २२ ॥
ततश्च यतते नित्यमात्मानात्मविचारणे। अध्यारोपापवादाभ्यां कुरुते ब्रह्मचिन्तनम्॥ २३ ॥
अस्यासङ्गावबोधाय ब्रह्मणोऽन्वयकारिणः। क्षित्याद्यनात्मवर्गस्य गुणांस्ते कथयाम्यहम्॥ २४ ॥
क्षितिर्वारि हविर्भोक्ता वायुराकाश एव च। स्थूलभूता इमे प्रोक्ताः पिण्डोऽयं पाञ्चभौतिकः॥ २५ ॥
त्वगस्थिनाड्या रोमाणि मांसं चैव खगेश्वर। एते पञ्चगुणाः भूमेर्मया ते परिकीर्तिताः॥ २६ ॥
लाला मूत्रं तथा शुक्रं मज्जा रक्तं च पञ्चमम्। अपां पञ्चगुणाः प्रोक्तास्तेजसो विनिशामय॥ २७ ॥

भयेको पिताका घरमा बढ्दछ अनि सज्जनका संगले सम्पूर्ण शास्त्रमा पारंगत हुन जान्छ ॥ २१ ॥ पूर्वजन्ममा गरेका तीर्थ, व्रतपुण्यहरूका उदय हुनाले तरुण अवस्थामा धनी, दानी, सुन्दर, राम्रो स्त्रीहरूको भोग गर्ने ॥ २२ ॥ वहाँ पछी नित्य आत्माको र अनात्मा को विचारमा परिश्रम गर्दछ। अध्यारोप र अपवादका युक्तिले ब्रह्मको चिन्तन गर्दछ ॥ २३ ॥ यस्को असङ्गत्त्व जान्नका लागि ब्रह्मको सम्बन्ध भयेका पृथिवी आदि अनात्मवर्गको गुण भन्छु ॥ २४ ॥ ती कुन हुन् भने पृथ्वी, जल, अग्नि, वायु आकाश स्थूल भयेको यो पाँच भौतिक पिण्ड
१७ हो ॥ २५ ॥ हे खगेश्वर, छाला, हाड़, नाडी, (नसा) रोम, मांसु, यी पाँच पृथ्वीकोगुण तिमीलाई भनें ॥ २६ ॥ रालमा मूत्र (पिशाब) शुक्र,
मज्जा, (मासि) रगत, यी पाँच जलका गुण कहिये, अब तेजका गुणहरू सुन ॥ २७ ॥ भोक, तृषा आलस्य, (अल्छिमान्नु) निद्रा, कान्ति,

क्षुधा तृष्णा तथालऽऽस्यं निद्रा कान्तिस्तथैव च। तेजः पञ्चगुणा तार्क्ष्य प्रोक्तं सर्वत्र योगिभिः॥ २८॥

आकुञ्चनं धावनं च लंघनं च प्रसारणम्। चेष्टितं चेति पञ्चैव गुणा वायोः प्रकीर्तिताः॥ २९॥

घोषश्चिन्ता च शून्यत्वं मोहश्चिन्ता च संशयः। आकाशस्य गुणाःपञ्च ज्ञातव्यास्ते प्रयत्नतः॥ ३०॥

मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयम्। अन्तः करणमुद्दिष्टं पूर्वकर्माधिवासितम्॥ ३१॥

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं ज्ञानेन्द्रियाणि च। वाक्पाणिपादपायुपस्थानि कर्मेन्द्रियाणि च॥ ३२॥

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः। ज्ञानकर्मेन्द्रियाणां च देवताः परिकीर्तिताः॥ ३३॥

(राम्रो ज्योति भयेको) हे गरुडजी, यो पाँच गुण योगीहरूले योग शास्त्रमा भनेका छन्॥ २८॥ खुंच्याउनु, दगुर्नु, नाघ्नु, पसारनु, चेष्टा, (चलाकी) गर्नु यो पाँच गुण वायुका हुन्॥ २९॥ कराउनु (शब्द) चिन्ता गर्नु, शून्यत्व (सबै थोक भैकन शून्य केही न भयेको जस्तोलाई) मोह, (मूर्छा) संशय (शंका गर्नु) आकाशका यी पाँच गुणहरू ती परिश्रम पूर्वक जान्नमा योग्य छन्॥ ३०॥ मन, बुद्धि, अहंकार, चित्त इन्लाई अन्तसंस्करण भन्दछन्, पूर्वजन्ममा गरेका कर्महरूका वासनाले युक्त भयेका हुन्छन्॥ ३१॥ कान, छाला, आंखा, जिभ्रो, नाक, यी पाँच ज्ञानेन्द्रिय हुन्। वचन, हात, गुदा, लिंग, (मनुष्यको चिन्ह) यो पाँच कर्म इन्द्रिय हुन्॥ ३२॥ अब ज्ञान र कर्म इन्द्रियहरूका देवताहरू भन्दछु ती दुई मध्ये ज्ञानेन्द्रियका देवताको हुन् भने दिशा, वायु, सूर्य वरुण, अश्विनिकुमार, अब कर्म इन्द्रियका

इडा च पिङ्गला चैव सुषुम्नाख्या तृतीयका। गान्धारी गजजिह्वा च पूषा चैव यशश्विनी॥ ३४॥

अलम्बुषा कुहूश्चापि शंखिनी दशमी तथा। पिण्डमध्ये स्थिता ह्येताः प्रधाना दशनाडिकाः॥ ३५॥

प्राणोऽपानः समानाख्य उदानो व्यान एव च। नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः॥ ३६॥

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले। उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः॥ ३७॥

उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे॥ ३८॥

न जहाति मृतं वापि सर्वव्यापी धनञ्जयः। कवलैर्भुक्तमन्नं हि पुष्टिदं सर्वदेहिनाम्॥ ३९॥

देवताहरू अग्नि, इन्द्र, उपेन्द्र, मित्र, हुन् भनेका छन्॥ ३३॥ इडा, पिङ्गला, सुषुम्ना, गान्धारी, गजजिह्वा, पूषा, यशस्विनी॥ ३४॥ अलम्बुषा, कुहू, शंखिनी, चाहीं दशौं हुन् यस पिण्ड मध्यमा यो दश नाड़ी प्रधान (मुख) भयेर रहेका छन्॥ ३५॥ अब दश वायुहरू कुन भने प्राण, अपान, समान, उदान, व्यान, नाग, कूर्म, कृकल, देवदत्त, धनञ्जय, यिनी हुन्॥ ३६॥ ती वायुहरू कुनकुन कहाँ बसेका छन् भने हृदयमा प्राण, गुदामा अपान, नाभि मण्डलमा समान, कण्ठमा उदान, सम्पूर्ण शरीरमा व्यान नामको वायु रहेको छ॥ ३७॥ अब उपवायुहरू कहाँ छन् भने डकारमा नाग छ, चिंलनेमा कूर्म छ, भोकमा कृकल छ, विजृम्भण (हाई गर्नु) मा देवदत्त रहेको छ॥ ३८॥ धनंजय नामको वायु सम्पूर्ण शरीरमा व्याप्त भयेको छ, मरेका मनुष्यलाई पनि छाड्दैन। एक-एक ग्रास खायेको अन्न सबै देह

नयते व्यानको वायुः सारांशं सर्वनाडिषु। आहारो भुक्तमात्रो हि वायुनाक्रियते द्विजा ॥ ४० ॥
संप्रविश्य गुदे सम्यक्पृथगन्नं पृथग्जलम्। ऊर्ध्वमग्नेर्जलं कृत्वा कृत्वाऽन्नं च जलोपरि ॥ ४१ ॥
आग्निश्चाद्याः स्वयं प्राणः स्थित्वाऽग्निं धमते शनैः। वायुनाध्मायमानोऽग्निः पृथक्किट्टं पृथग्रसम् ॥ ४२ ॥
कुरुते व्यानको वायुर्विष्वक्संप्रापयेद्रसम्। द्वारैर्द्वादशभिर्भिन्नं किट्टं देहाद्बहिः स्त्रवेत् ॥ ४३ ॥
कर्णाऽक्षिनासिका जिह्वा दन्ता नाभिर्नखागुदम्। गुह्यं शिरावपुर्लोम मलस्थानानि चक्षते ॥ ४४ ॥
एवं सर्वे प्रवर्तन्ते स्वस्वकर्मणि वायवः। उपलभ्यात्मनः सत्तां सूर्यालोकं यथा जनाः ॥ ४५ ॥

धारिहरूको पुष्टगर्ने ॥ ३९ ॥ सबै नसाहरूमा व्यान नाम भयेको वायुले सारभयेको अंगलाई लैजान्छ यसै कारणले खायेको आहारलाई वायुले मात्र दुई भाग गर्दछ ॥ ४० ॥ गुदा (पाकस्थली) मा राम्रो पसेर असल प्रकारले अन्न, जल, बेग्लै गर्दछ। आगाको (पेटमा रहेका जठराग्नि) माथिबाट जल, जलका माथी अन्न गरेर राख्छ ॥ ४१ ॥ अग्निका मनि आफैं बसेर अग्निलाई बिस्तारै बिस्तारै बाल्दछ। वायुले बालियेका अग्नि एक तिर रस, एकातिर किट गर्दछ ॥ ४२ ॥ यसलाई व्यान नामको वायुले सबै शरीर भरी पुऱ्याउँदछ। किटलाई देहको बाह्रवटा बाटामा फ्याँक्छ ॥ ४३ ॥ ती बाटाहरू कुन हुन् भने कान, आँखा, नाक, जिब्रो, दाँत नाभि, नङ्, गुदा, लिंग, नसा, शरीर, रोमकूप,
यीनिहरू मलका स्थान हुन् भनि भनिएका छन् ॥ ४४ ॥ यस्तै प्रकारले आफ्ना काममा वायुहरू लागेका छन्, जस्तै श्रीसूर्य उदायेको देखेर

इदानीं नरदेहस्य शृणु रूपद्वयं खग। व्यावहारिकमेकं च द्वितीयं पारमार्थिकम् ॥ ४६ ॥
तिस्रःकोट्योऽर्धकोटी च रोमाणि व्यावहारिके। सप्तलक्षाणि केशाः स्युर्नखाःप्रोक्तास्तुविंशतिः ॥ ४७ ॥
द्वात्रिंशद्दशनाःप्रोक्ताः सामान्याद्विनतासुत। मांसं पलसहस्रं तु रक्तं पलशतं स्मृतम् ॥ ४८ ॥
पलानि दश मेदस्तु त्वक्पलानि च सप्ततिः। पलद्वादशकं मज्जा महारक्तं पलत्रयम् ॥ ४९ ॥
शुक्रं द्विकुडवं ज्ञेयं कुडवं शोणितं स्मृतम्। षष्ट्युत्तरं च त्रिशतमस्थ्नां देहे प्रकीर्तितम् ॥ ५० ॥
नाड्यः स्थूलाश्च सूक्ष्माश्च कोटिशःपरिकीर्तिताः। पित्तं पलानि पञ्चाशत्तदर्धं श्लेष्मणस्तथा ॥ ५१ ॥

जनहरू आफ्ना आफ्ना काममा लाग्छन् ॥ ४५ ॥ हे पक्षिराज, ऐले नरदेहको दुई स्वरूप सुन, त्यो कुन भने एक व्यावहारिक, अर्को पारमार्थिक ॥ ४६ ॥ तीन कोटि र आधा कोटि (साढे तीन करोड) रोम व्यवहारिक शरीरमा हुन्छन्। ती मध्ये सात लाख केश, बिस बटा नङ्, बत्तिस दन्त, सामान्य भनेका छन्। हे विनतापुत्र, शरीरमा मासु, हजार पल, (एक पलमा चार तोला हुन्छ) रगत एक सय पल भनेको छ ॥ ४७-४८ ॥ बोसो दस पल, छाला सत्तरीपल, मासि, (हाड भित्रको वस्तु) बाह्रपल, महारक्त (शुद्ध रगत) तीन पल छ ॥ ४९ ॥ शुक्र (बीज) दुई माना जान्नु। एक मानो रगत छ तीन सय साठी हाडका टुक्रा शरीरमा छन् ॥ ५० ॥ नसा ठूला साना गरी कडोरौं
छन्। पित्त पच्चीस पल, त्यस्तै कफचाहीं पच्चीस पल छ ॥ ५१ ॥ निरन्तर भै रहने विष्टा र पिशाबको संख्यै छैन। यी गुणहरूले युक्त

सततं जायमानं तु विण्मूत्रं चाप्रमाणतः। एतद्गुणसमायुक्तं शरीरं व्यावहारिकम्॥ ५२॥
भुवनानि च सर्वाणि पर्वतद्वीपसागराः आदित्याद्या ग्रहाःसन्ति शरीरे पारमार्थिके॥ ५३॥
पारमार्थिकदेहे हि षट्चक्राणि भवन्ति च। ब्रह्माण्डे ये गुणावप्रोक्तास्तेऽप्यस्मिन्नेव संस्थिता॥ ५४॥
तानहं ते प्रवक्ष्यामि योगिनां धारणास्पदान्। येषां भावनया जन्तुर्भवेद्वै राजरूपभाक्॥ ५५॥
पादाधस्तात्तलं ज्ञेयं पादोर्ध्वं वितलं तथा। जानुनोः सुतलं विद्धि सक्थिदेशे महातलम्॥ ५६॥
तलातलं सक्थिमूले गुह्यदेशे रसातलम्। पातालं कटिसंस्थं च सप्तलोकाःप्रकीर्तिताः॥ ५७॥

भयेको देहलाई व्यावहारिक भन्दछन्॥ ५२॥ अब पारमार्थिक शरीरमा के के छन् भने भुवन हरू (तीन लोक चौदह भुवन) सबै पर्वतहरू, समुद्रहरू, आदित्य आदि नवग्रहहरू, सबै (देहमा) छन्॥ ५३॥ यही शरीरमा षट् चक्रहरू छन्, ब्रह्माण्ड भरिमा जो गुणहरू भनेका छन् ती सबै शरीरमा रहेका छन्॥ ५४॥ ती षट् चक्रहरू योगीहरूका धारणा गर्ने स्थान भनेको तिमलाई भन्दछु जुनको भावना (ध्यान) गर्नाले मनुष्य विराट स्वरूप भञ्दछ (हुन्छ)॥ ५५॥ कसरी भने पाउको पनि (पैतालामा) तललोक, पाउको माथी वितल, घुँडामा सुतल, तिघ्रामा महातल जान्नु॥ ५६॥ तिघ्राका मूलमा तलातल छ, गुह्यदेश (स्थान) मा रसातल जान्नु। कटिमा पाताल, यी सात लोक भनि॥ ५७॥ अब (माथीका) सप्तलोक कुन भने नाभिमध्यमा भू लोक छ त्यो देखि माथी भुवर लोक छ, हृदयमा स्वर्ग लोक

भूलोकं नाभिमध्ये तु भुवर्लोकं तदूर्ध्वके। स्वर्लोकं हृदये विद्यात् कण्ठदेशे महस्तथा॥ ५८॥
जनलोकं वक्त्रदेशे तपोलोकं ललाटके। सत्यलोकं ब्रह्मरन्ध्रे भुवनानि चतुर्दश॥ ५९॥
त्रिकोणे संस्थितो मेरुरधः कोणे च मन्दरः। दक्षकोणे च कैलासो वामकोणे हिमाचलः॥ ६०॥
निषधश्चोर्ध्वरेखायां दक्षायां गन्धमादनः। रमणो वामरेखायां सप्तैते कुलपर्वताः॥ ६१॥
अस्थिस्थाने भवेज्जम्बूः शाको मज्जासु संस्थितः। कुशद्वीपस्थितो मांसे कौञ्चद्वीपः शिरासु च॥ ६२॥
त्वचायां शाल्मलीद्वीपो गोमेदो रोमसञ्चये। नखस्थं पुष्करं विद्यात्सागरास्तदनन्तरम्॥ ६३॥

छ कण्ठमा महर् लोक॥ ५८॥ मुखमा तप लोक, ब्रह्मरन्ध्रमा (तालु) सत्यलोक छ, तलको र माथीको गरी चौदह भुवनहरू छन्॥ ५९॥ अब यही शरीरमा सुमेरु पर्वतहरू पनि छन्, त्रिकोण (कम्मरको हाड) मा सुमेरु छ, (डँडाल्नोलाई भन्दछन्) तलको भागमा मन्दराचल छ, दाहिने कुनामा कैलास पर्वत छ, देब्रे (वामकुनामा) हिमाचल छन्॥ ६०॥ माथीको रेखामा निषध पर्वत, दाहिने पट्टीको रेखामा गन्धमादन छ, वाम रेखामा रमण नामको पर्वत छ, यी सात कुलपर्वतहरू हुन्॥ ६१॥ अब सप्त द्वीपहरूको स्थान भन्दछु। अस्थि (हाड) मा जम्बू द्वीप, मज्जा (मासि) मा शाकद्वीप रहेको छ। मासुमा कुशद्वीप, क्रौंच द्वीप नसामा छ॥ ६२॥ छालामा शाल्मली द्वीप, गोमेद (पुष्कर) द्वीप नङ्मा छ, तिनीहरूका अन्तरमा सागर (समुद्र) हरू छन्॥ ६३॥ कुन् कुन् कहाँ छन् भने क्षीर समुद्र मूत्रस्थानमा छ, दूधमा

क्षारोदो हि भवेन्मूत्रे क्षीरे क्षेरोदसागरः। सुरोदधिःश्लेष्मसंस्थो मज्जायां घृतसागरः॥ ६४॥
रसोदधि रसे विद्याच्छोणिते दधिसागरः। स्वादूदो लम्बिकास्थाने जानीयाद्विनतासुत॥ ६५॥
नादचक्रे स्थितः सूर्यो बिन्दुचक्रे च चन्द्रमाः। लोचनस्थः कुजो ज्ञेयो हृदये ज्ञः प्रकीर्तितः॥ ६६॥
विष्णुस्थाने गुरुर्विद्याच्छुक्रे शुक्रो व्यवस्थितः। नाभिस्थाने स्थितो मन्दो मुखे राहुः प्रकीर्तितः॥ ६७॥
वायुस्थाने स्थितः केतुः शरीरे ग्रहमण्डलम्। एवं सर्वस्वरूपेण चिन्तयेदात्मनस्तनुम्॥ ६८॥
सदा प्रभातसमये बद्धपद्मासनः स्थितः। षट्चक्रचिन्तनं कुर्याद्यथोक्तमजपाक्रमम्॥ ६९॥

क्षीर सागर छन्, सुरा समुद्र कफ स्थानमा छ, घृतसागर मासीमा छ॥ ६४॥ रसको समुद्र रसमा जान्नु, रगतमा दधि समुद्र छ, लम्बिका (किलकिले)मा स्वादिलो जलको (शुद्ध जल) समुद्र छ भने हे विनताका छोरा (गरुडजी) जान॥ ६५॥ अब ग्रहको निवास भन्दछु। नाद चक्रमा सूर्य छन्। बिन्दु चक्रमा चन्द्रमा, नेत्रमा मङ्गल, हृदयमा बुध जान्नु॥ ६६॥ विष्णुस्थानमा बृहस्पति छन्, शुक्र स्थानमा शुक्र रहेका छन्, नाभिस्थानमा शनिश्चर, मुखमा राहु बसेका छन्॥ ६७॥ वायुका स्थानमा केतु बसेको छ। सम्पूर्ण ग्रहहरू शरीरमा बसेका छन्। यस्तै प्रकारले सबै स्वरूपले युक्त भयेको आफ्नु शरीरको चिन्तन गरी॥ ६८॥ सदा सर्वथा प्रभात (ब्रह्ममुहूर्त) का बेलामा पद्मासन बाँधेर अजपाको जस्तो क्रम भनेको छ उही क्रमले षट् चक्रको चिन्तन गरोस्॥ ६९॥ अजपा नाम भयेकी गायत्री मुनीहरूका मोक्षकी

अजपानाम गायत्री मुनीनां मोक्षदायिनी। अस्याः सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते॥ ७०॥
शृणु तार्क्ष्य प्रवक्ष्येऽहमजपाक्रममुत्तमम्। यं कृत्वा सर्वदा जीवो जीवभावं विमुञ्चति॥ ७१॥
मूलाधारः स्वाधिष्ठानं मणिपूरकमेव च। अनाहतं विशुद्धयाख्यमाज्ञाषट्चक्रमुच्यते॥ ७२॥
मूलाधारे लिङ्गदेशे नाभ्यां हृदि च कण्ठगे। भ्रुवोर्मध्ये ब्रह्मरन्ध्रे क्रमाच्चक्राणि चिन्तयेत्॥ ७३॥
आधारं तु चतुर्दलानलसमं वासान्तवर्णाश्रय। स्वाधिष्ठानमपि प्रभाकरसमं बालान्तषट्पत्रकम्॥
रक्ताभं मणिपूरकं दशदलं डाद्यं फकारान्तकं पत्रैर्द्वादशभिरनाहतपुरं हैमं कठान्तावृतम्॥ ७४॥

दाता हुन्। यीनिको संकल्पले मात्र सबै पापबाट मुक्त हुन्छन्॥ ७०॥ हे तार्क्ष्य, अजपाको उत्तम चक्र म भन्दछु, जुन सधैं गर्नाले (जीवात्मा) जीव भावलाई (त्याग्दछ चैतन्य स्वरूपमा) प्राप्त हुन्छ॥ ७१॥ अब षट् चक्र कुन हुन् भने मूलाधार, स्वाधिष्ठान, मणिपुर, अनाहत, विशुद्ध, आज्ञा, यीनिहरूलाई षट् चक्र भन्दछन्॥ ७२॥ मूलाधार (गुदादेखि केहि माथी लिङ्गदेखि मनीलाई भन्दछन्) मा, लिङ्गस्थानमा, नाभिमा, हृदयमा, कण्ठमा, आँखि भृत्रिमा, ब्रह्मरन्ध्रमा (तालुमा) क्रमैले चक्रस्थानमा चिन्तन (ध्यान) गरोस्॥ ७३॥ आधारचक्र, चारपाते (कमल) अग्निको जस्तो वर्ण भयेको'व'देखि 'स' सम्मको वर्णले युक्त स्वाधिष्ठान पनि सूर्य जस्तो प्रकाशले युक्त 'व' देखि 'ल' सम्मका वर्ण छः पत्र भयेको कमल युक्त मणिपुरको चक्र, रगतको वर्ण भयेको दशपाते कमल 'ड' देखि 'फ' सम्मका

पत्रैः सस्वरषोडशैः शशधरज्योतिर्विशुद्धाम्बुजं हंसेत्यक्षरयुग्मकं द्वयदलं रक्ताभमात्राम्बुजम् ॥
तस्मादूर्ध्वगतं प्रभासितमिदं पद्मं सहस्रच्छदं सत्यानन्दमयं सदाशिवमयं ज्योतिर्म वंशाश्वतम् ॥ ७५ ॥
गणेशं च विधिं विष्णुं शिवं जीवं गुरुं ततः। व्यापकं च परं ब्रह्म क्रमाच्चक्रेषु चिन्तयेत् ॥ ७६ ॥
एकविंशसहस्राणि षट्शतान्यधिकानि च। अहोरात्रेण श्वासस्य गतिः सूक्ष्मा स्मृता बुधैः ॥ ७७ ॥
हकारेण बहिर्याति सकारेण विशेत्पुनः। हंसो हंसेति मन्त्रेण जीवो जपति तत्त्वतः ॥ ७८ ॥

वर्णले युक्त, बाह्पात (कमल) ले युक्त, भयेको सुनको जस्तो कान्ति, 'क' देखि 'ठ' सम्मका वर्णले युक्त अनाहत चक्र छ ॥ ७४ ॥ षोडश पत्रहरूले युक्त कमलमा स्वर वर्ण (अआ) हरू छन् चन्द्रमाको ज्योतिभयेको विशुद्ध नाम भयेको चक्र छ। दुई दल भयेको कमल लाल वर्ण 'हं' सः, अक्षर भयेको छ त्यहाँदेखि माथि प्रकाशमान हजारपत्र भयेको कमलमा सत्चित् आनन्दमय, सदा शिवमय ज्योतिमय शाश्वत (निरन्तर भयेका) लाई ध्यान गरोस् ॥ ७५ ॥ छ चक्रमा यो देवताहरू क्रमैले बसेका छन्— गणेश विधि, (ब्रह्मा) विष्णु, शिव, जीवात्मा, गुरु। वहाँ पछी व्यापक परब्रह्मको चिन्तन गरोस् ॥ ७६ ॥ एक्काइस हजार सय रात दिनमा मनुष्यहरूको श्वासको सूक्ष्मगति हुन्छ भनि शास्त्रवेत्ता पण्डितहरूले भनेका छन् ॥ ७७ ॥ त्यो श्वासको गति, हकारको आफैं उच्चारण भयेर बाहिर जान्छ, सकारको उच्चारण हुदा आफैं भित्र पस्दछ। यसै मन्त्रलाई जीव (जीवात्मा) तत्त्व पूर्वक जप्तछ (यसैलाई अजपा भन्दछन्) ॥ ७८ ॥

षट्शतं गणनाथाय षट्सहस्रं तु वेधसे। षट्सहस्रं च हरये षट्सहस्रं हराय च ॥ ७९ ॥
जीवात्मने सहस्रं च सहस्रं गुरवे तथा। चिदात्मने सहस्रं च जपसंख्या निवेदयेत् ॥ ८० ॥
एतांश्चक्रगतान् ब्रह्ममयूखान् मुनयोऽमरान्। सत्संप्रदायवेत्तारश्चिन्तयन्त्यरुणादयः ॥ ८१ ॥
शुकादयोऽपि मुनयः शिष्यानुपदिशन्ति च। अतः प्रवृत्तिं महतां ध्यात्वा ध्यायेत्सदा बुधः ॥ ८२ ॥
कृत्वा च मानसीं पूजां सर्वचक्रेष्वनन्यधीः। ततो गुरूपदेशेन गायत्रीमजपां जपेत् ॥ ८३ ॥
अधोमुखे ततो रन्ध्रे सहस्रदलपङ्कजे। हंसगं श्रीगुरुं ध्यायेद्वराभयकराम्बुजम् ॥ ८४ ॥

यस्को संकल्प गर्नाले मुक्त हुन्छ। छ सय गणेशलाई, छ हजार ब्रह्मालाई, छ हजार विष्णुलाई, छ हजार शिवजीलाई ॥ ७९ ॥ जीवलाई हजार, गुरुलाई हजार, चिदात्मालाई हजार, यसै गरी जप संख्या समर्पण गरोस् ॥ ८० ॥ अरूण आदि सत्संप्रदायलाई जान्ने अमर भयेका मुनिहरू यी चक्रहरूमा रहेका ब्रह्म मयूख (ब्रह्मस्वरूपलाई) लाई चिन्तन गर्दछन् ॥ ८१ ॥ शुकदेव आदि मुनिहरू पनि आफ्ना शिष्यहरूलाई उपदेश गर्दछन् कि यसैले सज्जनको प्रवृत्ति विचार गरेर बुद्धिमान् जन ध्यान गरोस ॥ ८२ ॥ यी चक्रहरूको मानसिकपूजा अन्त कतै मन न लगाई गरोस्। गुरुको उपदेश बमोजिम अजपा गायत्रीलाई जपोस् ॥ ८३ ॥ हजार दल भयेको कमलको तल (तलतिरमुख फर्केको) मुख भयेका छिद्रमा हंस स्थानमा बसेका श्रीगुरुको वर, अभय बाहुले युक्त भयेको ध्यान गरोस् ॥ ८४ ॥ तिनका पाठको अमृतरूपी धाराले

क्षालितं चिन्तयेद्देहं तत्पदामृतधारया। पञ्चोपचारैः संपूज्य प्रणमेत्तत्स्तवेन च॥ ८५॥
ततः कुण्डलिनीं ध्यायेदारोहादवरोहतः। षट्चक्रकृतसञ्चारां सार्धत्रिवलयां स्थिताम्॥ ८६॥
ततो ध्यायेत्सुषुम्नाख्यं धामरन्ध्राद्बहिर्गतम्। तथा तेन गता यान्ति तद्विष्णोः परमं पदम्॥ ८७॥
ततो मच्चिन्तितं रूपं स्वयंज्योतिः सनातनम्। सदानन्दं सदा ध्यायेन्मुहूर्ते ब्रह्मसंज्ञके॥ ८८॥
एवं गुरूपदेशेन मनो निश्चलतां नयेत्। न तु स्वेन प्रयत्नेन तद्विना पतनं भवेत्॥ ८९॥
अन्तर्योगं विधायैवं बहिर्योगं समाचरेत्। स्नानसन्ध्यादिकं कृत्वा कुर्याद्धरिहरार्चनम्॥ ९०॥

शरीरलाई पखालेको यस्तो चिन्तन गरोस्। पंचोपचारले पूजा गरेर ढोगोस्। तिनका स्तोत्रले स्तुति पनि गरोस्॥ ८५॥ त्यहाँ पछी कुण्डलिनीलाई ध्यान गरोस्। ती कुण्डलिनी कस्ती छन् भने तिनफेर र आधाले युक्त भयेर बसेको (इनैलाई सुषुम्ना भन्दछन्) श्वासको गतिसँगै तलमाथी गरी षट् चक्रहरूमा हिंड्दछिन्॥ ८६॥ सुषुम्ना नामको स्थान चाँही ब्रह्मरन्ध्रदेखि बाहिर त्यो बाटाबाट गयेकाहरू विष्णुको परं (श्रेष्ठ) पद (स्थान) मा जान्छन्॥ ८७॥ त्यो पद कस्तो छ भने मैले चिन्तन गरीयेको आफैं आफ ज्योतिले युक्त सनातन (एक सनातन), सदा आनन्द भयेको रूप ब्रह्ममुहूर्तमा ध्यान गरोस्॥ ८८॥ यस्ता प्रकारका गुरुका उपदेशले मन निश्चल गरोस्। गुरु विना आफैं परिश्रमले गर्नाले पतन हुँन्छ (त्यसैले आफैं न गरोस्)॥ ८९॥ यसैलाई अन्तर्योग भन्दछन्। यो गरेर बहियोंग गरोस्, स्नान, सन्ध्या, आदि कर्म गरेर हरिको पूजा गरोस्॥ ९०॥

देहाभिमानिनामन्तर्मुखी वृत्तिर्न जायते। अतस्तेषां तु मद्भक्तिः सुकरा मोक्षदायिनी॥ ९१॥
तपो योगादयो मोक्षमार्गाः सन्ति तथापि च। समीचीनस्तु मद्भक्तिमार्गः संसरतामिह॥ ९२॥
ब्रह्मादिभिश्च सर्वज्ञैरयमेव विनिश्चितः। त्रिवारं वेदशास्त्राणि विचार्य च पुनः पुनः॥ ९३॥
यज्ञादयोऽपि सद्धर्माश्चित्तशोधनकारकाः। फलरूपां च मद्भक्तिस्तां लब्ध्वा नावसीदति॥ ९४॥
एवमाचरणं तार्क्ष्य करोति सुकृती नरः। संयोगेन च मद्भक्त्या मोक्षं याति सनातम्॥ ९५॥

॥ इति श्रीगरुडपुराणे सारोद्धारे सुकृतिजनजन्माऽचरणनिरूपणं नाम पञ्चदशोऽध्यायः॥ १५॥

देहाभिमानिहरूको अन्तर्मुखी (यो षट्चक्रको ध्यान) वृति हुँदैन, यसैले तिनीहरूका निमित्त मेरी भक्ति मोक्ष दिनमा सजिली-छन्॥ ९१॥ किन भने तप, योग आदि गरेका मोक्ष (दिनेबाट) मार्ग धेरै भये तापनि मेरी भक्ति संसारीहरूलाई बढीया छन्॥ ९२॥ सर्वज्ञ भयेका ब्रह्मादिहरूले पनि वारंबार वेदशास्त्रहरू तीन पल्ट हेरी विचारी येही निश्चय गर्दा भये॥ ९३॥ यज्ञादि सद्धर्म जति छन् ती सबै चित शुद्ध गर्ने मात्र हुन्। मेरी भक्तिलाई जस्ले प्राप्त गरेको छ त्यस्ले कैले दुःखित हुनु पर्दैन॥ ९४॥ हे गरुडजी, सुकृतिजनले यस्ता प्रकारको आचरण गरे भने मेरी भक्तिका सम्बन्धले कैले नाश न हुने मोक्षमा पुग्दछन्॥ ९५॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां पञ्चदशोऽध्यायः॥ १५॥

* अथ षोडशोऽध्यायः *

गरुड उवाच —

श्रुतं मया दयासिन्धो ह्यज्ञानाज्जीविसंसृतिः। अधुना श्रोतुमिच्छामि मोक्षोपायं सनातनम्॥ १॥
भगवन् देवदेवेश शरणागतवत्सल। असारघोरसंसारे सर्वदुःखमलीमसे॥ २॥
नानाविधशरीरस्था ह्यनन्ता जीवराशयः। जायन्ते च म्रियन्ते च तेषामन्तो न विद्यते॥ ३॥
सदा दुःखातुरा एव न सुखी विद्यते क्वचित्। केनोपायेन मोक्षेश मुच्यन्ते वद मे प्रभो॥ ४॥

श्रीगरुडजी श्रीभगवान संग बिन्ती गर्दछन् —हे दयासिन्धो! मैले अज्ञानदेखि भयेका जीवको उत्पत्ति सुनें ऐले सनातन (कैले नाश नहुने) मोक्षको उपाय सुन्न इच्छा गर्दछु॥ १॥ हे भगवान, देव देवेश, हे शरणागतवत्सल,सम्पूर्ण दुःखहरूले मैलो भयेको सारवस्तु भने कुनै न भयेको घोर (डर लाग्दो) यस्तो संसारमा जीव कसरी मुक्त हुन्छन्॥ २॥ अनेक प्रकार शरीरमा अवस्था छन् अनन्त (गनि न सकिने) जीवहरूका राशि छन्। जन्मन्छन्, मर्छन्, तिनीहरूको ठेकान छैन॥ ३॥ सदा सर्वदा दुःखिभै रहेका कहिले पनि सुखि न भयेका यस्ता मनुष्यहरुको कुन उपायले (यस संसारको दुखबाट) मुक्ति हुन्छ। मोक्षका मालिक, हे प्रभो, मलाई आज्ञा होस्॥४॥

श्रीभगवानुवाच —

शृणु तार्क्ष्य प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि। यस्य श्रवणमात्रेण संसारान्मुच्यते नरः॥ ५॥
अस्ति देवः परब्रह्मस्वरूपी निष्कलः शिवः। सर्वज्ञः सर्वकर्ता च सर्वेशो निर्मलोऽद्वयः॥ ६॥
स्वयंज्योतिरनाद्यन्तो निर्विकारः परात्परः। निर्गुणः सच्चिदानन्दस्तदंशाज्जीवसंज्ञकः॥ ७॥
अनाद्यविद्योपहताद्यथाग्नौ विस्फुलिङ्गकाः। देहाद्युपाधिसंभिन्नास्ते कर्मभिरनादिभिः॥ ८॥
सुखदुःखप्रदैःपुण्यपापरूपैर्नियन्त्रिताः। तत्तज्जातियुतं देहमायुर्भोगं च कर्मजम्॥ ९॥

श्रीविष्णु भगवान् आज्ञा गर्नु हुन्छ — हे गरुडजी, जुन कुरा तिमीले मलाई सोधेका छौ त्यो तिमीलाई म भन्दछु, सुन, जुन कुरा सुन्नाले मात्र संसारबाट मनुष्य मुक्त हुन्छ॥ ५॥ देव कस्ता छन् भने परब्रह्मस्वरूपी, कला रहित शिव सर्वयज्ञ सबैका कर्ता, सम्पूर्णका मालिक, निर्मल केवल आफै आफ प्रकाशमान, आदि अन्त्य न भयेका निराकार, सबै भन्दा पर (श्रेष्ठ), निर्गुण (सत्व, रज, तम यी तीन गुणले) रहित, सत चित् आन्द स्वरूप यीनै अंशदेखि जीव संज्ञा भयेका हुन्॥ ६-७॥ अनादि अविद्याको ठक्कर लाग्नाले आगाको झिल्का निस्के झैं आनादिकर्महरूले भिन्न भयेका देहादिका उपाधिहरू छन्॥ ८॥ सुखलाई र दुःखलाई दिनेभयेका, पुण्य र पापहरूले बाँधियेका, त्यहि त्यहि जातिमा युक्त कर्मदेखि उत्पन्न भयेका आयु भोग गर्दछन्॥ ९॥ फेरि प्रत्येक जन्ममा प्राप्त हुन्छन्। तिनीहरूको परं पद, भयेको

प्रतिजन्म प्रपद्यन्ते तेषामपि परं पुनः। ससूक्ष्मलिङ्गशरीरमामोक्षादक्षरं खग॥ १०॥
स्थावराःकृमयश्चाजाःपक्षिणः पशवो नराः। धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम्॥ ११॥
चतुर्विधशरीराणि धृत्वा मुक्त्वा सहस्रशः। सुकृतान्मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात्॥ १२॥
चतुरशीतिलक्षेषु शरीरेषु शरीरिणाम्। न मानुषं विनान्यत्र तत्त्वज्ञानं तु लभ्यते॥ १३॥
अत्र जन्मसहस्राणां सहस्रैरपि कोटिभिः। कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥ १४॥
सोपानभूतं मोक्षस्य मानुष्यं प्राप्य दुर्लभम्। यस्तारयति नात्मानं तस्मात्पापतरोऽत्र कः॥ १५॥

सूक्ष्म लिङ्ग शरीर हे गरुडजी नाश नहुने मोक्ष प्राप्त हुन्छन्॥ १०॥ स्थावर भनेका (पर्वत वृक्षहरू) किरा, पशु, पक्षी, मनुष्यहरू धार्मिकहरू त्यस्तै मोक्ष इच्छा गर्ने क्रमैले। चार प्रकारका शरीरहरू धारण गरेर हजारौं (शरीर योनि) छाडेर धर्मका प्रभावले मनुष्य भयेर पनि यदि ज्ञानी छ भने मोक्ष पाउँछ॥ ११-१२॥ चौरासी लाख योनिहरूमा शरीर धारीका मध्ये मनुष्य भयेर मात्र सत्यज्ञान प्राप्त हुन्छ नत्र हुँदैन॥ १३॥ अब यहाँ (यस् मनुष्य लोकमा) हजारौं कडोरौं जन्महरूले पुण्यको संचय हुनाले जन्तु जो छ सो मनुष्य जन्म पाउँछ॥ १४॥ यो मनुष्य योनि कस्तो छ भने मोक्षको सिंढी भयेको, यस्लाई पाइकन जुन मनुष्य आफुलाई तारदैन त्यसदेखि पापी यहाँ

नरः प्राप्योत्तमं जन्म लब्ध्वा चेन्द्रियसौष्ठवम्। न वेत्त्यात्महितं यस्तु स भवेद्ब्रह्मघातकः॥ १६॥
विना देहेन कस्यापि पुरुषार्थो न विद्यते। तस्माद्देहधनं रक्षेत्पुण्यकर्माणि साधयेत्॥ १७॥
रक्षयेत्सर्वदात्मानमात्मा सर्वस्य भाजनम्। रक्षणे यत्नमातिष्ठेज्जीवन् भद्राणि पश्यति॥ १८॥
पुनर्ग्रामाः पुनः क्षेत्रं पुनर्वित्तं पुनर्गृहम्। पुनः शुभाशुभं कर्म न शरीरं पुनः पुनः॥ १९॥
शरीररक्षणोपायाः क्रियन्ते सर्वदा बुधैः। नेच्छन्ति च पुनस्त्यागमपि कुष्ठादिरोगिणः॥ २०॥
तद्गोपितं स्याद्धर्मार्थं धर्मो ज्ञानार्थमेव च। ज्ञानं तु ध्यानयोगार्थमचिरात् प्रविमुच्यते॥ २१॥

को छ॥ १५॥ सबै भन्दा पछिल्लो जन्म मनुष्यको पायेर पनि इन्द्रियहरूका आनन्दमा रहन्छ। आफ्नो हित अहित जान्दैन भने त्यही हो ब्रह्मघाती॥ १६॥ त्यस् कारणले देह नभै कसैको पनि पुरुषार्थ सिद्ध हुँदैन। देह रूपीधनको रक्षा गरोस्, अनि पुण्यकर्महरू कन साधोस्॥ १७॥ सदा सर्वदा आत्माको रक्षा गरोस्, किन भने आत्मा नै सबैको भाँडो हो यस्को रक्षा गर्न प्रयत्न गरोस, किन भने बाँच्नाले सुख भोग्न पाइन्छ॥ १८॥ फेरि गाऊँ, फेरि खेत, फेरि शुभ अशुभ कर्महरू भै रहन्छन्, शरीर चाँही बारंबार हुदैनन्॥ १९॥ यसैले शरीर रक्षाको उपाय सदा सर्वदा पण्डितहरूले गर्दछन्। कुष्ठ रोगीहरूले पनि शरीर छोड्नलाई इच्छा गर्दैनन्॥ २०॥ त्यसकारणले शरीरको रक्षा धर्मकर्मका लागि गरोस्, धर्मबाट ज्ञान हुन्छ, ज्ञान पछि ध्यानयोग गरिन्छ, जुन योग गर्नाले चाँडै नै मुक्ति हुन्छ॥ २१॥ यदि आफुनै

ग० आत्मैव यदि नात्मानमहितेभ्यो निवारयेत्। कोऽन्यो हितकरस्तस्मादात्मानं तारयिष्यति ॥ २२ ॥ गी०
पु० इहैव नरकव्याधेश्चिकित्सां न करोति यः। गत्वा निरौषधं देशं व्याधिस्थः किं करिष्यति ॥ २३ ॥ अ०
व्याध्रीवास्ते जरा चायुर्याति भिन्नघटाम्बुवत्। निघ्नन्ति रिपुवद्रोगास्तमाच्छ्रेयः समभ्यसेत् ॥ २४ ॥
यावन्नाश्रयते दुःखं यावन्नायान्ति चापदः। यावन्नेन्द्रियवैकल्यं तावच्छ्रेयः समभ्यसेत् ॥ २५ ॥
यावत्तिष्ठति देहोऽयं तावत्तत्त्वं समभ्यसेत्। सन्दीप्ते कोणभवने कूपं खनति दुर्मतिः ॥ २६ ॥
कालो न ज्ञायते नानाकार्यैः संसारसम्भवैः। सुखं दुःखं जनो हन्त न वेत्ति हितमात्मनः ॥ २७ ॥

आफुलाई अहित देखि रक्षा गर्दैन भने अर्को हितकारी को हुन्छ। तस्मात् आफुले नै आफैँलाई हित गराउने हुनुपर्छ ॥ २२ ॥ नरक रूपी रोगको यहीं नै जो मनुष्य औषधी गर्दैन भने औषधी नै न भयेका देशमा गयेर रोगी के गर्न सक्नेछ (क्यै गर्न सक्तैन) ॥ २३ ॥ बुढ्याञी कस्ति छ भने छोरा छोरी पायेकी बाघिनी जस्ति छ। आयु कस्तो छ भने फुटेको घडाइँ बगीरहन्छ। रोगहरू शत्रुलाई झैं मार्दछन् भने त्यसैले कल्याण हुने उपायको अभ्यास गरोस् ॥ २४ ॥ जहाँसम्म दुःख आउँदैन, जहाँ सम्म आपत्ति आउँदैन, जहाँ सम्म इन्द्रियहरू विकल हुदैनन् त्यहाँ सम्ममा कल्याण हुँने उपाय गरोस् ॥ २५ ॥ त्यसैले जहाँ सम्म देह शरीर रहन्छ त्यहाँ सम्म तत्त्वको अभ्यास गरोस्, किन भने घरमा आगो लागे पछी मति नाश भयेको मनुष्य ईनार खन्ने धमाधम गर्दछ ॥ २६ ॥ संसारमा भयेका अनेक कामहरूले काल जान्दै २१०

ग० जातानार्तान्मृतानापद्ग्रस्तान् दृष्ट्वा च दुःखितान्। लोको मोहसुरां पीत्वा न बिभेति कदाचन ॥ २८ ॥
पु० सम्पदःस्वप्नसंकाशा यौवनं कुसुमोपमम्। तडिच्चपलमायुष्यं कस्य स्याज्जानतो धृतिः ॥ २९ ॥ गी०
शतं जीवितमत्यल्पं निद्रालस्यैस्तदर्धकम्। बाल्यरोगजरादुःखैरल्पं तदपि निष्फलम् ॥ ३० ॥ अ०
प्रारब्धव्ये निरुद्योगो जागर्तव्ये प्रसुप्तकः। विश्वस्तव्यो भयस्थाने हा नरः को न हन्यते ॥ ३१ ॥
तोयफेनसमे देहे जीवेनाक्रम्य संस्थिते। अनित्यप्रियसंवासे कथं तिष्ठति निर्भयः ॥ ३२ ॥
अहिते हितसंज्ञः स्यादध्रुवे ध्रुवसंज्ञकः। अनर्थे चार्थविज्ञानः स्वमर्थं यो न वेत्ति सः ॥ ३३ ॥

जान्दैन, सुख-दुःख, आफ्नो हित-अहित जान्दैन, हरे! ॥ २७ ॥ जन्म रोगले पीडित भयेर मरेकाहरू, आपत्तिले ग्रस्त भयेका, दुखिः भयेकाहरूकन देखेर पनि मनुष्य मोहरूपी रक्सी पियेकाले पनि (कालदेखि) डराउँदैन ॥ २८ ॥ सम्पत्ति कस्तो छ भने सपना जस्तो छ। यौवन कस्तो छ भने फूलेको फूल जस्तो छ। आयु चाँहीं बिजुली झैं चञ्चल छ भन्ने जान्दा जान्दै कसलाई धैर्य हुन्छ ॥ २९ ॥ पूर्ण आयु शय वर्षको छ भने त्यो निद्रा आलस्यहरूले आधा निष्फल भो, फेरि वाल्यावस्थाले रोगले बुढ्याञी दुःखहरूले थोरै थोरै गरी त्यो पनि नाश हुन्छ ॥ ३० ॥ प्रारम्भ गर्ने (उद्योग गर्नेमा) मा उद्योगैछैन। जुन कुरामा जागा हुनू पर्छ उस कुरामा निधायेका छन् र विश्वास मान्नेमा भय गर्दछन् भने यस्ता मनुष्य किन मारिदैनन् ॥ ३१ ॥ पानीको फोका समान भयेको देहमा जीव आत्माले रहेको यस्तो अनित्यलाई प्यारो २११
मानि सहवास गर्दछ, त्यो कसरी निर्भय हुंछ (हुनै सक्तैन) ॥ ३२ ॥ न असल भयेकोलाई असल जत्तिकै मान्ने, नाशहुने वस्तुलाई नाश न

पश्यन्नपि प्रस्खलति शृण्वन्नपि न बुद्ध्यते। पठन्नपि न जानाति देवमायाविमोहितः ॥ ३४ ॥
तन्निमज्जज्जगदिदं गम्भीरे कालसागरे। मृत्युरोगजराग्राहैर्न कश्चिदपि बुद्ध्यते ॥ ३५ ॥
प्रतिक्षणमयं कालःक्षीयमाणो न लभ्यते आमकुम्भ इवाम्भस्थो विशीर्णो न विभाव्यते ॥ ३६ ॥
युज्यते वेष्टनं वायोराकाशस्य च खण्डनम्। ग्रन्थनं च तरङ्गाणामास्था नायुषि युज्यते ॥ ३७ ॥
पृथिवी दह्यते येन मेरुश्चापि विशीर्यते। शुष्यते सागरजलं शरीरस्य च का कथा ॥ ३८ ॥

हुने जत्तिकै मान्दछन्, अनर्थमा अर्थ जतिकैको ज्ञान गर्ने, आफ्नो स्वार्थलाई जान्ने जत्तिको मूढ मनुष्य अर्काको हुन्छ (जो इष्ट भयेका मोक्षका दाता परमेश्वरलाई चिन्तन गर्न छोड़ी संसारको व्यवहारलाई मात्र गर्दछ ॥ ३३ ॥ धमाधम देखी रहेछ यस्तो गर्नाले नरक जाइन्छ, यस्तो गर्नाले मुक्ति हुन्छ भन्ने तै पनि लड्दछ। सुन्दा सुन्दै पनि बुझ्दैन। त्यै कुरा पढ्दैछ (अज्ञानले नरक र ज्ञानले मोक्ष) ता पनि दैवी मायाले मोह भयेको क्यै पनि जान्दैन ॥ ३४ ॥ त्यसैले यो जगत् कस्तो छ भने कालरूपी गहीरो समुद्रमा डुबेकालाई मृत्युरूपी रोग बुढ्याइँ रुपी ग्राहले डुबाउन लागेता पनि क्यै बुझ्दैन ॥ ३५ ॥ एक एक दिन क्षणमा नाशभैरहेको काललाई देख्दैन जसरी काँचो माटाको घडामा रहेको जल वगैर गयेको विचार गर्न सकिन्न ॥ ३६ ॥ वायुलाई बाँध्न सकिन्छ, आकाशको टुक्रा गर्न सकियेला नदीको तरङ्ग (लहर) लाई उन्न सकियेला, तर आयुष्यमा विश्वास गर्न सकिन्न ॥ ३७ ॥ जसले पृथ्वीलाई डढाउँछन्, सुमेरु पनि नाश गर्दछ, सागरको जललाई

अपत्यं मे कलत्रं मे धनं मे बान्धवाश्च मे। जल्पन्तमिति मर्त्याजं हन्ति कालवृको बलात् ॥ ३९ ॥
इदं कृतमिदं कार्यमिदमन्यत्कृतम् कृतम्। एवमीहासमायुक्तं कृतान्तः कुरुते वशम् ॥ ४० ॥
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्। नहि मृत्युः प्रतीक्षेत कृतं वाप्यथवाकृतम् ॥ ४१ ॥
जरादर्शितपन्थानं प्रचण्डव्याधिसैनिकम्। मृत्युशत्रु धिष्ठोऽसि त्रातारं किं न पश्यसि ॥ ४२ ॥
तृष्णासूचीविनिर्भिन्नं सिक्तं विषयसर्पिषा। रागद्वेषानले पक्वं मृत्युरश्नाति मानवम् ॥ ४३ ॥

सुकाउँछ भने शरीरको के कुरा छ ? ॥ ३८ ॥ मेरा छोरा–छोरी, मेरी स्त्री, मेरो धन भाइ बन्धुहरू, यस्तो भन्दा भन्दै कालरूपी, व्वाँसोले बलजफ्ती मान्छेरूपीबाख्रालाई तत्कालै मार्दछ ॥ ३९ ॥ यो गरें, यो गर्नु छ, यो अर्को गरेको, यो न गरेको यस्तो विचारले युक्त छँदा छँदै कृतान्त (यमराज) ले आफ्ना वश पारी हाल्दछ ॥ ४० ॥ त्यसैले भोलि गर्नु छ भने आज गरोस्, भरे गर्नु पर्नेलाई ऐले गरोस्। मृत्यु कस्तो छ भने यसले गरी सक्यो, यसले गरेको छैन भनि बाटो हेरेर बसी रहदैन ॥ ४१ ॥ त्यसैले आफ्नु हित भयेका मोक्षदिने परमेश्वरलाई भक्ति पूर्वक चिन्तना गरोस्। (कालले केही थाहै नदी मार्दछ कि) बुढ्यांजिले बाटो देखाये र चण्ड (डर लाग्दो) रोगहरू नै सेनाहरू (फौज) युक्त भयेको मृत्युरूपी शत्रुको अधिकारमा परेका छौ, रक्षागर्नेलाई किन हेर्दैनौ ॥ ४२ ॥ तृष्णा रूपी सियोले छेडेर [भोगी] विषय रूपी

बालांश्च यौवनस्थांश्च वृद्धान् गर्भगतानपि। सर्वानाविशते मृत्युरेवंभूतमिदं जगत् ॥ ४४ ॥
स्वदेहमपि जीवोऽयं मुक्त्वा याति यमालयम्। स्त्रीमातृपितृपुत्रादिसंबंधःकेन हेतुना ॥ ४५ ॥
दुःखमूलं हि संसारः स यस्यास्ति स दुःखितः तस्य त्यागःकृतो येन स सुखी नापरःक्वचित् ॥ ४६ ॥
प्रभवं सर्वदुःखानामालयं सकलापदाम्। आश्रयं सर्वपापानां संसारं वर्जयेत्क्षणात् ॥ ४७ ॥
लोहदारुमयैःपाशैःपुमान् बद्धोविमुच्यते। पुत्रदारमयैः पाशैर्मुच्यते न कदाचन ॥ ४८ ॥
यावन्तः कुरुते जन्तुः संबन्धान् मनसः प्रियान्। तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥ ४९ ॥

घ्यूले सेचन गरेको, राग [प्रेम] द्वेष (रिष रूपी आगामा पकायेर मनुष्यलाई खान्छ ॥ ४३ ॥ बालकहरूलाई, जवान भयेकाहरूलाई, गर्भमा वासगरेकाहरूलाई पनि मृत्यु योनि सबैमा आवेश गर्दछ (यस्तो यो जगत् छ) ॥ ४४ ॥ यो जीव (प्राणी) आफ्नु प्यारो शरीरलाई छाडेर यमराजका घरमा जान्छ भने स्त्री, माता, पिता, छोरा आदि कुन कारणले संबन्ध रहलान् ॥ ४५ ॥ दुःखको मूलकारण संसार हो, जस्को छ त्यही दुःखिहो, जस्ले त्यस्को त्याग गर्न सक्यो त्यही हो सुखी अर्को कोही पनि छैन ॥ ४६ ॥ सम्पूर्ण दुःखहरुलाई सृष्टिगर्ने सबै आपत्तिहरूको घरभयेको, सम्पूर्ण पापको आश्रय भयेको यस्तो यो संसारलाई क्षण (एकैछिनमा) त्याग गरोस् ॥ ४७ ॥ लोहा, फलाम, काठले बनेका पाशाहरूले बाँधियेको मनुष्य फुस्कन्छ, स्वास्नी छोरा रूपी पाशाले बाँधीयेको कहीलै मुक्त हुँदैन ॥ ४८ ॥ जो प्राणी मनका

वञ्चिताशेषविषयैर्नित्यं लोको विनाशितः। हा हन्त विषयाहारैर्देहस्थेन्द्रियतस्करैः ॥ ५० ॥
मांसलुब्धो यथा मत्स्यो लोहशङ्कुं न पश्यति। सुखलुब्धस्तथादेही यमबाधां न पश्यति ॥ ५१ ॥
हिताहितं न जानन्तो नित्यमुन्मार्गगामिनः। कुक्षिपूरणनिष्ठा ये ते नरा नारकाः खग ॥ ५२ ॥
निद्रादिमैथुनाहाराः सर्वेषां प्राणिनां समाः। ज्ञानवान् मानवः प्रोक्तो ज्ञानहीनः पशुः स्मृतः ॥ ५३ ॥
प्रभाते मलमूत्राभ्यां क्षुत्तृड्भ्यो मध्यगे रवौ। रात्रौ मदननिद्राभ्यां बाध्यन्ते मूढमानवाः ॥ ५४ ॥

प्यारा भयेका वस्तुहरू कन जति सम्बन्ध गर्दछ, त्यत्तिनै शोकका किलाहरू त्यस्का हृदयमा गाडिन्छन् ॥ ४९ ॥ धेरै धनहरूले ठगियेर लोक (यसलोक र परलोक) नाश गर्ने, देहमा बसेका इन्द्रिय रूपी चोरहरूले विषयमा आहारले हाई हाई मारेनी मारे ॥ ५० ॥ मासु खान लोभी भयेको माछो (मछली) जसरी देख्दैन, त्यस्तै सुखको लोभले प्राणी यम बाधा (नरकको भोगलाई) देख्दैन ॥ ५१ ॥ सुखदिने (हित) दुःखदिने (अहित) क्यै जान्दैन। सदा कुकर्मका बाटामा हिड्ने, भुँडी भर्ने काममा लागेका, जो मनुष्य छन् ती मनुष्यहरू नरकको भोग गर्ने हुन्। तीनैलाई नारकी भन्दछन् ॥ ५२ ॥ निद्रा, मैथुन (स्त्री संभोग) आहार सबै देह धारीहरूमा बराबर छ, ज्ञानभएकाले मनुष्य चाँही ज्ञानी भयेको छ। ज्ञानले हीन जो छ सो पशुनै हो ॥ ५३ ॥ प्रातःकालमा मल र मूत्रले, दिउँसो भोक प्यासले, रात्रिमा संभोग र

ग० स्वदेहधनदारादिनिरताः सर्वजन्तवः। जायन्ते च म्रियन्ते च हा हन्ताज्ञानमोहिताः ॥ ५५ ॥ पो०
पु० तस्मात्सङ्गः सदा त्याज्यः सर्वस्त्यक्तुं न शक्यते। महद्भिः सह कर्तव्यः सन्तः सङ्गस्य भेषजम् ॥ ५६ ॥ अ०
सत्सङ्गश्च विवेकश्च निर्मलं नयनद्वयम्। यस्य नास्ति नरःसोऽन्धः कथं न स्यादमार्गगः ॥ ५७ ॥
स्वस्ववर्णाश्रमाचारनिरताः सर्वमानवाः। न जानन्ति परं धर्मं वृथा नश्यन्ति दाम्भिकाः ॥ ५८ ॥
क्रियायासपराः केचिद् व्रतचर्यादिसंयुताः। अज्ञानसंवृतात्मानः संचरन्ति प्रतारकाः ॥ ५९ ॥

निद्राहरूले मूर्ख मनुष्यहरूलाई बाधा गर्छ (ज्ञानीलाई गर्दैन) ॥ ५४ ॥ आफ्नो देह, धन, स्त्रीहरूमा सम्पूर्ण जीवन नष्ट पारि रहेछन्। अज्ञानले मोहित भयेका कति जन्मन्छन्, कति मर्दछन् पनि हा हन्त (कत्रो खेदको कुरा हो) नाश भयेनी नाश भये ॥ ५५ ॥ त्यसो हुनाले सदा सर्वदा योनिहरूको संग त्याग गरोस्। सबै त्याग्न सकिन्न भने ठूला ज्ञानीहरूको संग गरोस् , किन भने सङ्गका औषधीले सज्जन हुन्छ ॥ ५६ ॥ सत्सङ्ग र विवेक रूपी दुइटा निर्मल नयन जस्का छैनन् यो अन्धो मनुष्य किन कुबाटो हिँड्दैनथ्यो (अवश्य हिँडदछ) ॥ ५७ ॥ सबै मनुष्य आफ्ना वर्ण, (जात ब्राह्मणादि) आश्रम (ब्रह्मचारी आदि) हरूको आचरणमा लागेका छन्, दाम्भिकहरू (घमण्डी) २१६
परधर्म [श्रेष्ठधर्म] जान्दैनन्, वृथै नाश भै रहेका छन् ॥ ५८ ॥ कोही त क्रियाकर्ममा आसक्त छन्, कोहि त व्रतहरूमा लागेका छन्। यस्ता

नाममात्रेण सन्तुष्टाः कर्मकाण्डरता नराः। मन्त्रोच्चारणहोमाद्यैर्भ्रामिताः क्रतुविस्तरैः ॥ ६० ॥
ग० एकभुक्तोपवासाद्यैर्नियमैः कायशोषणैः। मूढाः परोक्षमिच्छन्ति मम मायाविमोहिताः ॥ ६१ ॥ पो०
पु० देहदण्डनमात्रेण का मुक्तिरविवेकिनाम्। वल्मीकताडनादेव मृतः कुत्र महोरगः ॥ ६२ ॥ अ०
जटाभाराजिनैर्युक्ता दाम्भिका वेषधारिणः। भ्रमन्ति ज्ञानिवल्लोके भ्रामयन्ति जनानपि ॥ ६३ ॥
संसारजसुखासक्तं ब्रह्मज्ञोस्मीति वादिनम्। कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा ॥ ६४ ॥
गृहारण्यसमा लोके गतव्रीडा दिगम्बराः। चरन्ति गर्दभाद्याश्च विरक्तास्ते भवन्ति किम् ॥ ६५ ॥

ठगहरू आत्मालाई अज्ञानले ढाकेर संसारमा हिँडदछन् ॥ ५९ ॥ कर्मकाण्डमा आसक्त भयेका मनुष्य नाममात्रले सन्तुष्ट छन्। (स्वर्ग आदि) को मन्त्र उच्चारण गरी (जस्तै सोमयाग) अनेक यज्ञहरूको हवनहरूले भ्रमाइयेका छन् ॥ ६० ॥ कोही एक छाक खायेर, कोही उपवासहरूका नियमले शरीर सुखाउनाले मेरो मायाले मोहित भयेका मूर्खहरू परोक्ष [स्वर्गादि भोगहरूको] इच्छा गर्दछन् ॥ ६१ ॥ यस्ता अविवेकिहरूले देहलाई सजाई दिनाले मात्र के मुक्ति हुन्छ, जस्तै सर्पदेखि डरायेर धमिराको गोलोलाई चुटनाले सर्प मर्छ र [मर्दैन] ॥ ६२ ॥ जटाका भारीले मृगचर्महरूले युक्त भयेका पाखण्डी भेष धारण गर्ने संसारमा यस्ता मनुष्य ज्ञानी झैं भयेर मनुष्यहरूलाई भ्रमाउँछन् ॥ ६३ ॥ संसारको सुखमा युक्त
१९ भयेका म ब्रह्मज्ञानी हूँ भन्ने [यस्ता] मनुष्य कर्म पनि छाडेका [कर्मभ्रष्ट] ब्रह्मको उपासनादेखि पनि भ्रष्टभयेका तिनीलाई अन्त्यज (डूम) जस्तै २१७
त्यागोस् ॥ ६४ ॥ घरलाई जंगल समान गरेका, संसारमा लज्जालाई त्यागेर दिगम्बर भयेर हिड्नेहरू वस्त्रहरू केही लगाउँदैनन्, गदाहा

मृद्भस्मोद्धूलनादेव मुक्ताः स्युर्यदि मानवाः। मृद्भस्मवासी नित्यं श्वा स किं विमुक्तो भविष्यति॥ ६६॥
तृणपर्णोदकाहाराः सततं वनवासिनः। जम्बुकाखुमृगाद्यश्च तापसास्ते भवन्ति किम्॥ ६७॥
आजन्ममरणान्तं च गङ्गादितटिनीस्थिताः। मण्डूकमत्स्यप्रमुखा योगिनस्ते भवन्ति किम्॥ ६८॥
पारावताः शिलाहाराः कदाचिदपि चातकाः। न पिबन्ति महीतोयं व्रतिनस्ते भवन्ति किम्॥ ६९॥
तस्मान्नित्यादिकं कर्म लोकरञ्जनकारकम्। मोक्षस्य कारणं साक्षात्तत्त्वज्ञानं खगेश्वर॥ ७०॥
षड्दर्शनमहाकूपे पतिता पशवः खग। परमार्थं न जानन्ति पशुपाशनियन्त्रिताः॥ ७१॥

हरूझैं चर्दै हिड्दछन् भने के तिनीहरू पनि विरक्तभये ? (हुदैनन्) ॥ ६५॥ यदि मनुष्यहरू माटो भस्म (खरानि) घसनाले मुक्त हुन्छन् भने, खरानिमा मात्र सधै कुकुर वस्तछ भने के त्यो मुक्त भयो॥ ६६॥ घाँस पातको, जलको मात्र आहार गर्ने, सधैं बनैंमा वस्ने यस्ता तपस्वी हुन्छन् भने श्याल मूसो मृगहरू पनि के तपस्वी भये॥ ६७॥ जन्मेदेखि मरून् जेल गंगा आदि नदीहरूमा बस्ने योगी हुन्छन् भने माछाहरू भ्यागुता सधैं बसेका छन् के ती योगी भये॥ ६८॥ त्यस्तै परेवाहरू शिलाको आहार गर्दछन्, त्यस्तै कहिले कहीं जलपान गर्ने चातकहरू (काकाकुल) के व्रतगर्नेहरु भयेका हुन्छन् (हुँदैनन्)॥ ६९॥ तस्मात्कारणात् हे पक्षिराज! यी कर्महरू जति छन् संसारलाई (रंजन गर्ने भुलाउने हुन्) मोक्षका कारण होइनन्, केवल मोक्षको कारण तत्त्वज्ञान मात्र हो॥ ७०॥ हे गरुडजी! षडदर्शन रूपी (दर्शन

वेदशास्त्रार्णवे घोरे ऊह्यमाना इतस्ततः। षडूर्मिनिग्रहग्रस्तास्तिष्ठन्ति हि कुतार्किकाः॥ ७२॥
वेदागमपुराणज्ञः परमार्थं न वेत्ति यः। विडम्बकस्य तस्यैव तत्सर्वं काकभाषितम्॥ ७३॥
इदं ज्ञानमिदं ज्ञेयमिति चिन्तासमाकुलाः। पठन्त्यहर्निशं शास्त्रं परतत्त्वपराङ्मुखाः॥ ७४॥
वाक्यच्छन्दो निबन्धेन काव्यालङ्कारशोभिताः। चिन्तया दुःखिता मूढास्तिष्ठन्ति व्याकुलेन्द्रियाः॥ ७५॥
अन्यथा परमं तत्त्वं जनाः क्लिश्यन्ति चान्यथा। अन्यथा शास्त्रसद्भावो व्याख्यां कुर्वन्ति चान्यथा॥ ७६॥

शास्त्र न्याय, मीमांसा, सांख्य हरू) ठूलो कूपमा पशुहरू खस्तछन् परमार्थलाई श्रेष्ठ उत्तम अर्थ परमात्मा न जानी कन (किन जान्दैनन् भने) पशु पाशामा बाँधीयेका हुनाले॥ ७१॥ वेदशास्त्ररूपी डर लाग्दो समुद्रमा खसेर यता उता बगेका षड् उर्मि (छ वटा लहरी, सुख दुख आदि) मा आकुल वयाकुल भयी कुतर्कना गर्नेहरू बसी रहन्छन्॥ ७२॥ वेद धर्मशास्त्र पुराणहरू जान्ने परमार्थ न जान्ने जो छन् त्यो सबै कागले बोले जत्ति कै हो, त्यस्को त्यो विडम्बना (नकल) मात्र हो॥ ७३॥ यो ज्ञान हो, यो जान्नु पर्ने भन्ने यस्तो चिन्ताले आकुल भयेका दिन रात शास्त्र पढी मुख्य (तत्त्वज्ञान) तत्वदेखि पराङ्मुख भयेका छन्॥ ७४॥ वाक्य (एउटा पूरा कुरा) छन्द (श्लोक) त्यस्को निबन्ध रचनाले बनेको काव्यको अलङ्कार [उक्ति] ले शोभायमान हुनाले पनि चिन्ताले दुःखि (कसरी असल हुन्छ भन्ने मात्र) भयेका इन्द्रियहरूलाई आकुल व्याकुल गरी मूर्खहरू बस्तछन्॥ ७५॥ परंतत्त्व चाँहीं अर्कै छ। प्राणीहरू अर्कातिर व्यर्थ दुःखी हुन्छन्। शास्त्रको

कथयन्त्युन्मनीभावं स्वयं नानुभवन्ति च। अहंकाररताः केचिदुपदेशादिवर्जिताः॥ ७७॥
पठन्ति वेदशास्त्राणि बोधयन्ति परस्परम्। न जानन्ति परतत्त्वं दर्वी पाकरसं यथा॥ ७८॥
शिरो वहति पुष्पाणि गन्धं जानाति नासिका। पठन्ति वेदशास्त्राणि दुर्लभो भावबोधकः॥ ७९॥
तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु मुह्यति। गोपः कुक्षिगते छागे कूपे पश्यति दुर्मतिः॥ ८०॥
संसारमोहनाशाय शब्दबोधो न हि क्षमः। न निवर्तेत तिमिरं कदाचिद्दीपवार्तया॥ ८१॥

मर्यादा [असलमा अर्केछ] अर्के व्याख्यान अर्के थोक गर्दछन्॥ ७६॥ मन्त्रलाई उन्मनी भव (जस्लाई उपशम भन्दछन् स्वयं आफै अनुभव गर्दैन किन भने अहंकारले नष्ट भयेका उपदेशहरू [सद्गुरूको उपदेशले] हीन छ। म जान्ने छँदैछु, को सँग सोधूँ [भन्ने]॥ ७७॥ वेदशास्त्र पढेर आफैं आँफमा [परस्पर] छलफल पनि गर्दछन्। परं तत्व जुन हो उ चाहीं जान्दैनन्, जस्तै डाढूले पकायेका पदार्थहरूको स्वाद जान्दैन॥ ७८॥ जस्तै शिरमा [कमल] सुगन्धी फूलहरू बोकेको छ, गन्ध जान्ने नाक छ, वेदशास्त्रहरू पढ्दछन् पढेर के गर्नु त्यस्को भाव [तत्त्व] जान्नु दुर्लभ छ॥ ७९॥ आफूमा रहेको तत्त्वलाई न जानेर शास्त्रहरूमा मूर्ख मोहित छ, जस्तै दुर्मतिभयेको गोठालो काखमा लियेको बाख्रोलाई इनारमा खोज्दछ॥ ८०॥ संसारको मोहनाश गर्ने शब्दहरू जान्नाले मात्र हुँदैन, जस्तै कहीं अन्धकारमा बसेर २२०

प्रज्ञाहीनस्य पठनं यथान्धस्य च दर्पणम्। अतः प्रज्ञावतां शास्त्रं तत्वज्ञानस्य लक्षणम्॥ ८२॥
इदं ज्ञानमिदं ज्ञेयं सर्वं तु श्रोतुमिच्छति। दिव्यवर्षसहस्रायुः शास्त्रान्तं नैव गच्छति॥ ८३॥
अनेकानि च शास्त्राणि स्वल्पायुर्विघ्नकोटयः। तस्मात्सारं विजानीयात्क्षीरं हंस इवाम्भसि॥ ८४॥
अभ्यस्य वेदशास्त्राणि तत्त्वं ज्ञात्वाथ बुद्धिमान्। पलालमिव धान्यार्थी सर्वशास्त्राणि संत्यजेत्॥ ८५॥
यथामृतेन तृप्तस्य नाहारेण प्रयोजनम्। तत्त्वज्ञस्य तथा तार्क्ष्य न शास्त्रेण प्रयोजनम्॥ ८६॥

बत्तीको कुरा गर्नाले मात्र अन्ध्यारोको नाश हुँदैन उस्तै कुरा [शब्द] जान्नाले मात्र हुँदैन॥ ८१॥ जस्तै [कार्य गर्ने पर्छ] बुद्धि न भयेकाले पढ्नु, जस्तै अन्धोले ऐना हेर्नाले [आफ्नु] अनुहारको स्वरूप जान्दैन, यसै हुनाले बुद्धिमानलाई शास्त्र हो, तत्त्वज्ञानका लक्षणलाई कामदिने हुन्छ॥ ८२॥ [बुद्धि छैन भने] दिव्य हजार वर्ष सम्मको आयु भये पनि यो सम्पूर्ण जान्नु पर्ने रहेछ, यो जानीयो, यो पनि सुन्नु पर्दछ, यस्ता प्रकारले शास्त्रको अन्त (पार) गर्ने सक्तैन॥ ८३॥ आयुभने थोरै छ, विघ्नभने करोडौं छन् शास्त्रहरू अनेक छन् तस्मात् के गरोस भने जस्तै हाँसले पानीमा मिसायेको दूध दूध छानेर खान्छ [पिउँछ] त्यस्तै गरी शास्त्रको सार वस्तु ज्ञान ग्रहण गरोस्॥ ८४॥ बुद्धिमान् जो हो वेदशास्त्रहरू अभ्यासगरी तत्त्व जाने पछी संपूर्ण शास्त्रहरूलाई त्याग गर्दछ, जस्तै धान इच्छा गर्नेले पराल छोड्दै छोडोस्॥ ८५॥ अमृतले तृप्त भयेको मनुष्यलाई खाने कुराको प्रयोजन छैन, त्यस्तै हे गरुडजी! तत्त्व ज्ञान भयेकालाई शास्त्रको प्रयोजन २२१

न वेदाध्ययनान्मुक्तिर्न शास्त्रपठनादपि। ज्ञानादेव हि कैवल्यं नान्यथा विनतात्मज ॥ ८७ ॥
नाश्रमः कारणं मुक्तेर्दर्शनानि न कारणम्। तथैव सर्वकर्माणि ज्ञानमेव हि कारणम् ॥ ८८ ॥
मुक्तिदा गुरुवागेका विद्याः सर्वा विडम्बिका। काष्ठभारसहस्रेषु ह्येकं संजीवनं परम् ॥ ८९ ॥
अद्वैतं हि शिवं प्रोक्तं क्रियायासविवर्जितम्। गुरुवक्त्रेण लभ्येत नाधीतागमकोटिभिः ॥ ९० ॥
आगमोक्तं विवेकोत्थं द्विधा ज्ञानं प्रचक्षते। शब्दब्रह्मागममयं परब्रह्मविवेकजम् ॥ ९१ ॥
अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे। समं तत्त्वं न जानन्ति द्वैताद्वैतविवर्जितम् ॥ ९२ ॥

छैन ॥ ८६ ॥ वेद पढ्नाले मात्र मुक्ति हुँदैन, शास्त्र पढ्नाले पनि हुँदैन। हे विनतापुत्र! ज्ञानले मात्रै कैवल्य मुक्ति हुन्छ, अरु कुनै उपाय छैन ॥८७ ॥ यस्मा आश्रम कारण छैन, दर्शन शास्त्रहरू पनि मुक्तिका कारण छैनन्, त्यस्तै सबै कर्महरूमा ज्ञान नै मुख्य कारण हुन्छ ॥८८ ॥ मुक्ति दिने गुरुको वचन एउटै छ, अरु सबै विद्या नकल गर्ने मात्र हुन्, जस्तै काठका हजारौं भारीहरूमा एउटा संजीवनीश्रेष्ठ हुन्छ ॥ ८९ ॥ कल्याणप्रद ज्ञान अद्वैत छ। सुख दुखादिहरू क्रिया का (कर्म) मिहिनेतहरूले रहित भयेको शिव (कल्याण) स्वरूप ज्ञान भनेको छ। यस्तो यो कुरा सत् गुरुका मुखारविन्दले मात्र प्राप्त हुन्छ। करोडौं वेदान्तशास्त्रहरू पढ्नाले हुँदैन ॥ ९० ॥ ज्ञान दुइ प्रकारका छन् एक शास्त्रदेखि भयेको ज्ञान, अर्को सत् असत् भन्ने विवेक देखि भयेको। त्यस्तै ब्रह्म पनि एक ब्रह्म शास्त्रीय शब्द हुन् र विवेक देखि उत्पन्न

द्वे पदे बन्धमोक्षाय न ममेति ममेति च। ममेति बध्यते जन्तुर्न ममेति प्रमुच्यते ॥ ९३ ॥
तत्कर्मयन्न बन्धाय सा विद्या या विमक्तिदा। आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥ ९४ ॥
यावत्कर्माणि चीयन्ते यावत्संसारवासना। यावदिन्द्रियचापल्यं तावत्तत्त्वकथा कुतः ॥ ९५ ॥
यावद्देहाभिमानश्च ममता यावदेव हि। यावत्प्रयत्नवेगोस्ति यावत्सङ्कल्पकल्पना ॥ ९६ ॥
यावन्नो मानसस्थैर्यं न यावच्छास्त्रचिन्तनम्। यावन्न गुरुकारुण्यं तावत्तत्त्वकथा कुतः ॥ ९७ ॥

भयेको परब्रह्म हुन् ॥ ९१ ॥ कोही अद्वैतको इच्छा गर्दछन्, कोहीं चाँहीं द्वैतको इच्छा गर्दछन्। द्वैतभाव र अद्वैतभावले रहित भयेको समतत्त्वलाई कोही पनि जान्दैनन् ॥ ९२ ॥ यस संसारमा दुइटा पद छन् बन्धन हुने र मोक्ष हुने। ती कुन् भने मेरो भन्नाले बन्धन र न मम भन्नाले मोक्ष हुने ॥ ९३ ॥ कर्म कुन हो भने कुन गर्नाले बन्धन हुँदैन। कसलाई विद्या भन्दछन्, जुनले मुक्ति दिन्छीन्। अर्को कर्म जो हो परिश्रमका निमित्त मात्र हो, त्यसलाई कर्म भनिन्न। अर्को विद्या जुन हो कारिगरीको निपुण हुनमा कारण छन्, ती विद्या भनीन्छन् ॥ ९४ ॥ जहाँ सम्म कर्म गरिन्छ, जहाँ संसारको वासना छ, जहाँ सम्म इन्द्रियहरू चञ्चल छन्, त्यहाँ सम्म तत्त्व कथा कहाँ हुन्छ (हुँदैन) ॥ ९५ ॥ फेरि जहाँ सम्म ममता छ, जहाँ सम्म प्रयत्न गर्ने बेग छ, जहाँ सम्म कल्पना (तर्क वितर्क) छ, जहाँ सम्म मन स्थिर हुँदैन, जहाँ सम्म सत् शास्त्रको चिन्तन हुँदैन, त्यहाँ सम्म तत्त्वको कुरा हुँदै हुँदैन ॥ ९६ ॥ तपस्या, व्रत, तीर्थ, जप, होम, पूजाहरू जति छन् वेदशास्त्र, धर्म

तावत्तपो व्रतं तीर्थं जपहोमार्चनादिकम्। वेदशास्त्रागमकथा यावत्तत्त्वं न विन्दति॥ ९८॥
तस्मात्सर्वप्रयत्नेन सर्वावस्थासु सर्वदा। तत्त्वनिष्ठो भवेत्ताक्ष्र्य यदीच्छेन्मोक्षमात्मनः॥ ९९॥
धर्मज्ञानप्रसूनस्य स्वर्गमोक्ष फलस्य च। तापत्रयादि सन्तप्तश्छायां मोक्षतरोः श्रयेत्॥ १००॥
तस्माज्ज्ञानेनात्मतत्त्वं विज्ञेयं श्रीगुरोर्मुखात्। सुखेन मुच्यते जन्तुर्घोरसंसारबन्धनात्॥ १०१॥
तत्त्वज्ञस्यान्तिमं कृत्यं शृणु वक्ष्यामितेऽधुना। येन मोक्षमवाप्नोति ब्रह्मनिर्वाणसंज्ञकम्॥ १०२॥
अन्तकाले तु पुरुष आगते गतसाध्वसः। छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम्॥ १०३॥

शास्त्रहरूका कुरा त्यहीं सम्म हुन्छन्, जहाँ सम्म तत्वको कुरा प्राप्ति हुँदैनन्॥ ९७-९८॥ हे गरुडजी! यदि आफ्नो त्यस्ले सबै तिरका परिश्रमले सब अवस्थाहरूमा सधैं तत्व निष्ठ होस् (तत्वको विचार गरोस्) मोक्षको इच्छा गर्दछ भने॥ ९९॥ धर्म शास्त्ररूपी फूल भयेको स्वर्ग र मोक्षरूपी फल भयेको तीन ताप (आध्यात्मिक, आधिदैविक, आधिभौतिक) ले तातेका ई मोक्षरूपी रूखका छाहारीको आश्रय गरोस्॥ १००॥ तस्मात् (के गरोस् भने) ज्ञानद्वारा आत्मतत्व रूप श्रीगुरुका मुखारविन्दबाट जानोस् (सुनोस्)। जान्नाले मनुष्य घोर संसारका बन्धनदेखि सुखैले मुक्त हुन्छ॥ १०१॥ अब तत्व ज्ञानिहरूले गर्ने अन्तिम कर्म तिमीलाई भन्दछु सुन, जुनले ब्रह्म निर्वाण संज्ञा वा मोक्ष पाउँछ॥ १०२॥ अन्त्य काल भयेको देखि भयहरूलाई त्याग गरेर असंग रूपी हतियारले देहका सँगमा रहेका पुत्र स्त्रीहरूको

गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः शुचौ विविक्त आसीनो विधिवत्कल्पितासने॥ १०४॥
अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्। मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन्॥ १०५॥
नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः। मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया॥ १०६॥
अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम्। एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले॥ १०७॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥ १०८॥
न यत्र दाम्भिका यान्ति ज्ञानवैराग्यवर्जिताः। सुधियस्तां गतिं यान्ति तानहं कथयामि ते॥ १०९॥

इच्छा कन रोकोस्॥ १०३॥ त्यो कसरी काटिन्छ भने घरबाट हिंडेर बुद्धिमान् जो हो पुण्य तीर्थहरूका जलमा स्नान गरी शुद्ध एकान्तमा विधि पूर्वक बनायेका आसनमा बसी तत्त्वको चिन्तन गरोस्॥ १०४॥ शुद्ध तीन अक्षर (अ, उ, म) ले युक्त भयेको श्रेष्ठ ब्रह्माक्षर (ॐ) हो त्यसलाई मनले अभ्यास गरोस्। ब्रह्मको बीजलाई स्मरण गरेर मन लगाओस्॥१०५॥ विषयहरूदेखिन् इन्द्रियहरूलाई बुद्धि रूपी सारथि भयेका मनले रोकोस्, कर्महरूले लगेको मन शुभकार्य (ब्रह्मचिन्तन) मा बुद्धिले सँगै धारण गरोस्॥ १०६॥ मै ब्रह्म हूँ परं धाम हूँ परमं पद हूँ यस्ता प्रकारले विचार गरेर कालले रहित आत्मा कन आत्मा मै राखेर विचार गरोस्॥ १०७॥ (ओं निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः॥ द्वन्द्वैर्विमुक्ताः सुख दुःखसंज्ञैर्गच्छन्त्यमूढाःपदमव्यय तत्॥) भन्ने एकाक्षर ब्रह्मकन अभ्यास

ग० पु० | सो० अ०

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुखसंज्ञैर्गच्छन्त्यमूढाः पद व्ययं तत् ॥ ११० ॥
ज्ञानह्रदे सत्यजले रागद्वेषमलापहे । यः स्नाति मानसे तीर्थे स वै मोक्षमवाप्नुयात् ॥ १११ ॥
प्रौढवैराग्यमास्थाय भजते मामनन्यभाक् । पूर्णदृष्टिः प्रसन्नात्मा स वै मोक्षमवाप्नुयात् ॥ ११२ ॥
त्यक्त्वा गृहं च यस्तीर्थे निवसेन्मरणोत्सुकः । म्रियते मुक्तिक्षेत्रेषु स वै मोक्षमवाप्नुयात् ॥ ११३ ॥

गर्दै, मलाई स्मरण गर्दै जो मनुष्य शरीरलाई छाडेर जान्छ त्यो मनुष्य उत्तम गतिकन प्राप्त गर्दछ (जान्छ) ॥ १०८ ॥ जहाँ दांभिकहरू ज्ञान वैराग्यले रहित भयेका जान सक्तैनन्, जो उत्तम बुद्धिभयेका त्यस गतिमा प्राप्त हुन्छन्, म त्यो गति तिमीलाई भन्दछु ॥१०९॥ मान, मोहले रहित भयेका संगहरूलाई जितेका, विषयहरूदेखि निवृत्त भयेका, अध्यात्म विद्यामा लागेका, सुख दुःखरूपी द्वन्द्वले मुक्त भयेका, मूढ न भयेका छँदा तत् पदवाच्य अव्यय पद कन प्राप्त हुन्छन् ॥ ११० ॥ ज्ञानरूपी देह, सत्यरूपी जलमा राग र द्वेषरूपी मनलाई पखाल्दछ, जो मन रूपी तीर्थमा स्नान गर्दछ त्यो अवश्यै मोक्ष प्राप्त गर्दछ ॥ १११ ॥ ठूलो वैराग्यले युक्त भयेर मलाई एक चित्तले भज्दछ, जो पूर्ण दृष्टि प्रसन्न आत्मा भयेको छ त्यसैले मोक्ष प्राप्त गर्दछ ॥ ११२ ॥ जुन मनुष्य मर्नका इच्छाले घर छाडी तीर्थमा बस्तछ, त्यो पनि मुक्ति

ग० पु० | सो० अ०

अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका । पुरी द्वारावती ज्ञेयाः सप्तैता मोक्षदायिकाः ॥ ११४ ॥
इति ते कथितस्तार्क्ष्य मोक्षधर्मं सनातनः । ज्ञानवैराग्यसहितं श्रुत्वा मोक्षमवाप्नुयात् ॥ ११५ ॥
मोक्षं गच्छन्ति तत्त्वज्ञा धार्मिकाः स्वर्गतिं नराः । पापिनो दुर्गतिं यान्ति संचरन्ति खगादयः ॥ ११६ ॥
इत्येवं सर्वशास्त्राणां सारोद्धारो निरूपितः । मया ते षोडशाध्यायैः किं भूयः श्रोतुमिच्छसि ॥ ११७ ॥

सूत उवाच —

एवं श्रुत्वा वचो राजन् गरुडो भगवन्मुखात् । कृताञ्जलिरुवाचेदं तं प्रणम्य मुहुर्मुहुः ॥ ११८ ॥

क्षेत्रहरूमा, मरेको अवश्य मोक्ष पाउँछ ॥ ११३ ॥ ती कुन् हुन् अयोध्या, मथुरा, माया, (हरिद्वार) काशी, काञ्ची, (शिवकाञ्ची/ विष्णु काञ्ची) अवन्तिका (उज्जैन) द्वारावती (द्वारिका) ई सात पुरी मोक्ष दाता हुन् ॥ ११४ ॥ हे गरुडजी ! यो सनातन मोक्षधर्म भनें— ज्ञान वैराग्यले युक्त भयेर यसलाई सुन्नाले मोक्ष प्राप्त गर्दछ ॥ ११५ ॥ तत्त्वज्ञानीहरू मोक्ष हुन्छन, धार्मिकहरु स्वर्ग जान्छन्, पापीहरू दुर्गति पाउँदछन् (नरक), पक्षिहरूर्भे (अज्ञानी) भवसागरमा हिँडदछन् ॥ ११६ ॥ यस्ता प्रकारले सम्पूर्ण शास्त्रहरूको सारोद्धार मैले तिमीलाई सोह्र अध्यायहरूले भनें । फेरि कुन कुरा तिम्रो सुन्ने इच्छा छ भनी विष्णु भगवानबाट आज्ञा भयो ॥ ११७ ॥ सूतजी भन्नु हुन्छ, राजन् ! यस्ता

भगवन् देवदेवेश श्रावयित्वा वचोऽमृतम्। तारितोऽहं त्वया नाथ भवसागरतः प्रभो॥ ११९॥
स्थितोऽस्मि गतसन्देहः कृतार्थोऽस्मि न संशयः। इत्युक्त्वा गरुडस्तूर्ष्णीं स्थित्वा ध्यानपरोऽभवत्॥ १२०॥
स्मरणाद् दुर्गतिहर्ता पूजनयज्ञेन सद्गतेर्दाता। यःपरया निजभक्त्या ददाति मुक्तिं स मां हरिः पातु ॥१२१॥

॥ इति श्रीगरुडपुराणे सारोद्धारे भगवद्गरुडसंवादे मोक्षधर्मनिरूपणं नाम षोडशोऽध्यायः॥ १६॥

प्रकारको वचन भगवानका मुखारविन्ददेखि सुनेर (हात जोडी) श्रीविष्णु भगवानलाई बारंबार दण्डवत् गरेर यो विन्ति गरे। हे भगवान् ! हे देवदेवेश! वचन रूपी अमृत सुनायेर हजुरले भवसागरदेखि, हे प्रभो! हे नाथ! तारि दिनुभयो॥ ११८-११९॥ अब संदेहै छैन, कृतार्थ भयें सन्देहै छैन, यस्तो भनेर गरुड चुप लागी बसेर ध्यान गर्न थाले॥ १२०॥ स्मरणगर्नाले दुर्गतिलाई नाश गर्ने पूजा र यज्ञ गर्नाले असल गतिलाई दिने आफ्नो परम भक्तिलाई दिने यस्ता श्रीहरि भगवानले मलाई रक्षा गरुन्॥ १२१॥

॥ इति श्रीगरुडपुराणे सारोद्धारे नेपाली भाषा टीकायां षोडशोऽध्यायः॥ १६॥

❋ अथ माहात्म्य ❋

श्रीभगवानुवाच —

इत्याख्यातं मया तार्क्ष्य सर्वमेवौर्ध्वदेहिकम्। दशाहाभ्यन्तरे श्रुत्वा सर्वपापैः प्रमुच्यते॥ १॥
इदं चामुष्मिकं कर्म पितृमुक्तिप्रदायकम्। पुत्रवाञ्छितदं चैव परत्रेह सुखप्रदम्॥ २॥
इदं कर्म न कुर्वन्ति ये नास्तिकनराधमाः। तेषां जलमपेयं स्यात्सुरातुल्यं न संशयः॥ ३॥
देवताः पितरश्चैव नैव पश्यन्ति तद्गृहम्। भवन्ति तेषां कोपेन पुत्राः पौत्राश्च दुर्गताः॥ ४॥

श्रीभगवान् आज्ञा गर्नु हुन्छ — हे गरुडजी! यो सबै उर्ध्व देह सम्बन्धी कथा तिमीलाई भनें। यसलाई दश दिन भित्रमा सुत्राले सम्पूर्ण पापहरूदेखि मुक्त हुन्छ॥ १॥ यो यस लोकको धर्म हो, पितृहरूलाई मुक्ति दायक भयेको छोरालाई इच्छा पूर्ण गर्ने यसलोक र परलोकमा पनि सुख दिने भयेको छ॥ २॥ जुन मनुष्यहरू यो कर्म गर्दैनन्, ती नरहरूमा अधम र नास्तिक हुन्। तिनीहरुको जलपान
२० न गर्नु, किनभने तिनले छोयेको जल रक्सि समान हुन्छ, यस्मा सन्देहै छैन॥ ३॥ देवताहरू, पितृहरू पनि त्यस घरलाई हेर्दै हेर्दैनन्।
तिनीहरूका रीसले पुत्र पौत्रहरू दुःखी दरिद्री हुन्छन्॥ ४॥ ब्राह्मणहरू, क्षत्रियहरू, वैश्यहरू, शूद्रहरू, अरूहरू पनि प्रेत कर्म न

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवेतरेऽपि च। ते चाण्डालसमा ज्ञेयाःसर्वे प्रेतक्रियां विना॥ ५॥
प्रेतकल्पमिदं पुण्यं शृणोति श्रावयेच्च यः। उभौ तौ पापनिर्मुक्तौ दुर्गतिं नैव गच्छतः॥ ६॥
मातापित्रोश्च मरणे सौपर्णं शृणुते तु यः। पितरौ मुक्तिमापन्नौ सुतः सन्ततिमान्भवेत्॥ ७॥
न श्रुतं गारुडं येन गयाश्राद्धं च नो कृतम्। वृषोत्सर्गः कृतो नैव न च मासिकवार्षिके॥ ८॥
स कथं कथ्यते पुत्रः कथं मुच्येदृणत्रयात्। मातरं पितरं चैव कथं तारयितुं क्षमः॥ ९॥

गर्नाले सबै चाण्डाल जत्तिकै हुन्छन् भनि जान्नु॥ ५॥ यो प्रेत कल्प कस्तो छ भने पवित्र भयेको, जो सुन्दछ- सुनाउँदछ ती दुवै जना पापले मुक्त भई सुगतिमा प्राप्त हुन्छन्॥ ६॥ माता पिता मरेमा जसले गरुड पुराणको (प्रेतकल्प) सुन्दछ, तिनका माता-पिता मुक्तिमा प्राप्त हुन्छन्। तेस्को छोरो सन्ततिमान हुन्छ॥ ७॥ जस्ले यो प्रेतकल्प सुनेन, गया श्राद्ध पनि गरेन, वृषोत्सर्ग पनि गरेन, मासिक, वार्षिकहरू पनि गरेन भने त्यसलाई कसरी छोरो भन्नु त्यो कसरी तीन ऋणबाट मुक्त हुन्छ ? माता पितालाई पनि कसरी तार्न (उद्धार) गर्न समर्थ हुन्छ ?॥ ८-९॥ तस्मात् के गरोस् भने कुनै उपायले पनि गरुड पुराण सुन्नै योग्य छ। धर्म, अर्थ, काम, मोक्ष हरूको

तस्मात्सर्वप्रयत्नेन श्रोतव्यं गारुडं किल। धर्मार्थकाममोक्षाणां दायकं दुःखनाशनम्॥ १०॥
पुराणं गारुडं पुण्यं पवित्रं पापनाशनम्। शृण्वतां कामनापूरं श्रोतव्यं सर्वदैव हि॥ ११॥
ब्राह्मणो लभते विद्यां क्षत्रियः पृथिवीं लभेत्। वैश्यो धनिकतामेति शूद्रः शुद्ध्यति पातकात्॥ १२॥
श्रुत्वा दानानि देयानि वाचकायाखिलानि च। पूर्वोक्तशयनादीनि नान्यथा सफलं भवेत्॥ १३॥
पुराणं पूजयेत्पूर्वं वाचकं तदनन्तरम्। वस्त्रालंकारगोदानैर्दक्षिणाभिश्च सादरम्॥ १४॥

दाता दुःख नाश गर्ने हुनाले यो अवश्य सुनुन्॥ १०॥ यो पुराण कस्तो हो भने पुण्यलाई दिने, पवित्र भयेको, पापलाई नाशगर्ने सुन्नेहरूलाई मनोरथ पूर्ण गर्ने (भयेकाले) अवश्य सधैं सुन्नु पर्छ॥ ११॥ (अरू सुन्ने हरूले) ब्राह्मण भये विद्या पाउँदछ, क्षत्रिय छ भने पृथ्वीको पालन गर्ने हुन्छ, वैश्य छ भने धनी हुन्छ शूद्र चाँहीं पनि अनेक पातकदेखि शुद्ध हुन्छ॥ १२॥ अब सुनेर वाचक (पुराण भन्ने पण्डितलाई) लाई धनहरू पूर्वोक्त शैय्याका सम्पूर्ण सरजामहरू दिनु नत्र सफल हुँदैन॥ १३॥ पहिले पुराणलाई पूजा गरोस् पछि वाचकलाई वस्त्र गहना गोदान दक्षिणाहरूले आदर पूर्वक पूजा गरोस्॥ १४॥ अन्नदान, सुवर्णदान, भूमि दानहरू गरे पुण्य-फल

अन्नैश्च हेमदानैश्च भूमिदानैश्च भूरिभिः। पूजयेद्वाचकं भक्त्या बहुपुण्यफलाप्तये॥ १५॥
वाचकस्यार्चनेनैव पूजितोऽहं न संशयः। सन्तुष्टे तुष्टितां यामि वाचके नात्र संशयः॥ १६॥

॥ इति श्रीगरुडपुराण श्रवणफलम्॥

पाउनाका निम्ति भक्ति पूर्वकले गरी पूजा गरोस्॥ १५॥ हे गरुडजी! वाचकको पूजा गर्नाले नै मेरो पूजा गरीयो। यस्मा सन्देह न मान, किन भने वाचक सन्तुष्ट हुनाले म सन्तुष्ट हुन्छु, यस्मा कुनै कुराको शंकै छैन। श्री विष्णु भगवानले आज्ञा गर्नु भयो तस्मात् पुराण भन्नेलाई विशेष गरी सम्मान पूर्वक शक्तिको साध्यदान पुण्य गरोस्, किन भने शास्त्रहरूमा वित्तशाठ्य न गरोस् भनेको छ॥ १६॥

॥ इति श्रीगरुडपुराणे श्रवणफलम् नेपाली भाषा टीकायां सम्पूर्णम्॥

॥ शुभम् भूयात्॥